प्रवेश सं० ४७९ विषयः न्याय (तर्क) क्रम सं०

नाम विख्यात पारिजातिकाव्हिक्रम ~~आह्निक कोलकं~~ ग्रन्थकार अनन्त भट्टः

पत्र सं० ३-८२

श्लोक सं०

अक्षर सं० (पंक्तौ) ३० पंक्ति सं० (पृष्ठे) ११

आकारः ८.८×४.५ लिपिः दे.ना. आधारः का.

वि० विवरणम् अशु.

पी० एस० यू० पी०--७७ एस० सी० ई०--१९५१--५० ००० 12214 आ.पु. ४

Indira Gandhi National Centre for the Arts

तऽत्साप ठित्वा भूमिं प्राप्य पेत्॥ तत्र मंत्रः॥ समुद्रवसने देवि पर्वतस्तनमंडिते। विष्णुपत्नि नमस्तुभ्यं
पादस्पर्शं क्षमस्व मे इति॥ ॥अथ मूत्रपुरीषोत्सर्गः॥ ॥पाराशरः॥ ततः प्रातः समुत्थाय कुर्याद्दूरम
त्रमेव च॥ नैर्ऋत्यामिषुक्षेपमतीत्याभ्यधिकं भुवः। अंतर्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा। वाचं नि
यम्य यत्नेन ष्ठीवनोच्छ्वासवर्जितः। विण्मूत्रयोर्वा क्रिम मर्नहारीतेनाप्युक्तं॥ उच्चारे मैथुने चैव प्रस्रा
वे दंतधावने॥ स्नाने भोजनकाले च षट्सु मौनं समाचरेदिति॥ तथा॥ कृत्वा यज्ञोपवीतं तु पृष्ठतः कं
ठलंबितं॥ विण्मूत्रं तु गृही कुर्यात्कर्णस्थः प्रथमाश्रमी॥ विण्मूत्रं तु गृही कुर्याद्यद्वा कर्णे समाहि
तदनिगृहितोऽपि कर्णे निधानवचनमेकवस्त्रविषयो॥ तदुक्तं शांखायनगृह्ये॥ यद्येकवस्त्रो यज्ञोप
वीतं कर्णे कृत्वा मूत्रपुरीषोत्सर्गं कुर्यादिति॥ कर्णे त्र दक्षिणः॥ पवित्रं दक्षिणे कर्णे कृत्वा विण्मू
त्रमुत्सृजेदिति हारीतोक्तेः॥ मनुः॥ मूत्रोच्चारसमुत्सर्गं दिवा कुर्यादुदङ्मुखः। दक्षिणाभिमुखो रात्रौ सं
ध्ययोश्च यथा दिवेति॥ यदपि मनुनैव॥ छायायामंधकारे वा रात्रावहनि वा द्विजः। यथासुखमुखः
कुर्यात्प्राणबाधाभयेषु चेत्युक्तं तदपि रात्रावहनि वा नीहाराद्यंधकारजनितदिङ्मोहविषयं ज्ञेयं॥ शस्त्रः॥

Indira Gandhi National Centre for the Arts

आह्निक० मूत्रंपुरीषंनोकुर्यात्सोपानत्कःकथंचन॥उत्सृज्यमज्जलेकुर्यात्स्नावंमेहनंद्विजः॥तथातज्जे
३ नीरोप्यसंपर्कंब्रह्मग्रंथियुतांशिखां॥भोजनेमैथुनेमूत्रेकुर्वन्स्तुछेरणाशुद्धतीतिसंग्रहे॥अत्रवर्ज्यदेश
नाहमनुः॥नमूत्रंपथिकुर्वीतनभस्मनिनगोव्रजे॥नफालकृष्टेनजलेनचित्यांनचपर्वते॥न
जीर्णदेवायतनेनवल्मीकेनशाड्वले॥नससत्वेषुगर्तेषुनगच्छन्नापिचस्थितः॥ननदीतीरमासाद्यनचप
र्वतमस्तके॥वाय्वग्निविप्रमादित्यमपःपश्यंस्तथैवगां॥नकदाचनकुर्वीतविण्मूत्रस्यविसर्जनमिति॥न
द्यादौविशेषःस्मृत्यंतरे॥दशहस्तंपरित्यज्यमूत्रंकुर्याज्जलाशये॥शतहस्तंपुरीषंचतीर्थेनद्यांचतुर्गु
णमिति॥ततोपस्थविण्मूत्रंकाष्ठलोष्टतृणादिना॥इतिपरिमृष्यगुदलिंगोगृहीतशिश्नश्चोत्ति
ष्ठेत्॥ ॥इतिविण्मूत्रोत्सर्गविधिः॥ ॥अथशौचं॥दक्षः॥ ॥शौचेयत्नःसदाकार्यःशौच
मूलोद्विजोत्तमः॥शौचाचारविहीनस्यसमस्तानिष्फलाःक्रियाः॥तत्रदेवतागृहवल्मीकमूष
कोत्करादिमृत्स्निग्धांमृदमुद्धृत्योदकंचादायवाग्यतउदङ्मुखोदिवाशौचंकुर्यात्॥रात्रौचेद्दक्षि राम:
णामुखः॥तदुक्तंपात्रेमलमूत्रोत्सर्जनसमयेहस्तेनधार्यगौतमः॥करस्थोदकपात्रस्तुविण्मू ३

त्रंकुरुतेयदि॥तज्जलंमूत्रसदृशंसुरापानेनतत्समं॥ ॥इतिमृत्संख्यादिकमाहशौनक
:॥एकातुमृत्तिकालिंगेतिस्रःसव्येकरेमृदः॥करद्वयेमृद्वयंस्यात्सूत्रमाणमपोच्यते॥आ
र्द्रामलकमात्राचमूत्रशौचेतुमृत्तिका॥मूत्रात्तुद्विगुणंशुक्रेमैथुनेत्रिगुणंभवेत्॥लिं
गशौचमिदंप्रोक्तंगुदशौचमथोच्यते॥पंचापानेमृदःक्षेप्याःकरेवामेदशस्मृताः॥ह
स्तयोःसप्तदातव्याःपुरीषेमृत्प्रमाणकं॥अर्द्धप्रसृतिमात्रास्यात्तदर्धंतुततःपरं॥गुदशौ
चमितिप्रोक्तंपादशौचमथोच्यते॥एकैकंपादयोर्दद्याद्धस्तयोर्लिंगशौचवत्॥एतच्छौ
चंगृहस्थानांद्विगुणंब्रह्मचारिणां॥त्रिगुणंस्याद्वनस्थानांयतीनांचचतुर्गुणं॥यद्दिवावि
हितंशौचंतदर्द्धंनिशिकीर्तितं॥तदर्द्धमातुरेप्रोक्तमातुरस्यार्द्धमध्वनि॥स्त्रीशूद्रयोरर्द्धमानं
शौचंप्रोक्तंमनीषिभिः॥स्त्रीशूद्राद्दरशक्तानांबालानांचोपनीतीनां॥गंधलेपक्षयकरंशौ
चंकुर्यान्नसंख्ययेति॥याज्ञवल्क्योपि॥गृहीतशिश्नश्चोत्थायमृद्भिरभ्युद्धृतैर्जलैः॥गंध
लेपक्षयकरंशौचंकुर्यादतंद्रितः॥अत्रगंधलेपक्षयकरंशौचंसर्वेषांवर्णाश्रमिणांसाधार

Indira Gandhi National
Centre for the Arts

आह्नि० कृ०
४
णां ॥ मत्संख्या नियमस्त्वदृष्टार्थः ॥ इति श्लोकान्नेश्वरः । लिंगशौचं पुरस्कार्यं गुदशौचं ततः स्मृत
मिति वचनाल्लिंगशौचानंतरं गुदशौचं द्रष्टव्यं ॥ गंगातोयेन कृत्स्नेन मृद्भारैश्च नगोपमैः ॥ आमृ
त्योराचरन् शौचं भावदुष्टो न शुध्यतीति स्मृतौ भावशुद्धिरप्यपेक्षिता । अत्रोक्तसंख्यानियमाति
क्रमे प्रायश्चित्तमुक्तं स्मृतिमुक्तावल्यां ॥ गायत्र्यष्टशतं चैव प्राणायामत्रयं तथा ॥ प्रायश्चित्त
मिदं प्रोक्तं नियमातिक्रमे सतीति । क्वचित्तु विष्णुस्मरणमेवोक्तं ॥ अनुदकमूत्रपुरीषोत्सर्गे सचे
लं स्नानं व्याहृतीहोमश्चेति प्रायश्चित्तद्वयमिति प्रयोगपारिजाते उक्तं ॥ ततश्चाचमनात्प्रा
क् वामभागे गंडूषान् क्षिपेत् ॥ तदुक्तमाचारदीपे ॥ मूत्रे पुरीषे भुक्तान्ते रेतःप्रस्रवणे तथा ॥ च
तुरष्टद्विदश प्रोक्तं गंडूषैः शुध्यते क्रमात् ॥ पुरतः सर्वदेवाश्च दक्षिणे पितरस्तथा ॥ ऋषयः पृष्ठ
तः सर्वे वामे गंडूषमुत्सृजेदिति ॥ ॥ इति शौचविधिः ॥ ॥ अथाचमनविधिः ॥ छ ॥ यो
गीश्वरः ॥ अन्तर्जानुः शुचौ देश उपविष्ट उदङ्मुखः ॥ प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृ रामः
शेत् ॥ कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रं करस्य च ॥ प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ४

करमध्येऽग्नितीर्थं । तेन च प्रतिग्रहं कुर्यात् ॥ दक्षिणहस्तमध्ये ब्राह्मणस्याग्नेयं तीर्थमाग्नेयेन
प्रतिगृह्णीयादिति वसिष्ठोक्तेः ॥ संहतांगुलिना तोयं गृहीत्वा दक्षिणेन तु ॥ मुक्तांगुष्ठकनिष्ठेन तु शे
षेणाचमनं चरेत् ॥ अत्रैवमितिकर्तव्यता ॥ आसने प्राङ्मुख उदङ्मुखो वोपविश्य प्रक्षालितहस्तो
फेनबुद्बुदरहितमनुष्णमुदकं संहतांगुलिना दक्षिणकरेणादायांगुष्ठकनिष्ठिके मुक्त्वा शेषवीक्षि
तं ब्रह्मतीर्थेन प्राजापत्येन दैवेन वा त्रिश्चतुर्वा पिबेत् ॥ न पैत्रेण ॥ ततः त्रिः प्राश्यापो द्विरुन्मृ
ज्य मुखमेतानुपस्पृशेदित्यादिवचनात् सांगुष्ठहस्तौ प्रक्षाल्योष्ठावंतः संकोच्य संहतांगुष्ठमू
लेनालोमकेन मुखं द्विः प्रमृज्य ततो हस्तौ प्रक्षाल्य संहतांगुलीभिर्मुखं सकृदवमृज्य ह
स्तौ प्रक्षाल्य पादौ शिरश्चाभ्युक्ष्य तथा ॥ ततः संहताभिस्तिसृभिरंगुलिभिरास्यमलोमक
प्रदेशे स्पृष्ट्वा हस्तौ प्रक्षाल्यांगुष्ठप्रदेशिनीभ्यां घ्राणं स्पृष्ट्वांगुष्ठानामिकाभ्यां चक्षुषी श्रोत्रे
च स्पृशेत् ॥ अंगुष्ठकनिष्ठिकाभ्यां नाभिं तलेन हृदयं ॥ सर्वांगुलीभिः शिरः । सर्वांगुलीभि
र्बाहुमूले स्पृशेत् ॥ सर्वत्र मध्ये हस्ताभ्यामपः स्पृशेत् । इदमुक्ताचमनं अत्राशक्तौ तु ॥

Indira Gandhi National
Centre for the Arts

आह्निक० ५

त्रिः पीत्वा हस्तौ प्रक्षाल्य मुखं प्रमृज्य खान्युपस्पृशेत्॥ अत्रापराजितो॥ त्रिः पीत्वा हस्तौ प्रक्षाल्य
श्रोत्रं स्पृशेत्॥ अथ पैठीनसिनाचमनं॥ संग्रहे॥ केशवादित्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ॥ द्वाभ्या
मोष्ठौ च संमृज्य द्वाभ्यामुन्मार्जयेत्ततः॥ तथाल्येकेन मूर्धानं ततः संकर्षणादिभिः॥ ऊर्ध्वंच नासा
क्षिकर्णौ नाभ्यां स्कंधकान्स्पृशेत्॥ एवमाचमनं कृत्वा साक्षान्नारायणो भवेदिति॥ आचमनध
र्माः॥ अत्रिः॥ ताम्रपात्रस्थितैर्नैव पिबेत्तथा तोयाशयस्थितैः॥ कुर्वीताचमनं विप्रस्ततः स्थानि समा
लभेत्॥ तदलाभे तु कुर्वीत पात्रमात्रोदकेन च॥ तथा॥ यावन्नोपस्पृशेद्भूमौ यावद्भूमेर्न न स्पृशे
त्॥ वामे हि हृदेशात् द्विसावरुणा स्थिरपोथ्रुः॥ वर्जनीसर्वदाप्यस्मात्तस्माद्धामेन संस्पृशेत्॥ अङ्गुहैते
स्कनाचामेन्नैकपाणिनाहृतेरपि॥ तथैवाद्यतहस्तेन नापदिश्ना नहस्तनः॥ अव्रतोऽनुपनीतः॥
स्नानमाचमनं होमं भोजनं देवतार्चनं प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्पणं॥ आसनारू
ढपादस्तु जान्वोर्वा जंघयोस्तथा॥ कृतावसक्थिको यश्च प्रौढपादः स उच्यते॥ इति हारीतः रामः
॥ मनुः॥ कांस्येनायसपात्रेण त्रपुसीसकपित्तलैः॥ आचांतः शतकृत्वोपि न कदाचन ५

शुध्यति॥ आर्द्रवासा जलांतस्थः अधस्तादोबहिःस्थितः॥ आलभेद्भूपरीतस्थो दक्षे विलम्बवापु
यान्॥ पादशेषं पीतशेषं शेषं च यज्जलं॥ तज्जलं रुधिरैस्तुल्यं पयोग्निकरांविना॥ पृथग्निव
रणमप्पसंभवेदृष्टं॥ उदकपरिमाणमाह योगीश्वरः॥ छा॥ हृत्कंठतालुगाभिस्तु यथासंख्यं द्विजातयः
शुध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरंततः॥ अंततः अंतेन तालुना स्पृष्टाभिरित्यर्थः॥ अथ श्रौताचम
नं॥ पाराशरः॥ देव्याः पादैस्त्रिभिः पीत्वा अविंगैर्नवधा स्पृशेत्॥ पुनर्व्याहृतिगायत्र्या शिरोमंत्रे
ण हृदं स्पृशेदिति॥ अलिंगकैरापोहिष्ठेत्यादिभिस्त्रिभिः प्रतिपादं॥ यः करोति प्रयत्नेन श्रौतमाच
मनं द्विजः॥ अशुद्धात्मापि पापिष्ठः स पूतो नात्र संशयः॥ इति प्रकारांतरेणापि॥ आश्वलायनः
॥ दक्षिण उपवीयोपविश्य हस्तावंतर्जान्वा त्रिराचामेत् द्विः परिमृज्य सकृदुपस्पृश्य खान्यद्भिश्चक्षुषी
नासिके श्रोत्रे हृदयमालभ्य सव्यपाणिं पादौ प्रोक्षति॥ यद्विरश्वरवी नासिके श्रोत्रे हृदयमालभे
नेतेनाचवीतीरसो ब्राह्मणानीतिहासपुराणानि गाथा नाराशंसीः प्रीणातीति॥ संध्यादौ ब्र
ह्मयज्ञे च होमे देवार्चने तथा॥ श्रौतमेव द्विजैः कार्यमिति बौधायनोऽब्रवीत्॥ पौराणमथवास्मा
र्त्तं श्रौतमाचमनं तथा॥ तत्कर्मणि कुर्वीत यथेष्टं वा विधीयते॥ अथाचमननिमित्तानि॥ हो

Indira Gandhi National
Centre for the Arts

आह्नि॰
६

रीतः॥ सुप्त्वा भुक्त्वा क्षुतोच्छिष्टाभिभाषणे मूत्रपुरीषोत्सर्गदर्शने देवताभिगमने कामस्याचामेत्॥ यमः
॥ उत्तीर्योदकमाचामेदवतीर्य तथैव चेति॥ बृहस्पतिः अधोवायुसमुत्सर्गे आक्रंदे क्रोधसंभवे॥ मा
र्जारमूषकस्पर्शे प्रहासेऽनृतभाषणे॥ निमित्तेष्वेषु सर्वेषु कर्म कुर्वन्नुपस्पृशेत्॥ आपस्तंबोपि॥
विप्रो विप्रेण संस्पृष्ट उच्छिष्टेन कदाचन॥ आचम्यैव तु शुद्धः स्यादापस्तंबोब्रवीन्मुनिः॥ मनुः॥
उच्छिष्टेन च संस्पृष्टो द्रव्यहस्तः कथंचन॥ अनिधायैव तद्द्रव्यमाचांतः शुचितामियात्॥ आचा
मेद्वर्णानि संभुक्त्वा तांबूलचर्वणं॥ ओष्ठौ विलोमकौ स्पृष्ट्वा वासो विपरिधाय चेति॥
अथाहुराचमननिमित्तानि॥ याज्ञवल्क्यः॥ स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे॥ आ
चांतः पुनराचामेद्वासो विपरिधाय च॥ आचारदीपे यमः भोजने हवने दाने उपहारे च प्रतिग्रहे
॥ संध्यात्रये च पाने च सुखेषु आह्निकाचमेत्॥ उदकाभावे सामर्थ्ये च दक्षिणं कर्णं स्पृशेत्॥
तदाह बृहस्पतिः॥ निमित्तेष्वेषु सर्वेषु दक्षिणं श्रवणं स्पृशेत्॥ आदित्यो वसवो रुद्रा वायुरग्नि
श्च धर्मराट्॥ विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठंति देवता इति॥ आचमनप्रसंगात्सपवित्रा
चमने विशेषः कथ्यते॥ मार्कंडेयः॥ सपवित्रेण हस्तेन कुर्यादाचमनक्रियां॥ नोच्छिष्टं तत्स

राम:
६

वित्रं तु भुक्त्वोच्छिष्टं तु वर्जयेत्॥ सपवित्रस्तु दक्षिणं हस्तमस्य ज्ञेयं॥ सव्ये तु त्रिभ्रमं त्रिकुशाधार्याः॥
तथाह कात्यायनः॥ सव्ये पाणौ कुशान्कृत्वा दक्षिणे सपवित्रकः इति गोभिलः॥ उभयत्र स्थिते
र्दर्भैः समाचमति यो द्विजः॥ सोमपानफलं तस्य भुक्त्वा यज्ञफलं लभेदिति॥ हारीतोत्र विशे
षमाह॥ सव्यापसव्यौ कुर्वीत सपवित्रौ करौ बुधः॥ ग्रंथिर्यस्य पवित्रस्य न तेनाचमनं चरेदिति॥
तथा प्रथमं लंघयेत्सर्वेपि तीर्थं न लंघयेत्॥ द्वयोस्तु पर्वणोर्मध्ये पवित्रं विज्ञेयं पवित्रं यत्र कुत्र
चित्तद्धारयेद्बुधः॥ तल्लक्षणमाह कात्यायनः॥ ॥ अनंतर्गर्भिणं साग्रं कौशं द्विदल
मेव च॥ प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्र चित्॥ ॥॥ हारीतः॥ स्नाने दाने जपे होमे स्वा
ध्याये पितृतर्पणे॥ अशून्यं तु करं कुर्यात्सुवर्णरजतैः कुशैः॥ चंद्रिकायां यमः॥ कुरकंद
शिखायां च कर्णे यो हमयोपि॥ पवित्रधारकाय अनसपापेन लिप्यत इति॥ अनंतर्गर्भिणं
मिसृक्तं पवित्रं संभवे मनुः॥ हौदर्भौ दक्षिणे हस्ते सव्ये त्रीन्नासने सकृत्॥ उपवीते शिखा
यां च पदे यो सकृत्सकृत्॥ इति॥ अत्र प्रसंगात्कुशग्रहणविधिः॥ अथ धाविभक्त्या स्नाने

Indira Gandhi National
Centre for the Arts

तीयेभागेश्रुविमृत्वापूर्वाग्रमुखः सन्तोकारेणकुशान्स्पृशेत् ॥ विरंचिना सहोत्पन्नः परमेष्ठीनि
सर्गजः ॥ नुदसर्वाणिपापानि ममस्वस्तिकरोभवेतिमंत्रमुक्त्वा दर्भान्सकृच्छिलासमुद्धरेत् ॥ दर्भा
न्स्वयमाहरेत् ॥ संग्रहे ॥ समित्सुप्पकुशादीनि स्वेच्छिलासमुद्धरेत् ॥ दर्भान्स्वयमाहरेत् ॥ संग्रहे ॥ समि
त्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरेत् ॥ शूद्राहृतैः क्रयक्रीतैः कर्मकुर्वन्व्रजत्यधः ॥ अत्रविशेष
माहकात्यायनः ॥ मासेनभस्यामावास्यातस्यांदर्भोच्चयोमतः ॥ अयातयामास्तेदर्भानियोज्याःस्यु
पुनःपुनः ॥ शंखः ॥ दर्भाःकृष्णाजिनंमंत्राब्राह्मणागौर्हुताशनः ॥ अयातयामान्येतानि योज्या
निचपुनःपुनः ॥ वर्ज्यमाहहारीतः ॥ पथिदर्भाश्चितौदर्भायेदर्भायज्ञभूमिषु ॥ संस्तरणासनपि
ण्डेषुषट्कुशान्परिवर्जयेत् ॥ ब्रह्मयज्ञेचयेदर्भायेदर्भाःपितृतर्पणे ॥ हतामूत्रपुरीषाभ्यांतेषांत्या
गोविधीयते ॥ सुमंतुः ॥ कुशाःकाशायवादूर्वाउशीराश्चसकुंदकाः ॥ गोधूमाव्रीहयोमौंजाःदशदर्भाःसबल्वजाः ॥ गोवालमुंजौकुंदाश्चपूर्व
भावेपरःपरः ॥ संग्रहेपिपवित्रलक्षणमाहप्रचेताः ॥ द्विमूलमेकतःकुर्याद्द्वयोरग्रंतथैकतः ॥ वल्यं
द्व्यंगुलंप्रोक्तंग्रंथिरेकांगुलाभवेत् ॥ चतुरंगुलमग्रंस्यात्पवित्रस्येतिलक्षणं ॥ चक्रायुधयथा वि
ष्णोर्हरस्यापित्रिशूलकं ॥ विप्रायुधंपवित्रंस्यादेवंविप्रकरेकुशइति ॥ इत्याचमनविधिः ॥ ॥ अ

रामः ५

थदंतधावनं ॥ दक्षः ॥ मुखेपर्युषितेनित्यंभवत्यप्रयतोनरः ॥ तदार्द्रकाष्ठंशुष्कंवाभक्षयेद्दंतधा
वनं ॥ विष्णुः ॥ कंटकिक्षीरवृक्षोत्थंद्वादशांगुलमव्रणं ॥ कनिष्ठिकाग्रवत्स्थूलंपर्वार्द्धकृतकूर्चकं
॥ अत्रविशेष
॥ जंबूदुंबरचूताश्वकदंबोललोध्रचंपकाः ॥ बदरीतिंदुमाश्चैतेप्रोक्तादंतप्रधावने ॥ अत्रविशेष
माहशातातपः ॥ उदुंबरेणवाक्सिद्धिर्बदर्यामधुरस्वरः ॥ कदंबेनमहालक्ष्मीःसमृद्ध्यारोग्य
मेवच ॥ अपामार्गेसर्वसिद्धिर्बंधूकेचदृढा
मतिः ॥ आरोग्यंकर्णिकारेणकरंजेनरणेजयः ॥ गर्गः ॥ दशांगुलंतुविप्राणांक्षत्रियाणां
नवांगुलं ॥ अष्टांगुलंतुवैश्यानांशूद्राणांसप्तसंमितं ॥ चतुरंगुलमानेननारीणांविधि
रुच्यते ॥ आश्वलायनस्त्वाह ॥ वितस्तिमात्रमुद्दिष्टंदंतकाष्ठंद्विजन्मनां ॥ स्त्रीशूद्रयोस्तद
र्द्धंस्यान्नातिशुष्कंनदंतुमदिति ॥ तथाचपरिमाणेविकल्पः ॥ काष्ठग्रहणमंत्रस्तु ॥ आयु
र्बलंयशोवर्चःप्रजाःपशुवसूनिच ॥ ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पत इतिविष्णुः
॥ भक्षणमंत्रस्तु ॥ अन्नाद्यायव्यूहध्वंसोमोराजायमागमत् ॥ समेमुखंप्रमार्क्ष्यतेयश

Indira Gandhi National
Centre for the Arts

आकं०

साचभगेनच॥इतिकात्यायनोक्तः॥ततस्तेनकाष्ठेनजिह्वासुल्लिख्यकाष्ठंप्रक्षाल्यनैर्ऋ
त्यांदिशिउत्सृजेत॥अत्रवर्ज्यकाष्ठादि॥मार्कंडेयः॥ ॥कोविदारशमीलश्लेष्मातकुवि
भीतकान्॥वर्जयेद्दंतकाष्ठेषुगुग्गुलंक्रमुकंतथा॥स्मृत्यर्थसारे॥आसनेशयनेयाने
पादुकेदंतधावने॥पालाशमश्वत्थकौवर्ज्यौसर्वकर्मसु॥अलाभेदंतकाष्ठानांनिषि
द्धायांतिथौतथा॥अपांद्वादशगंडूषैर्विदध्याद्दंतधावनं॥यद्वातृणपर्णोदकेनमध्यमा
नामिकांगुष्ठानामन्यतमेनदंतान्धावयेत॥अथनिषिद्धतिथयः॥चतुर्दश्यष्टमीदर्शपू
र्णिमासंक्रमेषुच॥नंदासुचनवम्यांचदंतकाष्ठंविवर्जयेत॥उपवासेचविप्रेन्द्रोचमैथुने
दंतधावने॥अभ्यंगेषुदधिस्नानेतिथिस्तत्कालिकीस्मृतेति॥तथा॥श्राद्धेयज्ञेचनियमेन
प्राप्रोषितभर्तृका॥रजस्वलासूतिकाचवर्जयेद्दंतधावनं॥अत्रापवादः॥संग्रहे॥रजस्व
लाचतुर्थेन्हिसूतिकादशमेहनि॥ ॥मरीचिः॥नान्यादर्जा[illegible]सकासज्वरादिभिः
॥पुरोदयाद्द्वेस्त्रघ्नान्नोदितेस्नानमितेरवौ॥तीर्थप्राप्तौवचनादन्यदपिभवति॥यमः॥श्री

रामः

द्धेजन्मदिनेचैवविवाहेऽजीर्णदोषिते॥व्रतेचैवोपवासेचवर्जयेद्दंतधावनं॥इतिदंतधावनविधिः
॥ ॥अथकेशप्रसाधनादिमांगल्यविधिः॥ ॥स्कांदे॥स्नानंकृत्वाततःकुर्यात्सुमनाःकेश
प्रसाधनं॥आदर्शांजनमांगल्यंदूर्वाद्यालंभनानिच॥आह्नेपि॥स्वमात्मानंघृतेपश्येद्य
दीच्छेच्चिरजीवितं॥प्रातःस्नानंततःकुर्यात्संक्षेपेणयथोदितं॥संध्यावापितर्पणकर्मादिगम्
[illegible]रति॥अथयज्ञोपवीतविधिः॥तत्रयज्ञोपवीतंसदाधार्यमितिकात्यायनः॥
मनुरपि॥सदोपवीतिनाभाव्यंसदाबद्धशिखेनच॥विशिखोव्युपवीतश्चयत्क
रोतितदकृतं॥भृगुः॥त्रिवृदूर्ध्ववृतंकार्यंतंतुत्रयमधोवृतं॥त्रिवृतंचोपवीतंस्यात्तस्यैको
ग्रंथिरिष्यते॥ऊर्ध्ववृतंदक्षिणंकरमर्दि[illegible]तावलिनामिसर्पः॥वसिष्ठः॥नाभेरूर्ध्वमनायुष्य
मधोनाभेस्तपःक्षयः॥तस्मान्नाभिसमंकुर्यादुपवीतंविचक्षणः॥इतिकात्यायनस्मृ॥एव
पृष्ठवंशेचनाभ्यांचधृतंयद्विंदतेकटिं॥तद्धार्यमुपवीतंस्यान्नातिलंबंनचोच्छ्रितमिति॥अत्र
विशेषमाहसएव॥कार्यासमुपवीतंस्याद्विप्रस्योर्ध्ववृतंत्रिवृत्॥शणसूत्रमयंराज्ञोवैश्यस्यावि

Indira Gandhi National
Centre for the Arts

आ०कृ०
९

कमयअन्वूति॥ ॥उक्तंभापेदेवलः॥ कार्पासंक्षौमगोवालशणवल्कतृणादिकं॥ सदासं
भवतोधार्यमुपवीतेद्विजातिभिरिति॥ क्षुमा अतसी॥ वल्लवलंस्वद्वल्क॥ तज्जनमीसर्पः॥
असंभवतइतिनिमिलसत्यमादेशः॥ मुख्यासंभवइसर्पः॥ तत्कारस॥ शुचौदेशेशुचिः सूत्रं
संहतांगुलिमूलके॥ आवेष्ट्यषण्णवस्यान त्रिगुणीकृत्यसत्नइत्यादिनोक्तः॥ आचूप्रदी
पे॥ यज्ञोपवीतंकुर्वीतसूत्रेणनवतंतवमिति॥ तंतुदेवतास्तु॥ ॐकारस्त्वाग्निनागोचसो
मःपितृप्रजापती॥ वायुःसूर्यःसर्वदेवास्तस्माहुस्तंतुदेवताः॥ भृगुः॥ यज्ञोपवीतेद्वेधार्येश्रौते
स्मार्त्तेचकर्मणि॥ तस्याभावेतृतीयंस्यादेकंचप्रथमाश्रमी॥ तथा॥ उपवीतंवटोरेकंद्वेतथे
तरयोःस्मृते॥ इतिस्मृत्यंतरेपि॥ ब्रह्मचारिणएकंतुस्नातस्यतुतीनद्वयं॥ तृतीयंचोत्तरी
यंस्याद्वस्त्राभावेतृतीयकं॥ वस्त्राभावेतृतीयकमितिपुनर्वचनंतु॥ उपात्तेतुप्रतिनिधौमुख्यो
र्थेलभ्यतेपदि॥ तत्रमुख्यमनादृत्यगौणेनैवसमाप्यतइतिन्यायप्राप्तबाधार्थं॥ तथाचोत्तरीया
भावदशायामेवतस्यानुकल्पत्वंतल्लाभेतुपूर्वबद्धंतेयज्ञोपवीतमेवतेनोत्तरीयमपितदाधार्य राम:
९

मेवेत्याशयः॥ तथा॥ धारयेन्नित्यमेतानिनवसंख्यानिवैद्विजः॥ तत्परिधानंयज्ञोपवीतंतपर
ममितिमंत्रेणकार्यं॥ अत्रएवंपक्ष्याबृचमतं॥ मलापकर्षणस्नानेगाचाम्यंगेतमेवच॥
ब्रह्मसूत्रेणत्कुर्यादन्यथानरकंव्रजेदितिस्मृतेः॥ उक्तादन्यत्रकदापिनोत्तारयेत॥ पृथु
त्तारयेत्तदामंत्रपूर्वकमन्यत्परिदध्यात॥ मंत्रन्यस्तोपवीतेपन्नोहृत्सेनकदाचन॥ मोहाद्विनष्ट
उद्धृत्यपुनर्मंत्रेणधारयेत॥ इतिगालवोक्तेः एवमप्यधस्तमपिनदध्यात॥ तदुक्तंसंग्रहे॥ उ
पानहौचवासश्चधृतमन्यैर्नधारयेत॥ उपवीतमलंकारंस्रजंकरकमेवचेति॥ मेखलाम
जिनंदंडमुपवीतंकमंडलुं॥ अप्सुप्रास्यविनष्टानिधृत्वान्यानिमंत्रवदितितथादेवलः॥ सा
वित्र्यादशकृत्वोद्भिर्मंत्रिताभिस्तदुक्षयेत॥ विछिन्नेत्वाप्यधोपानमुक्तापिनिर्मितमुत्सृजे
त॥ इतिनत्स्त्रिनिवृत्तिः॥ इतियज्ञोपवीतविधिः॥ अथशिखाबंधः॥ ॥माधवा॥ स्नानमेव
रंचगायत्र्यांनिबध्नीयाच्छिखांततः॥ पुनराचम्यहृदयंबाहूस्कंधौचसंस्पृशेत॥ तत्रबंधनंशिरोम
ध्यदक्षिणभागेकार्यं॥ गायत्र्यातुशिखांबध्वानैऋत्यांब्रह्मरंध्रतः॥ पश्चात्तुजूटिकांबध्वात

Indira Gandhi National
Centre for the Arts

आक० १०

तः कर्मसमाचरेदिति॥ अथ प्राणायामः॥ बृहस्पतिः॥ बद्धासनं नियम्यस्वं संस्मृत्य संत्वाचार्यादिकं त
तुः॥ ससंमीलितदृष्टौ मौनी प्राणायाममभ्यसेत्॥ प्रणवव्याहृतियुतां सावित्रीं शिरसा सह॥ त्रि
र्जपेदायतप्राणः प्राणायामः स उच्यते॥ योगयाज्ञवल्क्यः॥ ॥कुंभकः पूरकौ रेचः प्राणायामस्त्रि
लक्षणः॥ पूरकः पूरणं वायोः कुंभकः स्थापनं क्वचित्॥ वाहिर्निःसरणं तस्य रेचकः परिकी
र्तितः॥ दक्षिणे रेचयेद्वायुं वामेनापूरितोदरः॥ कुंभेन धारयेन्नित्यं प्राणायामं विदुर्बुधाः॥ अंगु
ष्ठेन पुटं नासो दक्षिणं नासामादद्ये च वामं प्राणस्य संग्रहैः॥ अंगुष्ठतर्जनीभ्यां तु क्रमेणेदं समाचरे
यतः॥ अंगुष्ठानामिकाभ्यां पुनः। कनिष्ठानामिकाभ्यां प्राणानुग्राह्य स्पर्शयेत् सर्वैः पर्वभिः॥ शंखोत्र
विशेषमाह॥ छ॥ दक्षिणे रेचकं कुर्यात् वामेनापूर्य चोदरं॥ कुंभकेन जपेत् कुर्यात् प्राणायामस्य
लक्षणमिति॥ ॥सप्तव्याहृतयः प्रोक्ता प्राणायामेषु नित्यशः॥ भूर्भुवः स्वर्महर्जनस्त
पः सत्यं तथैव च॥ प्रत्योंकारसमायुक्तं तथा तत्सवितुः परं॥ ॐ आपो ज्योतीरसोमृतं ब्रह्म
त्रयो जपेत्॥ त्रिरावर्त्तनयोगात्तु प्राणायामस्तु शब्दितः॥ अत्र विशेषः स्मृत्यंतरे॥ ॐ राम: १०

कारस्य ऋषिर्ब्रह्मा देवोग्निस्तु प्रकल्प्यते॥ गायत्री च भवेच्छंदो विनियोगः सर्वकर्मसु॥ त्रिमात्रस्य
प्रयोक्तव्य आरंभे सर्वकर्मणां॥ व्याहृतीनां तु सर्वासामार्षं चैव प्रजापतेः॥ गायत्र्युष्णिगनुष्टुप्
बृहती त्रिष्टुप् चैव च॥ पंक्तिश्च जगती चैव छंदांस्येतानि सप्तधा॥ अग्निर्वायुस्तथा सूर्यो बृहस्प
तिर्वरुणपतिः॥ इंद्रश्च विश्वेदेवाश्च देवताः समुदाहृताः॥ प्राणस्य यमने चैव विनियोगउदा
हृतः॥ सविता देवता यस्या मुखमग्निस्त्रयात्मकं॥ विश्वामित्र ऋषिश्छंदो गायत्री सावित्रीप्यते
॥ जपहोमोपनयने विनियोगो विधीयते॥ ॐ आपो ज्योतीरसेवमंत्रो वैतैतिरीयके॥ तस्य प्रजा
पतेरार्षं छंदो हीनं यजुर्यतः॥ ब्रह्माग्निवायुसूर्याश्च देवताः समुदाहृताः॥ प्राणस्य यमने चैव
विनियोगः प्रकीर्तितः इति॥ ॥व्यासः॥ निसे देवार्चने होमे संध्यायां श्राद्धकर्मणि॥ स्नाने दा
ने तथा ध्याने प्राणायामास्त्रयस्त्रयः॥ आचारप्रदीपेपि॥ द्वौ द्वौ प्रातश्च मध्याह्ने त्रिस्त्रिः सं
ध्यात्रये चैते॥ वैश्वदेवे भोजनांते प्राणायामस्तु षोडश॥ तत्फलमाह याज्ञवल्क्यः॥ छ॥ य
द्विप्रकुरुते पापं मनसा कर्मणा गिरा रात्रिकालसंध्याकरणात् प्राणायामैर्व्यपोहति॥ मनुः॥

मध्याह्ने स्नाननिषेधस्तात्पर्यकं न समयविषयो नतु पारेभ विक स्या तस्मिन्तस्य निषेधात्

दह्यंते ध्मायमानानां धातूनां हि यथा मलाः॥ तथेंद्रियाणां दह्यंते दोषाः प्राणस्संयमादिति

आ॰क॰ प्राणायामविधिः॥ ॥अथ प्रातःस्नानं॥ योगयाज्ञवल्क्यः॥ प्रातर्मध्याह्नयोः स्नानं वानप्रस्थ

११ गृहस्थयोः॥ यतेस्त्रिषवणं प्रोक्तं सकृत्तु ब्रह्मचारिणः॥ ब्रह्मचारिणः सकृत्स्नानमशक्त

विषयं॥ स्नायात्प्रातश्च मध्याह्ने ब्रह्मचारी तथा गृहीति विज्ञमज्ञोक्तेः॥ मार्कंडेयः॥ अस्ना

तस्य क्रियाः सर्वा भवंतीहाफलायतः॥ प्रातः समाचरेत्स्नानं तस्मान्नित्यमिति स्मृतं॥ प्रातः

स्नानगुणा उक्ताः स्कांदे॥ गुणा दश स्नानपरस्य नित्यं रूपं च तेजश्च बलं च शौर्यं॥ आयु

ष्यमारोग्यमलोलुपत्वं दुःस्वप्ननाशश्च तपश्च मेधा इति॥ दक्षः॥ असंतमलिनः कायो नव

छिद्रसमन्वितः॥ स्रवत्येव दिवारात्रौ प्रातःस्नानं विशोधनं॥ अशक्तस्तु॥ सप्ताहं प्रातर

स्नायी द्विजः शूद्रत्वमाप्नुयात्॥ तस्माच्छूद्रत्वभूयार्थं रविवारे समाचरेत्॥ कात्यायनः स्मः

॥ ॥यथाह नित्यान्प्रातर्नित्यं स्नायाद्दनातुरः॥ दंतान्प्रक्षाल्य नद्यादौ गेहे चेत्तदमंत्र ११

वत्॥ नात्र सर्वथा मंत्रनिषेधः॥ किंतु मंत्रबाहुल्यनिषेधः॥ गृहेपि च द्विजातीनां मंत्रवत्स्ना

नमिष्यते॥ विधिलोपं न ते कुर्युः सामर्थ्ये सति कर्हिचिदिति जैमिनिस्मृतेः॥ अशक्तौ होमकाल

स्यबहुलात्तलीनकर्मणः॥ प्रातर्नित्यनुपात्स्नाने होमलोपो विगर्हितः इति कात्यायनोक्तिलिंगाच्च॥

वच्छिष्टः॥ प्रातःसंक्षेपतः स्नानं शौचार्थं तु न दृष्यते। मंत्रैस्सूक्तविधिर्निष्पाद्यं मध्याह्ने तु सवि

स्तरं॥ अत्र प्रातःशब्देनोदयात्प्राक्तनाश्च तस्रो नाड्य उच्यंते॥ अरुणरविकिरणग्रस्तां प्रा

चीमवलोक्य स्नायादिति बौधायनोक्तेः॥ व्यासः॥ स्नानं तु द्विविधं प्रोक्तं मुख्यगौणप्रभेद

तः॥ तयोस्तु वारुणं मुख्यं तत्पुनः षड्विधमेव तत्॥ जलनिष्पाद्यं वारुणं॥ नित्यं नैमित्तिकं

काम्यं क्रियांगं मलकर्षणं॥ क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्तितं॥ ॥तत्र प्रातः

स्नानं नित्यं॥ प्रातः समाचरेत्स्नानं तस्मान्नित्यमिति स्मृतमिति मार्कंडेयोक्तः॥ चंद्रसूर्योपरा

गादौ स्पृष्टकटाद्यघस्नानं नैमित्तिकं॥ भास्वत्प्रयस्माजारेखंड ऋ खानस्फरान्॥ अमेध्या

नि च संस्पृश्य पतवासा जलमाविश्य दिस्पाद्यपि नैमित्तिकमेव॥ पुष्येर्के जन्मनक्षत्रे व्यतीपाते

चवैधृतौ॥ अमामायां च नदीस्नानं पुनात्यासप्तमं कुलमित्याद्युक्तं स्नानं काम्यं॥ धर्मक्रिया

Indira Gandhi National
Centre for the Arts

कर्त्तव्यः सर्वस्नानं तत्क्रियांगं ॥ मलापकर्षणं नाम स्नानमभ्यंगपूर्वकं ॥ मलापकर्षणं चैवम्
आ॰कं॰ तिस्तत्रनाम्यथेसाधुर्के मलापकर्षणं स्नानं ॥ प्रसंगादभ्यंगे निषेधनियमः ॥ गर्गः ॥ पंचद
श्यां चतुर्दश्यामष्टम्यां रविसंक्रमे ॥ द्वादश्यां सप्तमीषष्ठ्योस्तैलस्पर्शं विवर्जयेत् ॥ तथा ॥ ष
१२ ष्ठ्यष्टमी पंचदशी यच्च शुक्लचतुर्दशी ॥ अत्र संनिहितं पापं तैले मांसे क्षुरे भगे ॥ अत्र यथा
क्रमं द्रष्टव्यं ॥ प्रचेताः ॥ ॥ सर्षपं गंधतैलं च यत्तैलं पुष्पवासितं ॥ अन्यद्रव्ययुतं तैलं न
दुष्यति कदाचन ॥ तैलाभ्यंगनिषेधे तु तिलतैलं निषिध्यते ॥ अभ्यंगस्य निषेधे तु सार्षपा
देरपीष्यते ॥ व्यासः ॥ नवादर्शे च सप्तम्यां संक्रांतौ रविवासरे ॥ चंद्रसूर्योपरागे च स्नानमाम
लकैः स्मृतं ॥ इति ॥ मनुतीर्थादिषु स्नानं क्रियास्नानं प्रकीर्तितं ॥ स्नानमात्राद्यत्र फलं तत्क्रि
यास्नानमिरितं ॥ अथ गौणस्नानं विविच्यते ॥ योगियाज्ञवल्क्यः ॥ मांत्रं भौमं तथाग्नेयं वा एमः
यव्यं दिव्यमेव च ॥ वारुणं मानसं चैव सप्त स्नानान्यनुक्रमात् ॥ अत्र गौणमध्ये मुख्यस्य वारुणा १२
स्योपादानं दृष्टांतार्थं ॥ यथाशामर्थ्ये सति वारुणं मुख्यं ॥ एवमापदीमानीत्यर्थः ॥ जाबालिरपि

गात्रासामर्थ्ये शरीरस्य देशकालाद्यपेक्षया ॥ मंत्रस्नानादिकः सप्तके विदिष्टं तिसरश्च ॥ आपो
हिष्ठादिभिर्मांत्रं मृदालंभश्च पार्थिवं ॥ आग्नेयं भस्मना स्नानं वायव्यं रजसा गवां ॥ आग्नेः सातप
वर्षाभिः स्नानं तद्दिव्यमुच्यते ॥ वारुणं चावगाहश्च मानसं विष्णुचिंतनं ॥ सशिरस्कावगाहाश
क्तौ जाबालेः ॥ अशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्मिणां ॥ आर्द्रेण वाससा वापि मार्जनं
कापिलं विदुः ॥ नचाभिमंत्रितैस्तोयैः प्रोक्षयन्मूर्ध्नि सर्वतः ॥ अनुकल्पमिदं स्नानं सर्वपा
पहरं स्मृतं ॥ याज्ञवल्क्यः ॥ शन्नआपस्तु द्रुपदा आपोहिष्ठाघमर्षणं ॥ एतैस्तु पंचभिर्म
त्रैर्मंत्रस्नानं तदुच्यत इति ॥ अत्र मंत्राणां समुच्चयो विकल्पो वा शक्त्याद्यपेक्षया योज्यः ॥ स्ना
नं चैकेनानेकेन वा वाससा कार्यं ॥ एकेन वाससा स्नायाद्व्याम नियमः स्मृतः ॥ बहुभि
श्चाप्रनोषेध्यः स्नाने फलमभीप्सतामिति विद्वज्जैः ॥ नैकवासाः क्रियां कुर्यात्स्नानकर्म वि
नाकृ विदितिच ॥ अन्यत्रापि ॥ अस्पृश्यस्पर्शने चैवं वाजोयं ऽत्र जन्मनि ॥ एतत्तु वास
साकार्यमन्यत्रैकेन वाससेति ॥ ॥ तथा ॥ न नग्नो नान्यदीपेन नार्द्रेण न स्वाग्रथितेन न

Indira Gandhi National
Centre for the Arts

विकृतेन च वाससा स्नायादित्याचारतिलके॥ जाबालिः॥ स्रोतसोभिमुखो मज्जेद्यत्रापः प्र
आ॰क॰ वहंति वै॥ स्थावरेषु च सर्वेषु आदित्याभिमुखस्तथा॥ संग्रहेपि॥ स्रोतसोभिमुखः स्नायान्म
१३ जने चाघमर्षणे॥ अन्यत्रार्कमुखो रात्रौ प्राङ्मुखो वोदङ्मुखोपि वा॥ संध्यामुखस्तु संध्या
यां स्नानं कुर्वीत मलनुद इति॥ आपस्तंबः॥ प्रवाहाभिमुखः स्नानं ऋक्सामाथर्ववेदिनां॥
आदित्याभिमुखं स्नानं यजुषस्य सदैव हि॥ अत एव सूर्याभिमुखो निमज्जेदिति वाजसनेयि
स्नानसूत्रं॥ तदपि स्थावरविषयमिति केचित्॥ निमज्जनमात्रं सूर्याभिमुखं न तु मंत्र॥ स्नानं
नु प्रवाहाभिमुखं न तु समंत्रं॥ स्नानं नु प्रवाहाभिमुखं न तु समंत्रकमिति स्मृतेः॥ आपस्तंबानामपि स्रो
याभिमुखं स्नानं॥ तथा च धर्मप्रश्ने द्वितीयाध्याये॥ शनैरप्सोऽभ्यवेयादनभिघ्नन्नभिमुख आ
दित्यमुदकमुपस्पृशेदिति सर्वत्रोदकस्पर्शनविधिरिति॥ पूर्वत्रैव प्रथमाध्याये स्त्रिराव स्म॰
मज्जानमप्सु वर्जयेदस्तमिते च स्नानमिति सशिरःस्नानं निषिद्धं तत्स्वाभ्यक्तविषयमित्युज्ज्वल १३
कादशकृद्वान्॥ यत्तु॥ सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः॥ तासु स्नानं न कुर्वीत कृतं चे

न्निष्फलं भवेदित्य निष्फलं भवेदित्यविवचनं समुद्रगाव्यतिरिक्तक्षुद्रनदीविषयं॥ गंगादिसरि
तः सर्वाः शुभाः सर्वत्र सर्वदेति विशेषोक्तेः॥ अत्र विशेषो वामनपुराणे॥ निषिच्य नीरं कुशपि
ञ्जूलानि पूर्वोत्तराग्राणि शिरःप्रदेशे॥ प्रक्षाल्य पादौ च मुखं च कंठे यज्ञोपवीतं च जलं पिबेत्त्रिः॥
कंठे यज्ञोपवीतं विनाभिसेतद्वचनं कंठान्तोन्नायमिसेतदर्थं॥ तथा च निवीतं कृत्वा प्रक्षालयेदि
त्यर्थः॥ करणमाधारस्येह भानविशेषं विधाय च॥ प्राणायामांस्ततः कृत्वा कालज्ञानं यथा
विधि॥ इति॥ कालज्ञानं अघ ब्रह्मणो द्वितीयपरार्धे इत्यादि॥ उत्तमं तु नदीस्नानं तडागे मध्य
मं स्मृतं॥ कूपे स्नानं तु सामान्यं भांडस्नानं तु नेष्यते॥ अत्रिः॥ स्नानं रजकतीर्थे च भोजनं
गणिकागृहे॥ ये कुर्वंति द्विजा मोहाज्ज्ञेयं तं निरयं परं॥ नमो नारायणायेति सप्तवारं ज
पन्व्रजेत्॥ नाभिमात्रे जले स्थित्वा कृत्वा केशान् द्विधा द्विजः॥ निरुध्य कर्णौ नासां च त्रिःकृ
त्वोन्मज्जनं ततः॥ स्नाने दक्षिणाग्रं कार्या अलकांस्तु प्रयत्नतः॥ सजीवपितृकैश्चैव चाग्रमे
हृमयतः सदा॥ द्विराचम्य विवेकं च कुर्याद्धरिस्मरणं तु॥ अंतर्जले जपेन्मंत्रं त्रिःकृत्वश्वा

Indira Gandhi National
Centre for the Arts

घमर्षणं॥ अघमर्षणांह्न तं च सत्यं चेति सूक्तं॥ द्रुपदां वा तिराहस्त आपो गौरीति वा ऋचं॥
आ०कं० १४ प्राणायामं सशिरस्कं जले तस्त्रिर्जपेत्तथा॥ आवर्तये द्दप्रणवं स्मरेद्वा विष्णुमव्ययमिति
॥ अत्राघमर्षणो व ऋषयः वाजसनेयि विषयाः॥ तत्सूत्रेण तथा विधानात्॥ अथाश्वलायन
स्नानविधिस्तद्गृह्यपरिशिष्टे॥ प्रातः सह गोमयेन कुर्यान्मृदा मध्ये दिने सायंकृष्णाभि
रद्भिनमात स्नानात्प्राक्संध्यामुपासीत प्रातः प्रातरुत्सृष्टं गोमयमंतरिक्षस्थं संग्र घभू
मिष्ठं वोपर्युपरि षष्ठ्यसंसक्तं तीर्थमेसधौतपाणिपादमुख आचम्य सर्व्वोत्कवदां आभु
हरणादि सर्वं कृत्वा द्विराचम्य संपन्नया प्राणाः संकल्प्य गोमयं वीक्षितमादाय सव्ये पाणौ कृत्वा
व्याहृतिभिस्त्रिधा विभज्य दक्षिणं भागं प्रणवेन दिक्षु विमसोत्तरं तीर्थे क्षित्वा मध्यमं मानस्तो
कइत्यभिमंत्र्य गंधद्वारामिति मूर्धादि सर्वांगमालिप्य प्रांजलिर्वरुणं हिरण्यशृंगमिति द्वा
भ्यां प्रसंप्राज्ञे हृदं चेति सूक्तेन प्रार्थ्यापः प्रवृत्तरसे तथा तीर्थमभिमंत्र्य गायत्र्या स्नातो वेदि
राचम्य मार्जयेदेव योयं सर्वाभिरि सप्तभिरापोहिष्ठेति नवभिश्च तीर्थमंभ्रुइंमे मे गंग

इत्यचा त्रिः प्रदक्षिणमालोड्य प्रकाशं एतं मग्नो घमर्षणसूक्तं त्रिरावर्त्य निमज्योन्मज्जा
सुमालोक्य द्वादश कृत्व आलुप्स पाणिभ्यां शंखमुद्रयोदकमादाय मूर्ध्नि मुखे बाहोरूरसि
चात्मानं गायत्र्याभिषिच्य त्वं नो अग्ने वरुणस्य विद्वानिति द्वाभ्यां तरत्समंदीधावतीति सू
क्तेन च पुनः पुनः स्नापयन्मूर्ध्नि चाभिषिंचेन्नहि हीरण्येरक्षाणो अंहसो माकिं चेदं वरु
णा देव्ये जनरव्ये नाजपेत्स्नातोनिमुखः सरित्सु स्नापाद मत्राद्दिसाभिमुख इति॥ पित्राद्यु
द्देशस्नानविधयेहहदान्हिके पैठीनसिः॥ सिद्धतीर्थं प्रतिकृतिं कृत्वा कुशमयीं नरः॥ मज्ज
येन्नु यमुद्दिश्य सोष्टमांशं फलं लभेत॥ पितरं मातरं वापि भ्रातरं श्वशुरं गुरुं॥ यमुद्दिश्य नि
मज्जेत सोष्टमांशं लभेत वै॥ कुशोसि त्वं पवित्रोसि ब्रह्मणा निर्मितः पुरा॥ त्वयि स्नाते स च
स्नातो यस्यैदं ग्रंथिबंधनमिति तत्र मंत्रः॥ मन पित्रादिविषये भृगुः॥ मातरं पितरं वापि
भ्रातरं वा प्रमीतकं॥ यमुद्दिश्य निमज्जेत ह्यष्टमांशं लभेत सः॥ इति॥ एवं स्नात्वा यथालया
मतीर्थे न स्नापान्॥ तदुक्तं स्कांदे काशीखंडे॥ याद्वोदकेनदेवस्य हस्ताकोटिसमन्विताः॥

Indira Gandhi National
Centre for the Arts

पुष्पमेकं तथा ... संतुष्टोपि मन्त्रैर्लभते ... तेषाम् ... सर्वमेधकर्ता सर्वे पापिनः ॥ प्राय श्चित्तं तु

शुद्धंति नात्र संदेहस्तथाद्धं स्तोदकेन च ॥ पद्मसर्पशंहं सं तु पापमाचीर्णं तमवेत ॥ प्राय श्चित्तं तु

नस्येकं शालग्राम शिलाजलं ॥ सस्नातः सर्वतीर्थेषु सर्वेक्रतु षुदीक्षितः ॥ सालग्राम शिला

श्रा.क. तोयेर्यो भिषेकं समाचरेत् ॥ पाद्मे माघमाहात्म्ये ॥ गंगा गोदावरी रेवा नघो मुक्तिप्रदाश्च याः

१५ ॥ निवसंति सतीर्थास्ता शालग्राम शिलाजले ॥ येपिवंतिनरा नित्यं शालग्राम शिलाजलं

॥ पंचगव्य सहस्रैस्तु स्कप्राशितैः किं प्रयोजनमित्यादि ॥ गौतमीयतंत्रे स्नानप्रकरणे ॥ शा

लग्राम शिलातोयं तुलसीदलमिश्रितं ॥ कृत्वा शंखं भ्रामयित्वा निक्षिपेन्निजमस्तके ॥ शा

लग्राम शिलातोयमपीत्वा यस्तु मस्तके ॥ प्रक्षेपणं प्रकुरुते ब्रह्महा स निगद्यते ॥ विष्णु

पादोदकात्कं मूर्ध्नि विप्रपादोदकं पिबेत ॥ विरुद्धमाचरेन्मोहाद् ब्रह्महा स निगद्यते ॥ एपि वा

पानि तीर्थानि तानि तीर्थानि सागरे ॥ ससागराणि तीर्थानि पादे विप्रस्य दक्षिणे ॥ ततः सं राम:

श्चेपतो देवान्मनुष्यांस्तर्पयेत्पितृनिति ॥ अत्र विशेषो वायवीये ॥ अप्सु तेन समाज्ञेयाः पु १५

नः केशविंदवः ॥ सुराविंदुसमास्ते माः एष्टतः केशविंदवः ॥ पिबंति शिरसो देवाः पिबंति

पितरोमुखात् ॥ मध्यतः सर्वगंधर्वास्तस्मात्सर्वजंतवः ॥ तस्मात्कार्यं न मस्येत न श्रं करेण करेण वा

॥ केशान्दक्षिणतः कृत्वा जलमध्ये न तर्पयेत ॥ इति पराशरः ॥ नित्यं नैमित्तिकं काम्यं त्रिविधं

स्नानमुच्यते ॥ तर्पणं तु भवेत्तस्य ह्यंगत्वेन प्रकीर्तितं ॥ सव्येनचोपवीतेन देवतानां च तर्पणं

णं ॥ पितृणामपसव्येन मनुष्याणां निवीतिना ॥ विष्णुः ॥ स्नात्वा द्रव्यात्स्याद्देव पितृतर्पणमं

भस्येव कुर्वीतेति ॥ तर्पणे चाप्सु संकरं कुर्यात ॥ तथाच योगियाज्ञवल्क्यः ॥ अनामिका

धृतं हेमतर्जन्यां रौप्यधारणं ॥ कनिष्ठिकाधृतं खड्गं तत्र स्तर्पणमाचरेदिति ॥ स्नानांगतर्प

णप्रकारस्त्वाश्वलायनगृह्यपरिशिष्टे ॥ अथ साक्षतानाभिरद्भिः प्राङ्मुख उपवीती देवतीर्थे

नव्याहृतिभिः प्रसस्तसमस्ताभिर्ब्रह्मादीदेवान्सकृत्सकृत्तर्पयित्वा ॥ उदङ्मुखो निवीती सयवा

भिरद्भिः प्राजापत्येन तीर्थेन कृष्णीस्ताभिव्याहृतिभिर्द्विर्द्विस्तर्पयित्वा पद दक्षिणामुखः प्राची

नावीती पितृतीर्थेन सतिलाभिरद्भिर्व्याहृतिभिरेव सोमः पितृमान्यमोंगिरस्वानग्निः क

व्यवाहन इत्यादीं स्त्रिस्त्रिस्तर्पयेदेतत्स्नानांगतर्पणमप्सु नीरमे मद क्षिणाभिमुखः प्राचीना

Indira Gandhi National
Centre for the Arts

वीतीयेकेचास्मत्कुलेजातानाइतिवस्त्रंनिष्पीड्योपवीत्यउपस्पृश्येति॥इदंतर्पणंयेषांशास्त्रि
श्रा॰ कं॰ नांसत्रेनास्तिनैरपिकार्यं॥पारस्करविरोधियदितिवचनात्सर्वोपसंहारस्यायाद्व॥अत्रक
१६ मणिजलेनैवोईपुरकार्यं॥तदाहविष्णुः॥जलस्थेनहिकर्तव्यंजलेनैवोर्ध्वपुंड्रः॥यतःस्नु
मलत्वात्रनकर्तेतनिष्फलंभवेदिति॥अन्यस्नतर्पणमाहीश्वलायनः॥ ॥स्नानां
गतर्पणंकृत्वायस्मात्जलमाहरेत्॥तन्मंत्रस्कं॥यन्मयादुषितंतोयंशारीरमलसंचया
त्॥तद्दोषपरीहारार्थंयक्ष्मार्णांतर्पयाम्यहमिति॥अत्रोदकंबहिःक्षिपेत्॥सदाचारात्स्त्र
करेणाद्व॥शांखोःन्यप्याह॥आग्रहास्नैवपर्यंतंनगरन्त्पातितिक्रमात्॥जलांजलांजलि
त्रयंदद्यादेतत्संश्लेपतर्पणमिति॥इदमशक्तःणात्तेयं॥संदेहेपशादृश्रवणात्॥अत्रविशे
षमाहशौनकः॥अस्पृश्यस्पर्शनेवांतेअश्रुपातेक्षुरेभगे॥स्नानंनैमित्तिकंकार्यंद राम॰
वपित्र्यविवर्जितं॥उक्तं॥नैरूद्कैःस्नातोनकुर्याद्दन्तदापुनः॥स्नानांगतर्पणंविद्वान्स्नानो १६
मत्रनहापयेदिति॥अत्रविशेषमाहदेवलः॥अलाभेदेवखातानांसरितांसरसांतथा

उद्धृत्यचतुरःपिंडान्पारक्येस्नानमाचरेत्॥पारक्ये॥सर्वमस्तोदेशेनानुत्स्पष्टोम्रतः॥मार्गांतरा
नदीप्राप्तोस्नानादिपरपारतः॥अर्वाक्तीरेसरस्वत्याएषमार्गगतोविधिः॥इदमपवीक्तीरे
तीर्थविशेषाभावेदृष्टव्यमिति॥त्रिस्थलीसेतौ॥गृहेस्नानप्रकारमाहव्यासः॥शीतास्वप्सुनिषिच्योष्णामंत्रसंभारसंभृताः॥गृहेपिशस्यतेस्नानंत
द्धीनमफलंभवेत्॥गृहेकेनदमंत्रवदितितुमंत्रवाहुल्यनिषेधार्थमितिस्फक्रमेव॥मंत्रानाहका
सायनः॥इमंदेवाअसपत्नमापोहिष्ठास्तिस्रःइदमापःशन्नोदेवीर्द्रुपदादिवइत्यच॥इति
ससंभाणमज्जौमपाद्यः॥इदंतुनद्यादिस्नानाशक्तस्यज्ञेयं॥ ॥पञ्चसुदिनेषुस्नानंमन्ते॥आपः
स्वभावतोमेध्याःकिंपुनर्वह्निसंयुताः॥तेनसंतःप्रशंसंतिस्नानमुष्णेनवारिणेति॥तस्मप्रा
धान्यकथनंतच्चातुरविषयं॥उष्णोदकंत्वातुरेसेतिविशेषस्मृतेः॥स्नातस्यवह्नितप्तेनतथैव
परवारिणा॥शरीरशुद्धिर्विज्ञेयानतुस्नानफलंभवेदिति॥शंखेननिषिद्धत्वाच्च॥अत्रविशे
षमाहहर्ष्मवः॥मृतेजन्मनिसंक्रांतौश्रीदेजन्मदिनेतथा॥अस्पृश्यस्पर्शनेचैवनस्नायादु

Indira Gandhi National
Centre for the Arts

आ॰क॰ १७

कुर्वीत शौचं ॥ नदेत सर्वमनातुरस्नानघादिसन्ध्याविषयं ॥ नघाघमावेलाहयमः ॥ नित्यं नैमित्तिकं चैव क्रियांगं मलकर्षणं ॥ तीर्थाभावेतु कर्तव्यमुष्णोदकपयोदकैः ॥ परोदकैः शीतोदकैरितिसर्वधा ॥ तथा ॥ मलहस्नानेनकुर्वीतमार्जनं वाघमर्षणं ॥ नांतराणं पर्णं कुर्यात्स श्राद्धाच्च नशुध्यति ॥ मलहस्नानं पदाकुर्यात्तु स्नात्वा मदुपरि सजेत ॥ अघश्चाग्रेणसंपीज्य पाणाङ्गाय चाप्यथ ॥ पतिमंस्नातिविषये व्यासः ॥ कुलस्त्रीणां शिरस्कं स्नायाद्दुर्दशे सति नैलतः ॥ वारेवापैत्यकेकर्मण्यपनग्नाकं दसं कुर्वेति ॥ इति मलहस्नानं पदाकुर्यात्तु परि मजेत ॥ अघश्चाग्रेणसंपोज्यपाराङ्गमेव विधिः ॥ ॥ अथ वस्त्रपरिधानविधिः ॥ तत्र नागोमयज्ञेयमुहूर्तेदिति निषधान्हिकं चिलालंविलंब्य गात्रसंमार्जनं कार्यं ॥ शुष्कं शीर्षं च कर्तव्यं तथाश्चष्ठेनवाससा ॥ स्नातो नोगानि संमज्यात्स्नाप्याणितानां किंतु वा ससेति विष्णुपुराणे इति कराले नोमज्जेत्वांत्रस्नानवस्त्रेणावा पुनः ॥ अतो छिद्रं भवेत्तावत्पुनः स्नानेन शुध्यतीति च पाजाजिजेः ॥ वस्त्रविषये मनुः ॥ ब्राह्मणस्य सितं वस्त्रं नृपतेरक्तमुल्वणं ॥ पीतं वैश्यस्य शूद्रस्य नीलं मलवदिष्यते ॥ रक्तं धातु रक्तं ॥ उल्वणं स्थिरं ॥ नीलमलवत्कृष्णं ॥ मिताक्षरायां ॥ नीलीरक्तं यदा वस्त्रं विप्रः स्वांगेषु धारये रामः १७

त ॥ तंतु संततिसंख्याकेव सेत्सनरके ध्रुवं ॥ स्कांदेपि ॥ नीलीरक्तं यदा वस्त्रं हरतस्नाहिवर्जयेत ॥ ॥ स्त्रीणां क्रीडार्थसंयोगे शयनीये न दुष्यति ॥ भत्रैभत्रेरियाना ग्रीनीलीवस्त्रानुधारयेत ॥ भर्तानु नरकं यातिसा नारीतदनंतरं ॥ कंबलेपट्टसूत्रे च नीलीदोषो न विद्यत इति कंबलादौ प्रतिप्रसवः ॥ तथा ॥ अधौतं कारुधौतं च परेद्युर्दौधौतमेव च ॥ अष्टुपस्यीडीतदस्यांतस्त्याज्यं सर्वथाद्विजैः ॥ मनुः ॥ अहतं सनवं श्वेतं सदर्शं नान्यधारितं ॥ अहतंतद्विजो नीयात्सर्वकर्मसुपावनं ॥ योगीश्वरः ॥ स्नातोवैवासमीधौतेआल्कित्नेपरिधाय च ॥ प्रक्षाल्योरुमदाद्भिश्च हस्तौ गलपेत्ततः ॥ ईषद्धौतं नवं श्वेतं सदशं यन्नधारितं ॥ अहतं द्विजा नीयात्सर्वकर्मसुपावनमिति ॥ तथा ॥ अहतं यन्त्रनिर्मुक्तं मुक्तं वासः स्वयंभुवा ॥ शस्तंतन्मांगलीकेषु तावत्कालं नतथाजपमिति च ॥ तथा ॥ आजानुमलंबसंस्पासं च कच्छं तु धारयेत ॥ नन्यूनमधिकं चैव सर्वकर्मसु गर्हितं ॥ कुक्षिस्येन या एषेना भोर्हो परिकीर्तितो ॥ वस्तुसधारणंयस्य पंचकच्छं तु तद्द्विजः ॥ पद्म ॥ कक्षांनाभौ तथापृष्ठे कच्छत्रयमुदाहृतं ॥ कच्छत्रयसमायुक्तो यो विप्रः सशुचिः स्मृतः ॥ एकक

Indira Gandhi National
Centre for the Arts

छोऽधिकघस्तमुन्नकघस्तमुन्नकुघस्तथैवच एकवासाश्चवासाश्चवासाश्चनग्नः
पंचविधः स्मृतः ॥ शुद्धवस्त्रमेवकार्यं ॥ प्रागग्रमुदगग्रं वा धौतं वासः प्रसारयेत् । पश्चिमाग्रे
दक्षिणाग्रे पुनः प्रक्षालनं भवेत् ॥ पश्चिमदक्षिणाग्रप्रसारणे पुनः प्रक्षालनविधानात्तथा न
कार्यमिति भावः ॥ शुष्कभावे गौतमः ॥ सप्तवाताहतं वस्त्रं शुष्कवदिति पादितं ॥ आर्द्रं चापि द्वि
जातीनां महते गौतमादिभिः ॥ धौताधौतं तथा दग्धं संधितं रजकाहृतं ॥ स्कंधमूत्राद्युपहतं चमा
विकं चातसीभवं ॥ पवित्रमिति विज्ञेयं सर्वकर्मसु सर्वदा इति पाद्मे ॥ आतसीभवं क्षौमं नववु
स्त्रपरिधाने श्रीपतिः ॥ मार्गे उत्तरे च धनं त्वरणः शशधरः क्षेत्रशः सदा [illegible] मिजे वसांला भकरं बुधे
सुरगुरौ विद्यागमः संपदः ॥ नानायोगरतिः प्रमोदवनिता शय्यादिलाभो भृगौ देहं स्पृशा
[illegible] रोगवान् किलनष्टो धत्ते वासः सूर्यजे ॥ तथा ॥ रोहिणीपुष्करपंचके [illegible] उत्तरे पि
च पुनर्वसु हस्ते ॥ रेवतीषु वसुदैवते च [illegible] सुपरिधानमिष्यते ॥ नववस्त्रपरिधानं च
सूत्रोक्तमंत्रेण कार्यं ॥ वासश्छत्रोपानह [illegible] तिकाप्सपनी क्तेः ॥



॥ शातातपोपि ॥ परिधाय नवं वासः उत्तरीयं च मंत्रतः ॥ द्विराचम्य द्विजो वस्त्रे धौते विपरिधाय च
। द्वितीयवस्त्राभावे कात्यायनः । एकेनैव तु वस्त्रेण [illegible] प्रच्छादयेदिति ॥ जातूकर्ण्यः । अभा
वे द्वितीयस्य वस्त्रस्य [illegible] तदा भवेत् । यज्ञोपवीतं [illegible] गुलमेव वा [illegible] किंतु
[illegible] तस्मादुत्तरीयकं । उत्तरीयं यो [illegible] पवितेन सह योज्यं । अजिनं वासो वा दक्षिणत उ
पवीयत् दक्षिणं बाहुमुद्धृत्य [illegible] आपस्तंबोक्तेः ॥ अत्र विशेषः संग्रहे ॥ उत्तरीयं
योगपट्टं [illegible] तथा ॥ [illegible] ॥ जीवत्पितृक [illegible]
[illegible] उत्तरीयं कुर्या
न्नोत्तरीयं कुर्यात् [illegible] सोमात्रं ॥ [illegible]
[illegible] इति जातूकर्ण्योक्तेः ॥ अतएव [illegible] यज्ञोपवीतं [illegible]
[illegible] नववस्त्र [illegible] द्वितीयं ॥ तथा ॥ [illegible]
कार्यं ॥ स्त्रिया विशेषः संग्रहे ॥ [illegible] सुवासिनी ॥ कुर्वीतैवा शिरःस्ना
नं [illegible] तथा ॥ [illegible] स्नानं [illegible] भवेत् ॥ विधवायाः शिरः

Indira Gandhi National
Centre for the Arts

आ० क०
१८

स्नानं सर्वदैव विधीयत इति ॥ स्नानं कृत्वा चार्द्रवस्त्रं संत्यजेन्नग्न एव अधो द्विजः ॥ गृहस्नान
मथोद्धृत्वा विसृजेदं न हर्षितः ॥ अज्ञानादन्यथा कुर्वन्पुनः स्नानेन शुध्यतीति ॥ ततस्तद्व
वस्त्रं चतुर्गुणीकृत्य संदंशमोक्षं धृत्वा निष्पीडयेन्मध्याह्ने चेत्तर्पणानन्तरं ॥ ॥ इति वस्त्र
परिधान विधिः ॥ ॥ छ ॥ ॥ अथ तिलकधारणं ॥ पाराशरस्मार्तवीये ॥ ऊर्ध्वपु
ण्ड्रविहीनस्य श्मशानसदृशं मुखं ॥ अवलोक्य मुखं तस्य सवासादित्यमवलोकयेदिति ॥ ऊर्ध्व
पुण्ड्रं स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणं ॥ भस्मी भवति तत्सर्वमूर्ध्वपुण्ड्रं विना कृत
मिति कूर्मनारदीयवचनेन तिलकाकरणे प्रत्यवायश्रवणात्तिलकविधिरावश्यक
॥ यत्तु तिलकं सर्वदा कुर्यात्श्रौते स्मार्ते च कर्मणि ॥ कर्त्तावाप्यथवा भोक्ता न कुर्यात्छ्रा
द्धकर्मणीति ॥ तत्तु तिर्यक्पुण्ड्रनिषेधपरं ॥ ऊर्ध्वं च तिलकं कुर्याद्दैवे पित्र्ये च कर्मणि
॥ निराशाः पितरो यान्ति दृष्ट्वा चैव त्रिपुण्ड्रकमिति ॥ हरिहरसमाराधनशरोक्तेः ॥ तथा वासु
देवोपनिषदि ॥ ॐ नमस्कृत्य भगवान्नारदः सर्वेश्वरं वासुदेवं पप्रच्छ भगवन्नूर्ध्वपु
राम:
१८

ण्ड्रविधिं द्रव्यमंत्रस्थानादिसहितं मे ब्रूहीति नारदेन पृष्टो भगवानित्थीयकं ठिकायां त
द्विधिमाह ॥ अथ गोपीचंदनं नमस्कृत्योद्धृत्य गोपीचंदन पापघ्न विष्णुदेहसमुद्भव च
क्राङ्कित नमस्तुभ्यं धारणान्मुक्तिदो भवेति प्रार्थ्य मंमे गंगेति जलमादाय पवित्रोत्कमि
त्येकिल तन नमस्कृत्य धारणान्मुक्तिदो न वेति प्रार्थ्य इमं मे गंगे इति जलमादाय विष्णोर्नुकमि
ति मर्दयेत् । अतो देवा अवंतु न इत्येताभिर्विष्णुगायत्र्या च त्रिवारमभिमंत्र्य शंखचक्र
गदापाणे द्वारकानिलयाच्युत । गोविंद पुंडरीकाक्ष रक्ष मां शरणागतमिति मां ध्यात्वा गृ
हस्थो ललाटादिषु द्वादशस्थानेष्वनामिकांगुल्या विष्णुगायत्र्या केशवादिभिर्वा द
शनामभिर्वा धारयेत् । ब्रह्मचारी वानप्रस्थो वा ललाटकंठहृदयबाहुमूलेषु यतिस्तु त
र्जन्या शिरोललाटहृदयेषु प्रणवेन धारयेद्धिसादि । तथा तत्रैव चतुर्थकंठिकायां भस्म
धारणमुक्तं । अथ एतावग्निहोत्रसमनाः ग्नेर्भस्मासीद्वं विष्णुर्ही तोपदेति त्रिभिर्मंत्रै
रुद्धूलनं कुर्यादेवं विधिना गोपीचंदनं धारयन् घस्नो नदधीतेस सर्वेभ्यः पापेभ्यः पूतो भव
तीति । भारते दानधर्मे । जाह्नवीतीरसंभूतां मृदं मूर्ध्नि बिभर्ति यः । विभर्ति निर्वमोर्कं स्व

नमोनाशायकेवलमिति। काशीखंडेप्येवमेवपठितं। ब्रह्मण्यस्तीयेपि। ऊर्ध्वपुंड्रं यः करोति
आ॰ क॰ तुलसीमूलमृत्स्नया। तत्रैवनेत्रंतस्यस्यान्मूर्द्धिदोविभ्रयात्कलौ। सूत्रसंहितायामपि। ऊ
र्ध्वपुंड्रं मृदाकार्यं विप्रेणब्रह्मवादिना। उद्धृतासीतिमंत्रेणवैष्णवेनविशेषतइति। तन्त्रका
२० रविशेषः उक्तः पाराशरमाधवीये। ब्रह्मांडे। ऊर्ध्वपुंड्रप्रमाणानि द्रव्याण्यंगुलिभेदतः।
वर्णानिमंत्रान्देशांश्च प्रवक्ष्यामिफलानिच। पर्वताग्रेनदीतीरे मम क्षेत्रे विशेषतः। सिं
धुतीरेचवल्मीके तुलसीमूलमाश्रिते। मृद एतास्तु संग्राह्या वर्जयेदन्यमृत्तिकाः। श्याम
ं शांतिकरं प्रोक्तं रक्तं वश्यकरं तथा। श्रीकारं पीतमित्याहुर्वैष्णवं श्वेतमुच्यते। अंगुष्ठः पु
ष्टिदः प्रोक्तो मध्यमायुष्करी भवेत्। अनामिकाऽन्नदा नित्यं मुक्तिदा च प्रदेशिनी। एतै
रंगुलिभेदैस्तु कारयेन्न नखैः स्पृशेत्। दर्भपाणिः प्रकुर्वीत भस्मध्यानप्रदीपवत्। श्रीका
मः पुष्टिकामस्तु येद्धो तिलकं चरेत्। नासामूलं समारभ्य वंशपत्रनिभं शुभं। वंशक्र रामः
मो द्विजः कुर्यात्तिलकं चंदनादिना। आदिशब्दाद्भस्मनोपि महादेवयाकालकेमाः। तदुक्तं २०

पारिजाते। स्नात्वा पुंड्रं मृदा कुर्याद्धुत्वा चैव तु भस्मना देवानभ्यर्च्य गंधेन जलमध्ये जलेन
चेति। तथा। वर्तिदीपाकृतिं वापि वेणुपत्राकृतिं तथा। पद्मस्य मुकुलाकारं तथैव कुमुदस्य च।
मत्स्यकूर्माकृतिं वापि शंखाकारमतः परं। दशांगुलप्रमाणं तदुत्तमोत्तममुच्यते। नवांगुल
मध्यमं स्यादष्टांगुलमतः परं। षड्भिः पंचभिः पुंड्रं मध्यमं त्रिविधं स्मृतं। चतुस्त्र्येकांगुलैः पुं
ड्रं कनिष्ठं त्रिविधं स्मृतं। न पादुकस्थो नादर्शे न जले वावलोकयन्। न प्रावृतशिराः कुर्यात्तिल
कं धर्मसाधनं। धर्मसाधनकं मार्गं। ललाटे केशवं विद्यान्नारायणमथोदरे। माधवं हृदि विन्य
स्य गोविंदं कंठकूपके। विष्णुं च दक्षिणे कुक्षौ तद्भुजे मधुसूदनं। त्रिविक्रमं कर्णमूले वाम
कुक्षौ तु वामनं। श्रीधरं च हृषीकेशं वामयोर्बाहुकर्णयोः। पद्मनाभं पृष्ठदेशे ककुदामो
दरं स्मरेत्। तत्प्रक्षालिततोयं च वासुदेवशिरोर्पयेदिति। ॐ केशवाय नमः इत्यादि नामयो
गः। आचारदीपे विशेषः। ऊर्ध्वपुंड्रं द्विजस्योक्तं क्षत्रियस्य त्रिपुंड्रकं। अर्द्धचंद्रस्तु वैश्यस्य
वर्तुलं शूद्रजातिषु। यद्वा समस्तजातीनामूर्ध्वपुंड्रं परं स्मृतमिति। तत्रैव। ऊर्ध्वपुंड्रं मृदा कु

Indira Gandhi National
Centre for the Arts

अ·क॰ २१

र्यात्त्रिपुंड्रं भस्मना सदा॥ तिलकं वै द्विजः कुर्याच्चंदनेन यदृच्छयेति॥ भरद्वाजः॥ अभ्येप्स
त के चैव विवाहे पुत्रजन्मनि॥ मांगल्येषु च सर्वेषु न धार्यं गोपिचंदनं॥ विवाहे देवविसर्जनप
र्यंतं॥ वैखानससूत्रे तु भस्मनोर्द्ध्वपुंड्रमुक्तं॥ स्मृतिस्मेति भस्म गृहीत्वा ललाटहृदयबाहुकंठेषा
द्विसः सोमीनम इत्यूर्ध्वाग्रमालिप्येति॥ वृत्तं वा चतुरस्रं वा बिंदुमर्द्धेंदुमेव वा॥ ललाटे यादृशं
पुंड्रं लिखितं सितभस्मना॥ तादृशं भुजयोर्मूर्ध्नि स्तनयोरंतरे लिखेदिति॥ पुरुषार्थप्रबो
धग्रंथकृतोक्तं॥ अत एवाग्निहोत्रानंतरं याज्ञिकैरूर्ध्वपुंड्रं भस्मना ध्रियमाणं दृश्यते॥ ब्रह्म
चारिभिर्विहाकारं च॥ तेन यथाचारं व्यवस्थातव्यं॥ येनास्य पितरो याता इति मनुवचनात्॥
श्रास्था शिखां च पुंड्रं च समयाचारमेव च॥ पूर्वैराचरितं कुर्यादन्यथा पतितो भवेदिति विष्णु
क्तेश्च॥ तथा॥ शंखचक्राद्यंकनेन तुलसीदलभक्षणं॥ यः कुर्यान्नियमं नित्यं स याति प
रमां गतिमिति॥ संखः॥ नान्यं देवं नमस्कुर्यान्नान्यं देवं समर्चयेत्॥ चक्रांकितः सदा ति — राम: 
ष्ठेन्मद्भक्तः पांडुनंदनेति॥ स्कांदेपि काशिखंडे॥ शंखचक्रांकिततनुः शिरसी मंजरीधरः — २१

॥ गोपीचंदनलिप्तांगो दृष्टश्चेत्तदघं कुतः इति॥ शिखा यज्ञोपवीतं च त्रिपुंड्रं चैव नित्यकं॥ ब्रा
ह्मणस्य तथैवेदं शंखचक्रादिधारणमिति॥ आश्वलायनस्मृ॥ शौनकेशवयोश्चिन्हं चक्र
शूलादिकं द्विजः॥ न धारयेत मतिमान्वैदिके वर्त्मनि स्थितः इति॥ सर्वसाधारणमिति न्याया
द्वैदिकमात्रमार्गस्थितस्य निषेधाद्वैदिकतांत्रिकोभयमार्गस्थितस्य भवत्येवेति सर्वमनव
द्यं॥ अत्र विचारविशेषः॥ आचारमासविधाने द्रष्टव्यः॥ धारणप्रकारः सात्वतसंहितायां॥
चक्रं पद्मं दक्षिणे तु गदां शंखं च वामतः॥ अष्टाक्षरांकितां मुद्रां सर्वस्थानेषु धारयेत्॥ हृदि
पद्मं ललाटे च गदां शिरसि धारयेत्॥ प्रकारः संहितायां शेषः॥ कुक्षौ चत्वारि चक्राणि पार्श्वे
द्वंद्वं दक्षिणे तथा॥ हृदि द्वयं तथा धार्यं स्तने द्वे दक्षिणे तथा॥ नक्रे द्वे दक्षिणे बाहौ चक्रमेकं गले पुरः॥
॥ तथा पश्चाद्बाहुदेशे द्वे पार्श्वे दक्षिणे तथा॥ पृष्ठदेशे तथा चैकं धार्यमेवं सुदर्शनं॥ शंखद्वयं
वामपार्श्वे स्तने वामे द्वयं तथा॥ वामबाहौ द्वयं धार्यमेकमेव गले तथा॥ एकं पार्श्वे तथा धार्यं तथा
धार्यमेकं पांचजन्यं शंखस्था
धारयेत्तथा पश्चाज्जलस्य च॥ पृष्ठमूले तथा चैकं हृदये चैकमेव च॥

Indira Gandhi National
Centre for the Arts

नविद्येविदुः॥ हृदि चैकं स्तने चैकं बाहुमूले द्वयं तथा॥ धार्यं प्रदेशभागे गदां वैवामतस्तथा॥ ना
ण्यशास्त्रमुद्रां तु सर्वस्थानेषु धारयेत् इति॥ इदं मुद्राधारणं वैष्णवधर्मं। उपवीतादि वह्नार्यः श
अ०क० २२ ख्वचक्रगदादयः। ब्राह्मणक्षत्रियविशां वैष्णवत्वेन चान्यथेति पंचरात्रोक्तेरिति दिक्। शै
वैस्तिर्यक्पुंड्रमपि धार्यं। तदुक्तं स्कांदे। अग्निहोत्राग्निजं भस्म अग्निकार्योद्भवं तथा। औ
पासनात्समुत्पन्नं चरुहोमोद्भवं तथा। महारुद्राग्निजं भस्म रुद्रस्थानोद्भवं तथा॥ भस्मानि
षड्विधान्याहुः सर्वपापहराणि च॥ त्रैवर्णिकानां सर्वेषामग्निहोत्रसमुद्भवं॥ अग्निकार्यात्स
मुत्पन्नं न ह्यार्यं ब्रह्मचारिणा॥ आवसथ्याग्निसंभूतं गृहस्थैरेव धार्यते। शेषभस्मत्रयं चैवं सर्वैः
सर्वत्र धार्यते॥ देवर्षिकृतहोमस्थं धार्यं यत्नेन सर्वदा॥ अगस्त्यः॥ ॥प्रातस्सजलं भस्म
मध्याह्ने चंदनान्वितं॥ सायं नुकेवलं भस्म शैवैर्धार्यं सदैव हि इति॥ कालाग्निरुद्रोपनिषद राम: २२
पि॥ अथ कालाग्निरुद्रं भगवंतं सनत्कुमारः पप्रच्छ॥ अधीहि भगवं त्रिपुंड्रकविधिं सत
त्वं किं द्रव्यं किं स्थानं कति प्रमाणं का रेखा किं दैवतं को मंत्राः काः शक्तयः कः कर्ता किं फ

लमिति॥ तं होवाच भगवान् यद्द्रव्यं तदाग्नेयं भस्म सद्योजातादिपंचब्रह्ममंत्रैः परिगृह्याग्नि
रिति भस्मेत्यनेनाभिमंत्र्य मानस्तोके इति समुद्धृत्य त्र्यंबकं यजामहे शिरो ललाटवक्षः स्कंधेष्वि
ति त्रिभिस्त्र्यायुषैस्त्र्यंबकैस्तिर्यक्तिस्रो रेखाः कुर्वीत व्रतमेतच्छांभवं सर्ववेदेषु वेदवादिभिरुक्तं त
त्समाचरेन्मुमुक्षुरपुनर्भवाय इत्यादि॥ स्मृतिसंग्रहे॥ भाले त्रिपुंड्रकं भाति निर्मले रुद्राक्षमालि
का॥ वक्त्रे षडक्षरो मंत्रः स रुद्रो नात्र संशयः॥ यं भस्मधारिणं दृष्ट्वा चानिंदंति मानवाः॥ ॥
ते पांशुद्रेषसंभूतिरनुमेया विपश्चितेति॥ ॥इति तिर्यक्पुंड्रधारणविधिः॥ ॥अथ
संध्यावंदनविधिः॥ व्यासः॥ प्रातः संध्यां सनक्षत्रां मध्याह्ने स्नानकर्मणि॥ सादित्यां पश्चि
मां संध्यामुपासीत यथाविधि॥ सूर्योदयात्पूर्वं घटिकाद्वयं प्रातःसंध्यामुख्यकालः॥ तथा सा
यं सूर्यास्तमयात्पूर्वं घटिकाद्वयं॥ अथाचम्य कुशैर्युक्त आसने समुपस्थितः॥ करसंपुटकं
कृत्वा संध्यां नित्यं समाचरेत्॥ नत्वाथ पुंडरीकाक्षमुपात्ताघप्रशांतये॥ ब्रह्माग्नात्मेतयं प्रातः

Indira Gandhi National
Centre for the Arts

संध्यावंद्यामुपास्महे इति संध्यावंदनप्रकारस्त्वाश्वलायनगृह्यपरिशिष्टे ॥ अथ संध्यामुपासी
आ॰क॰ २३ न यावहोरात्रयोः संधयस्त्वपूर्वापराह्ने योऽस्तकालभवादेव तां संध्यामुपासीत बहिर्ग्रामा
त्प्राच्यामुदीच्यां वा दिश्यनिंदितायामन्नमुदकाशये मे सुप्रातः शुचिर्भूत्वा पाणिपादमुखानि
प्रक्षाल्य शुचौ देशे भूमिष्ठपादोनपश्चिमत उपविश्याचामेत्प्रकृतिस्थमफेनाबुद्बुदकमीक्षितं
दक्षिणप्राणिनाद्यमेकनिष्ठांगुष्ठौ विश्लिष्टो विनम्रतिसृणां गुली संहनोर्ध्वीकृत्वा ब्राह्मेण ती
र्थेन हृदयप्राप्तिस्त्रिः पीत्वा पाणिं प्रक्षाल्यांगुष्ठमूलेनाकुंचितोष्ठमास्यं द्विः प्रमृज्य स
कृदं संहतमध्यमांगुलिभिः ॥ पाणिं प्रक्षाल्य सव्यं पाणिं पादौ शिरश्चाभ्युक्ष्यांगुष्ठाभ्यां संहत
मध्यमांगुलित्रयेणास्यमुपस्पृश्य ॥ सांगुष्ठया प्रदेशिन्या घ्राणबिलद्वयमनामिकया चक्षुः
श्रोत्रे कनिष्ठिकया नाभिं च तलेन हृदयं सर्वाभिरंगुलिभिः शिरस्तदग्रैरंसौ च स्पृशेदित्येते
दाचमनमेवं द्विराचम्यात्मानमभ्युक्ष्य दर्भपवित्रपाणिः प्रथममंत्रकं पंचदशमात्रिकं प्राणा राम: २३
यामत्रयं कृत्वा समंत्रं सकृत्तु यदायतप्राणः सप्रणवां सव्याहृतिकां सावित्रीं सशिरस्कां त्रिरावर्त्य

योऽदित्ये ष मंत्रं प्राणायामोऽथ कर्मसंकल्पं शुचौ पात्रे सद्भे पारणो वाऽऽप आधाय स्थिरे त्वस्काश
येयावत्तिकर्म कुर्वीत तावत्तउदकस्य विभागं कल्पयित्वा तीर्थानंतत्रावाहनात्तप्तः सदर्भेण पाणि
ना दायादापोनाने शिरसि मार्जयेदोऽपूर्वपदं आपो हि ष्ठेति तिसृभिस्त्याचमनमुदकमादाय स
स्सूश्रेति पिवेदेतस्य मंत्रमाचमनमथ पुनराचम्य मार्जयेत्प्रणवव्याहृतिसावित्रीभिर्द्रुपदा
आपो हि ष्ठेति सूक्तेन गायत्री शिरसा चांभसात्मानं परिषिंचेदेतन्मार्जनमथ गोकर्णवत्कृ
तेन पाणिनोदकमादाय नासिकाग्रे धारयन्नृतं च सत्यं चेति पापमात्मानं मनस्या
पुरुषं विचिंत्य संयतप्राणोऽघमर्षणसूक्तं द्रुपदां च वा वर्णयेद्दक्षिणेन नासाबिलेन
शनैः प्राणं रेचयन्सर्वं तस्मान्निःसृतं कृष्णं तेन च तेनापाणिस्थ उदके पातितं ध्यात्वा तद्दुद
कमवेक्षमाणा नाम तो भुवि नीत्वा प्रणवेन च्छिद्रानंतपाप्मानं वज्रहतं संहत्य धार्यन्ति भावयेदेष
पापक्षयोऽघनमेकेन कुर्वीति मार्जने नैव तस्य वपो हि तत्वाद्रिदिति द्रुपदक्षपापशोधनी १ अ
थाचम्य दर्भपाणिः पूर्णमुदकांजलिमुद्धृत्य वेलि त्या पवित्रानामिका दिशाभिमुखः स्थित्वा प्र

Indira Gandhi National
Centre for the Arts

अ॰क॰
२४

शत्वर्म्मीहृतिएर्वपासाविश्चात्रिर्निवेद्यन्हिपेघेनुपुनः पाप्मानमपोहंनेछंतितेनःनाचमैवम
र्घ्यमुह्निपपुरेन्तदेवार्घ्यानिवेदनमसावदित्सोब्रह्मेतिप्रदक्षिणंपरियन्परिषिच्यापउपस्पृश्य
भुवैदेशेदर्भासोसीतेदर्भानासीयेन्याहृतिभिरूपविश्यप्राणायामत्रयंकृत्वात्मानंव्या
हृतिभिरभ्युक्ष्यसाविश्चाकृषिर्देवतछंदांस्यनुस्मृत्यतामेतांचतुरक्षरशोविभक्तामधित
योजितैःषडुस्तदंगमंत्रैर्यथांगमात्मनिन्यस्यात्मानंतद्रूपंभावयेद्यथातत्सवितुर्हृदयाय
नमःवरेण्यंशिरसेस्वाहेतिशिरसिभर्गोदेवस्यशिखायैवषडितिशिखायांधीम
हिकवचायहुमितिसुरसिधियोयोनोनेत्रत्रयायवौषडितिनेत्रललाटेषुविन्यस्यापप्रचो
दयादस्त्रायफडितिकरतलेरस्त्रंप्राच्यादिदशदिक्षुन्यसेदेवांगन्यासएनमप्येकेनेछंति
सहिविधिर्वैदिकइत्यस्यमंत्रदेवतोध्यातव्या।। ।।आगच्छवरदेवीसावाहुतिष्ठन्नईनदेषु
नरुत्रेधामंजलदर्शनान्मंत्रार्थमनुसंदधानःप्रणवव्याहृतिपूर्विकांसावित्रींजपेज्जपकाले
रस्त्रेणानामिकाभ्यामध्यमाद्यप्रदक्षिणंदशभिरंगुलीपर्वभिर्गणयेदागच्छवरदे एमः
२४

विजयेमेसंनिधौभव।। ।।गायंतंत्रायतेयस्माद्गायत्रीत्वंततःस्मृतेत्यावाहनमंत्रः।।सवि
तुर्वरेण्यंतेजोध्यायेमहियोस्माकंधियःप्रेरयतीतिमंत्रार्थः।।अथदेवताध्यानं।।यासं
ध्यासैवमंत्रोक्तादेवतारवलपास्येतांसर्वदैकरूपांध्यायेदनुसंध्यामन्यान्यरूपांवापदे
करूपामृग्युजुःसामत्रिपदांतिर्यगूर्ध्वाधरदिक्षुषट्कुक्षिंपंचशिरसमग्निमुखींविष्णुहृद
यांब्रह्मशिरस्कांरुद्रशिखांदंडकमंडलक्षसूत्राभयांकचतुर्भुजांशुभ्रवर्णांशुभ्रांवरानुले
पनस्रगाभरणांशरच्चंद्रसहस्रप्रभांसर्वदेवमयीमिमांदेवीगायत्रीमेकामेवत्रिषुसं
ध्यासुध्यायेद्यद्वाभिन्नरूपांतांप्रातर्बालांवादित्यमंडलमध्यस्थांरक्तवर्णांरक्तांब
रानुलेपनस्रगाभरणांचतुर्वक्त्रांदंडकमंडल्वक्षसूत्राभयांकचतुर्भुजांहंसासनारूढांब्र
ह्मदैवत्यामृग्वेदमुदाहरंतींभूर्लोकाधिष्ठात्रींगायत्रीनामदेवतांध्यायेद्यमध्यंदिनेतां
युवतींयुवादित्यमंडलमध्यस्थांश्वेतवर्णांश्वेतांवरानुलेपनस्रगाभरणांपंचवक्त्रांत्रिने
त्रांचंद्रशेखरांत्रिशूलखट्वांगखड्गडमरूकांकचतुर्भुजांवृषभासनारूढांरुद्रदैवत्यांयजु

Indira Gandhi National
Centre for the Arts

ग्र·क०
२५

वेदमुदाहरंती भुवर्लोकाधिष्ठात्रीं सावित्रीनाम नामेवदेवतां ध्यायेदथ सायंतनां हंसारूढां आदित्यमं
डलमध्यस्थां श्यामवर्णां श्यामांबराभरणस्रगनुलेपनामेकवक्त्रां शंखचक्रगदापद्मांकचतु
र्भुजां गरुडासनारूढां विष्णुदेवत्यां सामवेदमुदाहरंती स्वर्लोकाधिष्ठात्रीं सरस्वतीनाम देवतां
ध्यायेदथ सायंतनां हंसारूढां आदित्यमंडलमध्यस्थां श्यामवर्णां श्यामांबराभरणस्रगनुलेपनामे
कवक्त्रां शंखचक्रगदापद्मांकचतुर्भुजां गरुडासनारूढां विष्णुदेवत्यां सामवेदमुदाहरंती
स्वर्लोकाधिष्ठात्रीं सरस्वतीनामदेवतां ध्यात्वा ॥ वा सज्ज पित्वा ऽघजातवेदसे सुनवाम सो
ममित्युपस्थाय ॥ तच्छंयोरावृणीमहे नमो ब्रह्मणे नमो स्त्वग्नये इत्येताभिरुपस्थाय प्र
दक्षिणां दिशः संध्यां तत्वा प संध्यायै गायत्र्यै सावित्र्यै सावित्र्यै सरस्वत्यै सर्वाभ्यो देवताभ्यो
नमस्कृत्य ॥ तत उत्तमे शिखरे देवी भूम्यां पर्वतमूर्धनि । ब्राह्मणेभ्यो ह्यनुज्ञाता गच्छ देवि
यथासुखमिति ॥ संध्या विसर्जयेद्दैनो अपि वात यमनरमन्त्र काशां नि निरूवन्नमो ब्रह्म राम:
णे इति प्रदक्षिणं परिक्रम्य न्नासप्तलोकाद्यापातालं लोकालोकालोक पर्वतात् ये संति ब्रा २५

ह्मणा देवास्तेभ्यो नित्यं नमो नमः इति नमस्कृत्य गुरून् वृद्धांश्च उपसंगृह्णीयात् देवं सामं विशेषस्तु
सूर्यश्चेति मंत्रेण अग्निश्चेति त्र्यायाज्ज पश्चात् हंसमित मंडलस्थानक्षत्रदर्शनांता सीनाय मध्ये दिने
त्वापः पुनंतित्ति मंत्राच मनमात्रस्तु याहं सुवसा वा त्रिः सकृद्वा पर्यमुक्षिप्येद्धे । वाहरूदग्रं तमु
दुसंजातवेदसं चित्रं देवानामिति सूक्ताभ्यां तच्चक्षुरित्येकया चादित्यमुपस्थायोपमासीनो य
थेष्टकालं कुर्यादित्येषसंध्याविधिर्व्याख्यात इति ॥ ॥ अथ वाजसनेयि संध्योच्यते ॥ ३ ॥ कासा
यनः ॥ ॥ स लोकृकरौ प्रक्षाल्याचम त्रिरायम्यासु सुप्त्वा एवं भुमिश्चा एष ई प्रदक्षिणो हु
बाहुरूह्रयमुदुसं चित्रं तच्चक्षुर्गायत्र्या च यथाशक्ति विप्रादिसनुवाकं पुरुषसूक्तं शिवसंक
ल्पमंडलब्राह्मणं गौरीत्युपस्थाय प्रदक्षिणीकृत्य नमस्कृत्योपविशेदिति ॥ अत्र यद्यपि सूत्रे
कारेण संक्षेपतो मार्ध्यान्हसंध्योक्ता तथापि सर्वशाखाधिकरणन्यायेन ॥ संध्यात्रयं चक
कारेण संक्षेपतो मा ध्यान्ह संध्योक्ता तथापि सर्वशास्त्राधिकरणान्यायेन ॥ संध्यात्रयं चक्र
निष्ठाह्मणेन विपश्चिता ॥ अनपानरकं याति सर्वकर्माकरोपि सत्रिमादिसू सा चत्रि
काली नामार्जनादि सर्वांगोपं हेहि नागजमनेपिभिरपि कार्या ॥ विष्णुशस्तु सास्तु एव

॥पारस्परमविरोधियदितिवचनात्॥ अर्घ्यानंतरंसंध्यातर्पणंकार्यं॥शौनकः॥ अर्घ्यांतेवाज
अ॰ का॰ पांतेवाप्रागासीनःकुशासने॥संध्यासुतर्पणंकार्यंसम्यक्त्वारूप्यादिकंततः॥ ऋषिर्व्यासःमु
२६ दिष्टोब्रह्मादैवतमुच्यते॥छंदोगायत्रकंचैवविनियोगस्तुतर्पणे॥प्रयोगस्तु॥ ॐ भूःपुरु
षंतर्पयामि॥ ॐ ऋग्वेदंत॰ मंडलांत॰ हिरण्यगर्भंतर्पयामि॰ आत्मानं॰ गायत्रीं॰ वेदमातरं॰
सांकृतिं॰ संध्यां॰ कुमारीं॰ ब्राह्मीं॰ उषसं॰ निर्मृजं॰ सर्वसिद्धिकरीं॰ सर्वमंत्राधिपतींतर्पया
पारस्परमविरोधियदितिवचनात्॥ अर्घ्यानंतरंसंध्यातर्पणंकार्यं॥ शौनकः॥ अर्घ्यांतेवाज
पांतेवाप्रागासीनःकुशासने॥संध्यासुतर्पणंकार्यंसम्यक्त्वारूप्यादिकंततः॥ ऋषिर्व्यासःमुदि
ष्टोब्रह्मादैवतमुच्यते॥छंदोगायत्रकंचैवविनियोगस्तुतर्पणे॥प्रयोगस्तु॥ ॐ भूःपुरु
षंतर्पयामि॥ ॐ ऋग्वेदंत॰ मंडलांतः हिरण्यगर्भंतर्पयामि॰ आत्मानं॰ गायत्रीं॰ वेदमा राम:
तरं॰ सांकृतिं॰ संध्यां॰ कुमारीं॰ ब्राह्मीं॰ उषसं॰ निर्मृजं॰ सर्वसिद्धिकरीं॰ सर्वमंत्राधिपतींत २६
र्पयामि॥ आदौप्रणवमुच्चार्यतर्पयीतजदंतिके॥ अनेनविधिनाकुर्यात्संध्यातर्पणमुत्त

ममिति॥ ॥अथसंध्यावंदनधर्मः॥ ॥तत्रयोगयाज्ञवल्क्यः॥ ॥आपोहिष्ठेतिति
स्मृतिर्ऋग्भिस्तुयमतःशुचिः॥नवप्रणवयुक्ताभिर्जलंशिरसिनिक्षिपेत्॥शौनकः॥एवंके
नैवविधिनाम्भोरूयेकुशवारिणा॥विप्रुषोष्टौक्षिपेदूर्ध्वमधोयस्मरूयायचेति॥आसनस्तु॥भू
मौमः मूर्ध्नितथाकाशेमःघ्रौकाशेमःस्योकाशतथाभुवि॥आकाशेभुविमूर्ध्निस्नानंमंत्रस्नानं
विधीयते॥ आकाशेहृदये॥ भूमौपादयोः॥ अर्घ्यविषये॥ गोशृंगमात्रमुद्धृत्यसर्विवीस
जलांजलीन्नाद्यौपादौचसमौकृत्वापाणिउद्धृत्यनिक्षिपेत्॥मुक्तहस्तेनदातव्यंमुद्रांतत्रनका
रयेत्॥तर्जन्यंगुष्ठयोर्योगेराक्षसीमुद्रिकाभवेत्॥राक्षस्यामुद्रयादत्तंतत्तोयंरुधिरंभवेत्॥
गोशृंगलक्षणं॥प्रादेशस्तुप्रदेशिन्यातालोमध्यमयाभवेत्॥गोश्वशृंगमनामिकावि
तस्तिस्तुकनिष्ठया॥ शातातपः॥ ॥जलेष्वर्घ्यंप्रदातव्यंजलाभावेशुचिस्थले॥प्रातर्मध्या
न्हयोःकंठदघ्नेउत्थायार्घ्यंजलेक्षिपेत्॥छं॥उपविश्यतथासायंसंस्थलेवार्घ्यंविनिक्षिपेत्॥व्या
सः॥कराभ्यांतोयमादायगायत्र्याचाभिमंत्रितं॥आदित्याभिमुखस्तिष्ठंस्त्रिरूर्ध्वंसंध्ययोः

Indira Gandhi National
Centre for the Arts

क्षिपेत्॥ मध्यान्हे सकृद्देवेदं क्षेपनीयं द्विजातिभिः। अत्र हेतुः स्कांदे। त्रिंशत्कोट्यो म
हावीर्या मंदेहा नाम राक्षसाः॥ कृतघ्ना दारुणा घोराः सूर्यमिच्छंति खादितुं॥ ततो देवग
णाः सर्वे ऋषयश्च तपोधनाः॥ उपासते सदा संध्यां प्रक्षिपंत्युदकांजलिं॥ दह्यंते तेन ते
दैत्या वज्रीभूतेन वारिणा॥ ततः प्रयाति भगवान्ब्राह्मणैरभिरक्षितः॥ वालखिल्यादिभि
श्चैव जगतः पालनोद्यतः॥ पश्चात्तत्पेव सावित्रीं प्रादक्षिण्य विकर्त्तनं॥ कुर्यात्तलेन तन्ना
सां च चक्षुः श्रोत्रमुपस्पृशेत्॥ सूर्योपस्थाने विशेषमाह कश्यपः॥ हस्ताभ्यां स्वस्तिकं
कृत्वा प्रातस्तिष्ठेद्दिवाकरं॥ मध्यान्हे त्वंजलिं बद्ध्वा सायं मुकुलितौ करौ॥ तत्र मंत्रविशे
षमाह देवलः॥ मित्रस्य चर्षणीति स्यात्त्वमवस्त्वेति चोदये॥ इमं मेति चतुर्थकेण सायं कुर्
र्यादुपस्थितिं॥ व्यासस्तु॥ संध्यात्रयेऽप्येकमेव ह्युपस्थानं प्रचक्षते॥ उद्वयमुदु सं चित्रं त
बद्ध्वा स्तिष्ठेद्दिवाकरं॥ कात्यायनस्तु॥ उच्चित्रमग्नं द्वयनैवमुपतिष्ठेदनंतरं॥ संध्याद्वयेप्यु
पस्थानमेतदाहुर्मनीषिणः॥ मध्ये त्वह्न उपस्थेयं विभ्राडादीन्यजपेत्॥ अह्नो दिनस्य



मध्येऽस्य उदु त्यं चित्रं देवानामित्यृग्द्वयस्योपरि विभ्राडादीन्या जपेदिति सर्पिः॥ अथ जप
धर्माः॥ तत्र व्यासः॥ तेजोसीति तत्पेमं मंत्रं गायत्र्यावाहने द्विजः॥ आवाहनं जपेत्प्राज्ञो गा
यत्रीं तां महाफलां॥ गायत्र्येकपदीत्यादिना गायत्र्याः प्रार्थनं चरेत्॥ नमस्ते तुरीयायेति
नमस्कृत्य च तां जपेत्॥ आगच्छ वरदे देवीत्यादिनास्य विकल्पः॥ तेजोसीत्यादेर्वा जपेनेपि
श्यामा पठितव्या तद्विषयत्वेन वा॥ गायत्रीध्यानं प्रकारांतरेणाप्युक्तं॥ मुक्ताविद्रुमहेमनील
धवलच्छायैर्मुखैः पंचभिर्युक्तामिंदुनिबद्धरत्नमुकुटां तत्त्वात्मवर्णात्मिकां॥ गायत्रीं वर
दाभयांकुशकशाः शुभ्रं कपालं गुणां शंखं चक्रमथारविंदयुगलं हस्तैर्वहंतीं भजे॥ जपप्र
कारमाह व्यासः॥ प्रणवव्याहृतियुतां गायत्रीं तु जपेत्ततः। समाहितमनास्तूष्णीं मनसा वापि
चिंतयेत्॥ ध्यायेत्तु मनसा मंत्रं जिह्वोष्ठौ न च चालयेत्॥ न कंपयेच्छिरो ग्रीवां दंतान्नैव प्रका
शयेत्॥ कृत्वोत्तानौ करौ प्रातः सायं मुकुलितौ करौ॥ मध्ये तिर्यक्करौ प्रोक्तौ जप एवमुदाहृत
तः॥ विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः॥ उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृ

Indira Gandhi National
Centre for the Arts

श्री०
२८

तः॥ विनाशार्दं जपो यस्य चलसिद्धि द्विजछदः॥ उपांशुं तं जपं प्राहुर्मनसा मानसं बुधाः॥ एवं
संध्यां जपं स्थिते सावित्रीमार्कदर्शनात्॥ पश्चिमां तु समासीनः सम्यगार्क्षविभावनात्॥
मध्याह्ने तु॥ तिष्ठन्नाद्रीं च मार्गेर्कं जपं कुर्यात्सगाहितः॥ अन्यथा प्राशुं सः कुर्यात्समा
सीनः कुशासने॥ आसनान्याह व्यासः॥ कौशेयं कंबलं चैव अजिनं पट्टमेव वा॥ दारुजं
तालपत्रं च आसनं परिकल्पयेत्॥ कृष्णाजिने ज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि॥ वंशाजि
ने व्याधिनाशः स्यात्सर्ववै चित्रकंबले॥ नारी स्तिनस्त्रोपविशेत्कृष्णसारजिने गृही॥ निषिधा
ही स्तितविषयं कृष्णाजिनं॥ आत्मशय्यासनं वस्त्रं जायापत्यं कमंडलुः॥ शुचीन्यात्मन
एतानि परेषां न नैवमशुचीनि॥ न पाणिपादचपलो न नेत्रचपलो द्विजः॥ न च वाक्चपलश्चै
व जपन्सिद्धिमवाप्नुयात्॥ मनः संतोषणं शौचं मौनं मंत्रार्थचिंतनं॥ अव्यग्रत्वमनिर्वेदो
जपसंपत्तिहेतवः॥ स्वस्तिकासनमासीनो जपसिद्धिमवाप्नुयात्॥ स्वस्तिकासनमुच्यते जा
नूर्वोरंतरे सम्यक्कृत्वा पादतले उभे॥ ऋजुकायः समासीनः स्वस्तिकासनमुच्यते॥ पद्मा

राम:
२८

सनं समासीनः सर्वसिद्धिमवाप्नुयात्॥ उत्तानौ चरणौ कृत्वा ऊरुसंस्थौ प्रयत्नतः॥ उर्वोर्मध्ये तु
चोत्तानौ पाणी कृत्वा ततो दृशौ॥ नासाग्रे विन्यसेद्धीमान् पद्मासनमिदं स्मृतं॥ आसनान्तराणि ग्रं
थगौरवभीत्यानोक्तानि॥ वस्त्रेणाच्छाद्य स्वकरं दक्षिणं यः सदा जपेत्॥ तस्य तत्सफलं जप्यं त
द्धीनमफलं भवेत्॥ जपकाले स्वक्षमालां गुरोरपि न दर्शयेत्॥ उल्लंघिते न पामे पतिते चा
क्षसूत्रके॥ प्राणायामत्रयं कृत्वा घृतप्राशनमाचरेत्॥ यत्र लेष्मकवस्तोगस्थले चैवाई
वा सभा॥ जपे होमस्तथा दानं तत्सर्वं निष्फलं भवेत्॥ अथ जपमालाप्रकारः॥ पाद्मे॥
अरिष्टं पत्रजीवं च शंखं पद्मं तथा मणिं कुशग्रंथिं च रुद्राक्षमुत्तमं चोत्तरोत्तरं॥ अंगु
लीजपसंख्यानमेकमेकं वरानने॥ पर्वभिर्दशसंख्यातं पुत्रजीवफलैर्दश॥ शतं वै शंख
मणिभिः प्रवालैश्च सहस्रकं॥ मौक्तिकैर्दशसाहस्रं सौवर्णैर्लक्षमुच्यते॥ कुशग्रंथ्या कोटि
दिगुणं तुलस्याः नंतकं फलं॥ अक्षरणामसमं धाचपरिपूर्णं हठानवा॥ निश्चलां ग्रंथि

Indira Gandhi National
Centre for the Arts

अ.क. २९

न्याऽमंगा अन्योन्यं ग्रन्थिवर्जिता ॥ सशब्दा चंचला या तु त्रुटिता ग्रंथिता तु या ॥ भिन्नसू
त्रेण ग्रथिता या तु स्फुरणतनी ॥ माला दुःखप्रदा ग्रथिता निंधनं तु विः ॥ पाखंड
स्पतं स्वं बंधिनी ॥ अक्षास्थिमात्रा मणयः श्रेष्ठाः सुजपकर्मणि ॥ अष्टोत्तरशतं संख्याम
णीनां श्रेयसी भवेत् ॥ तदर्द्धसंख्याकथिता मध्यमा चाधमा पुनः ॥ सप्तविंशतिसंख्याता ता
नैनैवाधमा भवेत् ॥ तर्जमानस्पर्शेन सूत्रं न कंपेन्न विधूनयेत् ॥ अंगुष्ठस्य तु मध्यस्थं परिव
र्तं समाचरेत् ॥ मध्यमाकर्षणं तस्याः सर्वसिद्धिप्रदायकं ॥ नान्यांगुलिभिराकर्षं तन्ननखै
श्च तथा स्पृशेत् ॥ अमावेलक्ष मालायाः कुशाग्रं व्याप्य पाणिना ॥ जपस्य वा हि कर्तव्य एका
ग्रमनसा सदा ॥ पाणिमाला चेत्थं ॥ अनामिकाद्यं मध्यं चैव मध्याधः प्रक्रमेण च ॥ तर्जन्या
दिगतानि च अक्षमाला करे स्थिता ॥ अस्यार्थः ॥ अनामिका मध्यरेखामादिं कृत्वा तदधो
क्रमेण प्रदक्षिणावर्त्तं तर्जन्या आदिरेखां नेका योसंपकरे स्थिता मालेत्यर्थः ॥ यमः ॥
सहस्रपरमां देवीं शतमध्यां दशावरां ॥ गायत्रीं तु जपेन्नित्यं सर्वकल्मषनाशिनीं ॥ पर्वभिस्त

राम: २९

जपेद्देवी सम्यगानियमः स्मृतः ॥ गायत्र्या वेदबीजत्वाद्वेदः पर्वसु गीयते ॥ मध्यमादिपर्वद्वयं
जपकाले तु वर्जयेत् ॥ ॥ एतं मेरुं विजानीयाद्ग्रथितं ब्रह्मणा स्वयं ॥ अंगुष्ठाग्रेण यज्जप्तं
यज्जप्तं मेरुलंघनात् ॥ असंख्यातं तु यज्जप्तं तत्सर्वं निष्फलं भवेत् ॥ आश्रमविशेषेण ज
पविशेषमाह मनुः ॥ ब्रह्मचारी गृहस्थश्च शतमष्टोत्तरं जपेत् ॥ वानप्रस्थो यतिश्चैव द्विस
हस्रमधिकं जपेत् ॥ गृहस्थस्य संख्यातरमुक्तं यमेन ॥ अष्टोत्तरशतं कुर्याच्चतुःपंचाशिका
पि वा ॥ सप्तविंशतिका कार्या ततो नैवाधमा मता ॥ दशावरा मितिं तु कार्या तत्र सकृद्विषय
॥ पापनल्कीन्क विशेषमाह ॥ सर्वेषां चैव पापानामेकैकस्य समुपस्थिते ॥ दशसाहस्रिकोऽभ्यासो
गायत्र्याः शोधनं परं ॥ मंत्रसिद्धिकामस्य चतुर्विंशतिलक्षजप उक्तः ॥ शारदातिलके ॥ तत्त्व
लक्षं विधानेन भिक्षाशी विजितेंद्रियः ॥ आहंतिर्यप्रमंपुक्तो गायत्रीं दीक्षितो जपेदिति ॥ न
वा ॥ गृहे त्वेकगुणं ज्ञेयं नद्यां तु द्विगुणं स्मृतं ॥ गवां गोष्ठे दशगुणमग्न्यागारे शताधिकं ॥
सिद्धिक्षेत्रेषु सर्वेषु देवतायाश्च संनिधौ ॥ सहस्रशतकोटीनामनंतं शिवसंनिधौ ॥ काम्या विशे

Indira Gandhi National
Centre for the Arts

ग्रा० कं० ३०

घ्राणांगुलिविशेषः ॥ वसिष्ठः ॥ अंगुष्ठमोक्षदं विद्यात्तर्जनी शत्रुनाशिनी ॥ मध्यमा धनसिद्धौ
स्यात् शांतिकर्मानामिका ॥ कनिष्ठाकर्षणे ज्ञेया जपकर्मणि सिद्धिदा ॥ कूर्मचक्रे दीपदला ज्ञ
पेत्सर्वसिद्धि इति कूर्मचक्रमुच्यते ॥ वर्तुलं नवकोष्ठं तत्कृत्वा कूर्माकृतिं लिखेत् ॥ स्वरयुग्मं
क्रमेणैव वर्गं घ्राघसुदिक्षु च ॥ कादीन्वर्गान्क्रमीशान्तान्यामध्ये स्थलाधिपं ॥ तन्मा
माघस्तंरं यत्कूर्मास्यंतदीपकं ॥ तत्साग्निकोणे हस्तौ द्वौ अधोधः कुक्षिपादकौ ॥ शेषं कोष्ठं
भवेत्पुच्छं पुच्छे सिद्धिरनुत्तमा ॥ करस्थाने महान्क्लेशः कुक्षौ दुःखमवाप्नुयात् ॥ पृष्ठे हानि
स्तथा पुच्छे पीडास्याद्धनासिभिः मोक्षार्थी वदने कुर्यात् शिरो त्वाभिचारिकं ॥ श्रीकामः
पश्चिमे कृत्वा उत्तरे शांतिदं भवेत् ॥ ईशान्ये शत्रुनाशः स्यादाग्नेये शत्रुदायकः ॥ नैरृत्ये श
त्रुभीतिः स्याद्वायव्ये तु पलायनं ॥ ग्रामे देवे च ते वा पि यत्र कन्या वलोकयेत् ॥ दीपस्थाने जपः
कार्यः सर्वसिद्धिमभीप्सुभिः ॥ कूर्मचक्रमसंज्ञाय यः कुर्याज्जपयज्ञकं ॥ तस्य जाप्यफलं ना राम:
स्ति सर्वानर्थायकल्पते इति ॥ होमस्तु ॥ क्षीरौदनतिलाहुत्वा क्षीरद्रुमसमिद्वरैः ॥ पृथक्सहस्र ३०

त्रितयं जुहुयान्मंत्रसिद्धये ॥ तत्संख्यासहस्रासि मंत्रवित् जुहुयात्तिलैः ॥ सर्वपापविनि
र्मुक्तो दीर्घमायुः स विंदति ॥ अरुणाब्जैस्त्रिमधुकैर्जुहुयाद्युतं ततः ॥ महालक्ष्मीर्भवेत्तस्य
द्विजन्मनामियं विद्या षण्मासान्नात्र संशयः ॥ बहुना किमिहोक्तेन यथावत्साधु साधित ॥ द्विजन्मनामियं विद्या
सिद्धा कामदुघा मतेति ॥ ॥ अल्पजपेतु ॥ शौनकः ॥ प्रातर्विप्रः शुचिः स्नातो विष्णाशौदि
सिद्धाकाम्दुघा मतेति ॥ ॥ अल्पजपे तु ॥ शौनकः ॥ प्रातर्विप्रः शुचिः स्नात्वा संकल्प्य तत्त्वेन या
तेद्रियः ॥ अष्टोत्तरसहस्रं वा गायत्रीमष्टोत्तरं तु वा ॥ होमांश्च जपयज्ञांश्च नित्यं कुर्वीत चैतया
॥ सर्वकर्मसमर्थं परं ब्रह्मेदमुच्यते ॥ एषैव प्रतिलोमा स्यात्पापाग्नौ तु विनाशिनी ॥ कपि
लाज्येन च कुर्याद्धोममष्टोत्तरं शतं ॥ तस्य कामाः प्रसिध्यंति षण्मासाद्वै न संशयः इति ॥ इत्य
क्तप्रकारेण यथाशक्ति जपं कृत्वा ॥ ॥ गायत्रीध्यानं ॥ कृत्वा षडंगन्यासान्कृत्वा ॥ उक्त
मे शिरस्येवं ज्ञानदाति विसर्जनं कृत्वा ब्रह्मार्पणं कार्यं ॥ योगी ॥ करैनीरं समादाय देवा गाति
मंत्रतः ॥ निवेदयेज्जपं प्रातः प्रयोगस्तत्र कथ्यते ॥ प्रातः संध्यां गभस्तेन गायत्र्यास्तु जपे

पेनच॥सा्ष्टेनशतसंख्येनब्रह्मामेप्रीयतांरविः॥ ॥इति॥ ॥मुख्यकालेसंध्यावंदनाक
रणेप्रायश्चित्तं॥आह॥आदित्योमुदितोयात्युसंध्योपास्तिमकुर्वतः॥स्नानामार्गाश्चर
स्य्य गायत्र्यष्टशतंजपेत्॥ पारिजाते॥ कालातिक्रमणे चैव चतुर्थार्घ्यंप्रदापयेदिस्म
र्त॥संगवपर्यंतंप्रातःसंध्यागौणःकालः॥ आमदोषावसानेसायंसंध्यायाः॥इतिमंडनः
॥दयानमयाह यंयावत्स्यात्घटिकात्रयं॥नावत्संध्यामुपासीतप्रायश्चित्तमतःपरमिति
स्कांदेविशेषउक्तः॥मध्यान्हेतुदक्षः॥अष्टशतंजप्यंप्रायश्चित्तंनहिजातिभिरिति॥गौ
णकालेप्यसंभवेप्ययमः॥दिवोदितानिकर्माणिप्रमादादकृतानिचेत्॥शर्वर्याःप्रथमेया
मेतानिकुर्याद्यथाक्रमं॥ अत्रमुख्यकालानुरोधात्सायंसंध्योपासनंर्वकृत्वाआग
तनामंतेनिवेशइतिन्यायेनातीतकालंकर्मपश्चात्कार्यमितिमाधवः॥प्रातस्तनस्यनिष
धार्थंयथाक्रममितिनिबंधनमितिमदनपारिजाते॥ दिवोदितानिकर्माणिप्रमादात्कुर्वनाणि
च॥दिवोदितानिकृत्वैवविदध्यादुत्तराणितु इतिसंग्रहोक्तेश्च॥ अवगाहंब्रह्मयज्ञंसौरज राम:
३१

[redacted]यं चवर्जयेत्॥इति॥ ॥स्नानंसंध्यांतस्तत्रन्विप्रःसमाहा
छादितांव्रजेत्॥तस्मात्स्नानंसंध्यांचसूतकेपिनसंत्यजेत्॥सूतकेमनसैवसंध्याकर्मसमा
चरेत्॥मनसोच्चारयेन्मंत्रान्प्राणायाममृतेद्विजः॥प्राणायाममंत्राम्मनसानोच्चार्यादिसर्पः॥पे
ठीनसिः॥सूतकेसावित्र्यांजलिंप्रक्षिप्यप्रदक्षिणंकृत्वासूर्यंध्यायन्नमस्कुर्यादिसर्पेदानां
तांसंध्यामाह॥ अर्घमेत्॥उद्यायिवावाणायत्र्यौदद्यादर्घांजलीनपि॥ अष्टाविंशतिकृत्वोत्रगाय
त्रीमनसाजपेदितिगायत्रीजपमप्याहुः॥अत्रयथाचारंमवसेयं॥आशौचिनोत्रविशेषः
संग्रहे॥दशहस्तःपितृदायोगायत्र्याआशौचभुग्द्विजः॥ततःसंध्यामुपासीतशुध्यतेतदनंतरं॥गो
भिलः॥ ॥संध्यायेनविज्ञातासंध्यानैवाप्युपासिता॥जीवमानोभवेच्छूद्रोमृतःश्वाचाभि
जायतद्दृसादि॥अत्रजपात्संध्यापश्चाहोमयत्रवामुद्रादर्शनीयाः॥ताश्चोक्तागायत्रीहृदयेच
तुर्विंशतिः॥ ॥संमुखं१संपुटं२वितत३विस्तीर्णं४द्विमुखं५त्रिमुखं६चतुर्मुखं७पंचमु
खं८षण्मुखं९अधोमुखं१०व्यापकांजलिकं११शकटं१२यमपाशं१३ग्रथितं१४स

Indira Gandhi National
Centre for the Arts

अ॰क॰ ३२ मुखोन्मुखं।१५।विलंबं।१६।मुष्टिकं।१७।मीन।१८।कूर्म।१९।वराहकं।२०।सिंहक्रांतं।२१।महा
क्रांतं।२२।मुद्गरं।२३।पल्लवं।२४।तत्र।संमुखं संहतौ हस्तावुत्तानौ कुंचितांगुली।।संपुटं पद्म
कोशाभौ तावेवा मोन्य संहतौ।विततं संमुखौ हस्तावुत्तानावायतांगुली।।विस्तीर्णं हनोपारणी मि
थो मुक्तांगुलिद्वयौ।संमुखासक्तपाण्योः कनिष्ठाद्वययोगेन शेषांगुलिनां वैरल्यात् द्विमुखत्रि
मुखादयः।।संमुखेति।संमुखासक्तपाण्योः कनिष्ठाद्वययोगेन शेषांगुलीनां विरलत्वेनांगु
ष्ठद्वयमारभ्यानामिकांतं यावत्।द्विमुख त्रिमुख चतुर्मुख पंचमुखा मुद्राः स्युः।।शेषांगुलीनां
संयोगात् सर्वयोग विनाशनः निर्मितांगुष्ठ मानाग्रौ संयुक्तांगुलि मंडलौ।।हस्तौ षण्मुखमिस्फ
कौ मुद्रा मुद्राविशारदैः।। अत्र सर्वयोगं विनाशनहस्तत्र सर्वयोगः कनिष्ठाद्वययोगस्तद्वि
नाशेन सर्यः।।शेषं सुगमं।।आकुंचिताग्रौ संयुक्तौ मुक्तौ हस्तावधोमुखं।।उत्तानौ नाहशा राम:
चेवव्यापकांजलिकं करौ।।अधोमुखौ बद्धमुष्टी बद्धाग्रांगुष्ठकौ करौ।।शकटनामकथीतामिति।। ३२
बद्धमुष्टिकयोपाण्योरुत्तानावामतर्जनी।।कुंचिताग्राऽन्यथा युक्ता तर्जन्यामुन्नवक्रया।।पम

पाशामिति।। ।।अस्यार्थः।।बद्धमुष्टिकयोः पाण्योर्मध्ये उत्तानाकुंचिताग्रावामतर्जनी साऽन्य
याद्दक्षिणतर्जन्यायुक्तवक्राया पक्वायमपाशमुद्रेति।।उत्तानसंधिसंलीनबद्धांगुलिदलौ क
रौ।।समुपर्यादितो दीर्घा वेगु सो ग्रथमुच्यते।।उत्तानानि संधिसंलीनानिबद्धान्यंगुलिदलानि
ययोस्तातयोः करौ।।शेषं सुगमं।।संचितोर्ध्वांगुलिर्वाम स्ताहस्तादक्षिणेन तु।।अधोमुखे
न संयुक्तः संमुखोन्मुख उच्यते।।उत्तानोन्नत कोष्ठी च विलंबः कथितः करौ।।मुष्टिचान्यो
न्यसंसक्तावुत्तानौ मुष्टिको भवेत्।।मीनस्कसंमुखी भूतौ युक्तानामक कनिष्ठिकौ।।ऊर्ध्वसं
युक्तकं षक्ताग्रशेषांगुलिदलौ करौ।।युक्तं संयुक्ते अनामिककनिष्ठिके ययोस्तौ तथोक्तौ।।
तावेवोन्य संमुखौ भूतौ।।तथा।।ऊर्ध्वयुक्तानिवक्राग्राः शेषांगुलिदलानि ययोः क
रयोस्तौ मीनोनाम मुद्र।।अधोमुखकरे वामस्मात् पश्चाद्दक्षिणेन तु।।एष्ठदेशे समाक्रांतः
कूर्मो नानाभिधीयते।।ऊर्ध्वमध्योनाम भुजो दक्षकक्षाश्रयेकरे।।वराहेति।।दक्षकक्षाश्रय
करेस्तत्कूर्कलस्थणेवाम भुजोवा गहो ज्ञानमुद्र।।तथातथांगुली सिंहाक्रांतकर्णा श्रि

Indira Gandhi National
Centre for the Arts

श्रा॰कं॰ ३३ तोत्करौ॥ किंचिदाकुंचिताग्रौ चेन्महाक्रांतनतः परं॥ तावेवकुंचिताग्रौ महाक्रांतेन नाम मुद्रा
॥ उर्ध्वौ किंचिन्नतौ पाणी मुद्गरो गामतर्जनी॥ अस्यार्थः॥ किंचिदूर्ध्वगतयोः पाणोर्यदा
मतर्जनीदक्षिणहस्तेन गृहीता सा मुद्गरमुद्रा॥ अधोमुखः स्थितो मध्ये पल्लवोदक्षिणः
करः। अस्यार्थः॥ उत्कलहस्तवामतर्जन्या मध्ये अधोमुखस्थितो दक्षिणकरः पल्ल
वो नाममुद्रेति॥ नजानुदर्शयेन्मुद्रां महाजनसमागमे॥ द्वेवास्तसनपश्यंति विफलं च भवेत्तम्भ
वेदितितस्माद्रहस्येव मुद्रा दर्शनीयाः॥ अत्रावसरे गायत्रीतर्पणमुक्तं॥ शौनकेन॥ अर्घ्या
न्ते वा जपान्ते वा प्रागासीनः कुशासने॥ संध्यासु तर्पणं कार्यं सारूप्यादिकं ततः॥ ऋषि
र्मासः समुद्दिष्टो अस्यादेवतमुच्यते॥ छंदो गायत्रकं चैव विनियोगस्तु तर्पणे॥ सवितृप्रीत
ये गायत्रीतर्पणमहं करिष्य इति संकल्प्य ॐ भूः पुरुषऋग्वेदं तर्पयामि॥ ॥ॐ भुवः पु
रुषयजुर्वेदं त०॥ ॐ स्वः पुरुषसामवेदं तर्पयामि॥ ॐ महः पुरुष अथर्ववेदं तः॥ ॐ जनः रामः
पुरुषइतिहासपुराणं त०॥ ॐ तपः पुरुषसर्वागमं त०॥ ॐ सत्यं सत्यलोकं त०॥ ॐ भूर्भुवः स्वः ३३

पुरुषमंडलांतर्गतं त०॥ ॐ भूः एकपदां गायत्रीं त०॥ ॐ भुवः द्विपदां गायत्रीं त०॥ ॐ स्वः त्रिप
दां गायत्रीं०॥ ॐ भूर्भुवः स्वः चतुष्पदां गायत्रीं त०॥ ॐ उषसं० ॐ गायत्रीं० ॐ सावित्रीं० ॐ स
रस्वतीं० ॐ वेदमातरं० ॐ पृथिवीं० ॐ जयां० ॐ कौशिकीं० ॐ सांकृतीं० ॐ सर्वापराजि
तीं० ॐ सहस्रमूर्तिं० ॐ अनंतमूर्तिं० मंत्रैरेभिस्क्रमोनिसं चतुर्विंशति संमितैः॥ गाय
त्रीं तर्पयेत्तेन तर्पितं स्याच्चराचरं॥ अनेन विधिना कुर्यात् प्रातःकाले च तर्पणं॥ मध्याह्ने
चैव सायाह्ने मंत्रैरेतैस्तु तर्पणमिति गायत्रीकल्पे॥ इति प्रातः संध्याविधिः॥ छ॥ अथाभि
वादनं॥ पात्तवेल्व्यः॥ संध्यां च विधिवत्कृत्वा संध्योपासनयोरपि॥ ततोभिवादयेद्वृद्धानसाव
हमिति ब्रुवन्॥ यमः॥ अग्नचोदीक्षितानाना म्रायपवीयान पियो भवेत॥ भोभवास्वैकं स्वेनम
भिभाषेत धर्मवित्॥ मनुः॥ विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु वीर्यतः॥ धनधान्येन वै
श्यानां शूद्राणां चैव जन्मतः॥ आपस्तंबः॥ आयुष्मान्भव सौम्येति वाच्यो विप्रोऽभिवाद
ने॥ अकारश्चास्य नाम्नोन्ते वाच्यः पूर्वाक्षरः प्लुतः॥ पाणिनिरपि॥ प्रत्यभिवादेऽशूद्रे इति॥

Indira Gandhi National
Centre for the Arts

श्र·कं· ३४

प्रत्यभिवादेरे: त्वसुनोभवतिन तु प्रदूर्तीति सूत्रार्थः ॥ तथा चायं प्रयोगः ॥ आयुष्मान्भव सौम्य देवदत्ता ३ इत्यादि ॥ योनवेत्त्यभिवादस्याविप्रः प्रत्यभिवादनं ॥ नाभिवंद्यः स विदुषा यथा शूद्रस्तथैवसः ॥ बृहस्पतिः ॥ ॥ जपयज्ञजलस्थं च समित्पुष्पकुशानलान् ॥ उदपात्राघभैक्षान्नं वहंतं नाभिवादयेत् ॥ पारवंडं पतितं व्रात्यं महापातकिनं शठं ॥ सोपानत्कं कृतघ्नं च नाभिवादेत्कदाचन ॥ मनुः ॥ यस्य देशं न जानाति स्थानं भिक्षुकं सेल ॥ कर्म· ३४
पानत्कं कृतघ्नं च नाभिवादेत्कदाचन ॥ मनुः ॥ यत्सदेशं न जानाति स्थानं पिशुकं पुंकु लं ॥
कन्यादानं नमस्कारं श्राद्धं तस्मै विवर्जयेत् ॥ बृहन्नारदीये ॥ सभायां यज्ञशालायां देवतायतनेष्वपि ॥ प्रत्येकं तु नमस्कारो हंति पुण्यं पुराकृतं ॥ तस्मात्कुर्यात्सकृदेव नमस्कुर्यादिति भावः ॥ ॥ संध्यायां तु यमोक्तो विशेषः ॥ ज्यायान्पितृकनीयां सं संध्यायामभिवादयेत् ॥ विना पुत्रं च शिष्यं च दौहित्रं दुहितुः पतिं ॥ स्मृत्यंतरे तु ॥ सर्वेषां च नमस्कार्याः सर्वावस्थासु सर्वदेति ॥ अत्र सो विशेषो ब्रह्मचारिविधाने द्रष्टव्यः ॥ छ ॥ अथ पातर्होमः ॥ दक्षः ॥ संध्याकर्मावसाने तु स्वयं होमो विधीयते ॥ स्वयं होमे फलं यत्तु तदन्येन न इद्ध मुच्यते ॥

॥ स्मृत्यर्थसारे ॥ यजमानः प्रधानं स्यात्पत्नी पुत्रश्च कन्यका ॥ ऋत्विक्शिष्योगुरुर्भ्राता भागिनेयः सुतापतिः ॥ एतैरेव हुतं यत्तु तद्धुतं स्वयमेव तु ॥ पत्नीकन्याच जुहुयात् विना पर्वकृ एण क्रियामित्यादि ॥ यजमानस्य तत्पत्न्या वासंनिधाने न्येन होतव्यं ॥ सागकर्त्रा यजमानपत्नी वा ॥ उन्मादप्रमादावयोपि ॥ तथा ॥ नोपवासी प्रवासेस्यात्पत्नी धारयते व्रतं ॥ सर्वदा यजमानो वा सन्नेत्रादि शुस्वः शुचिः ॥ आपदि पक्षहोमः कार्यः ॥ मरीचिः ॥ पक्षहोमं प्रकुर्वीत प्रवसन्नग्निमान्यदि ॥ ॥ पंचयज्ञविधानं तु लौकिकेग्नौ विधीयते ॥ बृहस्पतिः ॥ मत्स्यबंधामवतुः षष्ठि गृहते: परिकीर्तितं ॥ तिलानां तु नदर्भ स्यान्नदर्भ स्याद्व्रतस्पतु ॥ कात्यायनः ॥ एणपनुक्तिद्वे दशापर्वपूर्णिकाघृतादिना वेन्सुवस्य मात्रिकेति ॥ नलिकादिन मिधमनं ॥ नमुखेन नमदनपाणिजाते ॥ गोभिलः ॥ अग्निहोत्रस्य होमार्थं शुद्धिस्नात्वा लौकिकी भवेत् ॥ पंचयज्ञान्नकुर्वीत ह्यशुद्धः पुनरेव सः ॥ जातकरणपः ॥ सूतके च समुत्पन्ने स्मार्तं कर्म कथं भवेत् ॥ पिंडयज्ञं चरुं होमं असगोत्रेण कारयेत् ॥ बृहस्पतिः ॥

Indira Gandhi National
Centre for the Arts

अ.क.
३५

सूतके मृतके चैव अशक्तौ श्राद्धभोजने ॥ प्रवासादि निमित्तेषु होतव्येन्वाहुहापयेदिति ॥ रा
त्रेस्तु षोडशे भागे ग्रहनक्षत्रभूषिते ॥ कालं त्वनुदितं ज्ञात्वा होमं कुर्याद्विचक्षण इति का
लापनवचनं वाजसनेयिविषयं ॥ उपयमनसमित्सोपासनस्य परिचरणासमर्थानां
दितपीति सूत्रात् ॥ उदितहोमस्त्वाश्वलायनापस्तंबादीनां ॥ तत्सूत्रे तथा विधानात्
॥ अत्र यद्व्यंसायंतेदेवप्रातः ॥ एवं कर्त्रापि ॥ मुख्यकालासंभवे गौणकालमाह मदनः
स्वकालादुत्तरो गौणः कालः पूर्वस्य कर्मणः ॥ यद्वा गामि क्रियामुख्यकालस्याप्यंतरालव
त् ॥ गौणकालत्वमिच्छंति केचित्प्राक्तनकर्मणीति ॥ अस्यार्थ उक्तो मदनपारिजाते ॥ ॥
॥ स्वकालात्यत्काले कर्म विहितं तस्मान्मुख्यकालादुत्तरो यः कालः उत्तरकर्मकालावधिकः
स पूर्वकर्मणो गौणकालः ॥ यद्वा आगामिकर्मणो यो मुख्यकालस्तस्यापि पूर्वकर्मणि केचि
द्गौणकालत्वमिच्छंति ॥ तत्र दृष्टांतः ॥ अंतरालवदिति ॥ यथा पूर्वोत्तरकर्मणोर्मध्यका
लस्तद्वदयमपीत्यर्थः ॥ उत्तरकर्मकाले पूर्वोत्तरकर्मणोः समावेशोयदेतिपक्षः ॥ तदसमा

वेशेनु अंतरालमेव गौणइति व्यवस्था ज्ञेया ॥ सर्व गौणे यथाशक्त्या यथा कुर्यादित्युपबंधा
दिति माधवाद्युक्ति तंत्रभानेतत्मरश्च्युपतिनिधिग्रहणस्योचितत्वादपवर्गकेषु नित्यनैमित्तिके
ष्वेव मुख्यकालासंभवे गौणानुकल्पोपीति ॥ नन्वेवं दर्शश्राद्धादेरमावास्यादिविहितकालाति
क्रमे गौणकालकर्तव्यतास्यादिति चेन्न ॥ अत्रोच्यते ॥ कोन्नो हे ग्रोनकर्मविधीयते ॥ नक
र्मणि कालः ॥ तस्मानुपादेयत्वात् ॥ तथा च कालो निमित्तं निमित्तभूतकालाभावे वाधिका
राभावात्स्मकाले कृतं कर्माकृतमेवेति न तत्र गौणकालग्रहणं ॥ यानि तु मुख्यकालसंभवे
गौणकार्याणि तिवाचनिकानि तान्येव गौणकार्याणि ॥ यथा कथं विलंबेनैव नित्यसंक्रमादेव
ज्ञानता ॥ तथा समस्तविज्ञेयो तिपंतकस्मादिशेषतः ॥ दिवोदितानिकर्माणि प्रमादादकृता
नि राज्याः प्रथमप्रहरे कार्याणीति ॥ पैतृकं तु मासिकश्राद्धं श्राद्धविघ्नेस मुत्पन्ने कदाचन त
त्कादिना ॥ सूतकान्ते तु तत्कार्यं पुनस्तदहरेव चेति क्षयाहं प्रकृत्याक्तेः ॥ दर्शश्राद्धादौ वचन
भावान्न गौणकालकर्तव्यतेति संक्षेपः संजस्स्रमितं लेविस्तरेण ॥ अत्र प्रापात्रे तादिस

राम:
३५

Indira Gandhi National
Centre for the Arts

अ॰क॰ वविशेषश्चौपासनविधानेद्रष्टव्यः॥ औपासनानंतरंब्रह्मयज्ञकालः॥ ॥पश्चाद्धात्र
३६ नराहुतेरितिकात्यायनोक्तेः॥ अत्रासंनवेतर्पणंसर्वैकार्यः॥ अत्रावसरेदेवतानि
र्माल्योद्वासनमुक्तं॥नारदीये॥ अपसारितनिर्माल्यंनरणोःकिरणात्स्मरः॥ ॥
पूजकस्ततःकुर्यादासनादिकमात्मनः॥ अविवाहितकन्या च अस्नाताचरजस्वली॥ देव
ताचसनिर्माल्याहंतिपुण्यंपुराकृतमिति॥ किरणात्किरणोदयादित्यर्थः॥मरीचिः॥वि
दध्यादेवताराज्ञांप्रातर्होमादनंतरं॥ स्थंडिलेप्रतिमायांवाहृन्नोवाहृदयेपिवेति॥ ॥
इतिप्रातर्होमविधिः॥ ॥अथनित्यदानं॥याज्ञवल्क्यः॥दातव्यंप्रत्यहंपात्रेनिमित्तेषु
विशेषतः॥याचितेनापिदातव्यंश्रद्धापूतंतुशक्तितः॥ अहन्यहनियत्किंचिद्दीयतेऽनुप
कारिणे॥ अनुद्दिश्यफलंतस्माद्ब्राह्मणायतुनित्यकमिति॥हेमाद्रौ॥गत्वायद्दीयतेदानं
तदानंतफलंस्मृतं॥सहस्रगुणमाहूययाचितेतुतदर्धकं॥ग्रासादर्धमपिग्रासंसार्थिभ्यः राम:
किंनदीयते॥इच्छानुरूपोविभवःकदाकस्यभविष्यति॥ अस्नात्वाश्रीमलेभुंक्तेअजपीपु ३६

यश्चाग्निहीनं॥ अहत्वाग्निंकृमीन्भुंक्तेअदत्वाविषमश्नुते॥ देयवस्त्वाहयाज्ञवल्क्यः॥गो
भूतिलहिरण्यादिपात्रेदातव्यमर्चितं॥नापात्रेविदुषाकिंचिदात्मनःश्रेयइच्छता॥ अत्रनापा
त्रइत्यनेनद्रव्यादिसत्त्वेऽपात्रेऽसंनिहितेतदुद्देशेनसंगतंपूर्वप्रतिश्रवणंवाकृत्वार्पयेन्नत्वपा
त्रेदेयमितिसूचितं॥प्रतिश्रुत्यापितन्नापात्रायदद्यादितिवचनात्॥ अपात्रेदाननिषेधात्॥ अनधि
कारिणानग्राह्यं॥ विद्यातपोभ्यांहीनेननतुग्राह्यःप्रतिग्रहः॥ गृह्णन्प्रदातारमधोनयत्यात्मान
मेवचेतिस्मृतेः॥ अत्रैतिकर्तव्यताविशेषश्चानुपदस्तवकेज्ञेयः॥ अत्रस्त्रीशूद्रोभर्तृकृतपुण्य
मर्धंलभते॥ तदुक्तंहेमाद्रिणा॥ ॥यद्देवेभ्योयच्चपित्रादिकेभ्यःकुर्याद्भर्ताभ्यर्चनंसत्क्रि
यांच॥तस्यार्धंसाप्तफलंनान्यचित्तानारीभुंक्तेभर्तृशुश्रूषयैव॥यावंतःपंतिभर्तारंयोनिहन्या
स्यपाःस्त्रीयाःस्त्रीयः॥ योनिदोषात्पुण्यफलेनाश्नतिनिरयंगमाः॥ अनाम्नायमलावेदा
ब्राह्मणस्याव्रतंमलं॥ कौतूहलंमलंमाध्यामलंदानस्यकीर्तनमिति॥ ॥इतिनित्यदानं
॥ ॥अथमंगलावेक्षणं॥दक्षः॥दिवसस्याद्यभागेतुकृत्वाग्रहमंगलवीक्षणं॥रोचनंचंदनंहे

आ॰का॰
३७

ममच्छंदं गंदर्पेणं मणिं॥ तथा॥ गुरुत्वनर्मी श्वसर्पे वप्रानः पश्येत्सदा बुधः शतिः॥ भारते॥ वृद्धो ज्ञातिर्थ
यामित्रं दरिद्रो यो भवेदपि॥ गृहे वासयितव्यास्ते धन्यमायुष्यमेव च॥ गृहोपारावताः धन्यास्तुकाः
श्च सहसारिकाः॥ गृहे ष्वेतेन पापास्स्युर्न पार्वतैलपायिकाः॥ उदीपकाश्च गृध्राश्च कपोता
भ्रमरास्तथा॥ अमंगलानि चैतानि तथाक्रोशो महात्मना॥ कात्यायनः॥ श्रोत्रियं सुभगां
गाम् अग्निमग्निचितमेव च॥ प्रातरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यते॥ श्रोत्रियलक्षणं
भारते॥ जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते॥ विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय
उच्यते॥ याज्ञवल्क्यः॥ स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति॥ एकदेशमुपाध्याय ऋत्वि
ग्यज्ञकृदुच्यते॥ नारदः॥ लोकेऽस्मिन्मंगलान्यष्टौ ब्राह्मणो गौर्हुताशनः॥ हिरण्यं सर्पिरादित्य
आपो राजा तथाष्टमः॥ एतानि सततं पश्येन्नमस्येदर्चयेद्बुधः॥ प्रदक्षिणानि कुर्वीत यस्त्वसा
युर्न हीयते॥ इति मंगलावेक्षणं॥ मन्नागदेव भट्टात्मज श्रीमदनंतभट्टविरचिते विधानपारि
जाते इति श्री आह्निक विधौ दिनप्रथमभागकृत्यं समाप्तं॥ ०॥ अथ द्वितीयभागे धर्मनेकृ

ज॰२

र्य॥ तत्र दक्षः॥ द्वितीये च तथा भागे वेदाभ्यासो विधीयते॥ समित्पुष्पकुशादीनां स कालः समुदा
हृतः॥ वेदाभ्यासोऽनेकधा भवति॥ वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः॥ तद्दानं चैव शिष्येभ्यो
वेदाभ्यासो हि पंचधेति॥ तत्र तावद्ब्रह्मादिकमुच्यते॥ ऋग्वेदस्याग्निर्देवता गायत्री छंदः अध्ययनादौ विनियोगः॥ अध्यापनं च॥ गुरुं चैवाप्युपासीत स्वाध्यायार्थं समाहितः॥
आहूतश्चाप्यधीयीत लब्धं चास्मै निवेदयेदिति विधिना कर्तव्यं॥ अधीत्य वेदार्थो विगंतव्यः॥ आधीत्य वि
धिवद्वेदं वेदार्थं न विचारयेत्॥ ससान्वयः शूद्रसमः पात्रतां न प्रपद्यत इति स्मृतेः॥ कृतज्ञाद्रोहिमे
धाविशुचिकल्यानसूयकाः॥ अध्याप्या धर्मतः साधुशक्तात्सज्ञानवित्तदाः॥ कल्प आधिमा
विरहितः॥ शक्तो गुरुशुश्रूषायां॥ स्पष्टमन्यत्॥ एते कृतज्ञत्वाद्यो धर्माः व्यस्ताः समस्ता
वा पधार्संभवं ज्ञेयाः॥ वेदाभ्यासरतं क्षांतं महायज्ञक्रियारतं॥ न स्पृशंतीह पापानि महापा
तकजान्यपि॥ मनुः॥ न निंदा ताडने कुर्यात्पुत्रं शिष्यं च ताडयेत्॥ अधोभागे शरीरस्य नोत्त
मांगे न वक्षसीत्यादि॥ अथानध्यायाः॥ उशना॥ अयने विषुवे चैव शयने बोधने तथा॥ अ

ग्रते ५

Indira Gandhi National
Centre for the Arts

नध्यायंप्रकुर्वीत मन्वादिषु युगादिषु ॥ अर्हमेतेषु नध्यायः शिष्यर्त्विग्गुरुबंधुषु ॥ उपाकर्म
आ०का० णि चोत्सर्गे स्वशाखाश्रोत्रिये मृते ॥ चतुर्दशं पंचदशं अष्टमी राहुसूतके ॥ ऋतुसंधिषु
भुक्त्वा च श्राद्धिकं प्रतिगृह्य च ॥ इदं चैकोद्दिष्टव्यतिरिक्तविषयं ॥ महैकोद्दिष्टे त्र्यहं न कीर्त
३८ येद्ब्रह्मेति विशेषोक्तः ॥ ॥ पशुमंडूकादिभिरंतरागमने ऽहोरात्रमनध्यायः ॥ दिशोस्तु चान्या
न्यानि चेति सप्तत्रिंशदनध्यायाः याज्ञवल्क्योक्तास्तात्कालिकाः ॥ तथा ॥ रात्रौ यामद्वयाद
र्वाक् पदिपश्येत्त्रयोदशी ॥ प्रदोषः स तु विज्ञेयश्चतुर्थीपर्द्धयामगा ॥ सप्तमी सार्द्धयामस्था
प्रदोषोऽधीतिवर्जित इति ॥ अत्र स्मो विशेषो ब्रह्मचारिप्रकरणे द्रष्टव्यः ॥ इति श्री विधानपा
रिजाते आह्निकविधौ द्वितीयभागस्तसं ॥ ४ ॥ अथ धनार्जनविधिः ॥ दक्षः ॥ दत्तीमेच न
याभागेयो ब्रवर्गार्थसाधनं ॥ योऽपवर्गस्तु ॥ माता पिता गुरुर्भार्या प्रजादीनः समाश्रितः ॥ राम:
अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्ग उदाहृतः ॥ योगीश्वरः ॥ उपेयादीश्वरं चैव योगक्षेमार्थ ३८
सिद्धये ॥ ईश्वरमभिषेकादिगुणयुक्तमन्नवा श्रीमंतं ॥ अलब्धलाभो योगः ॥ लब्धस्य रक्ष

णं क्षेमः ॥ मनुः ॥ सप्तवित्तागमा धर्म्या दायो लाभः क्रयो जयः ॥ प्रयोगः कर्मयोगश्च सत्प्र
तिग्रह एव च ॥ दायोऽन्वयागतं धनं ॥ लाभो निधिदर्शनं ॥ प्रयोगः कर्मयोगश्च सत्प्रतिग्रह ए
व च ॥ दायोऽन्वयागतं धनं ॥ लाभो निधिदर्शनं ॥ प्रयोगो वृद्ध्यर्थं धनप्रदानं ॥ कर्मयोगः कृ
ष्यादिः ॥ इदं तु विप्रादिर्येषां योग्यं तत्तेषां ॥ तथा हि ॥ अध्यापनमध्ययनं यजनं याजनं तथा ॥
दानं प्रतिग्रहश्चैव षट्कर्माण्यग्रजन्मनः ॥ षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीवि
का ॥ याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥ प्रधानं क्षत्रिये कर्म प्रजानां परिपालनं ॥
कुसीदकृषिवाणिज्यं पाशुपाल्यं विशः स्मृतं ॥ कुसीदाद्वृद्धिजीवने ॥ स्वदम्याहिस्तु शुश्रू
षात माऽजीवन्नाशिमेवंवेत् ॥ शिल्पैर्वा विविधैर्जीवेद्द्विजातिहितमाचरन् ॥ मनुः ॥ अद्रोहे
णैव भूतानामल्पद्रोहेण वा पुनः ॥ या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि ॥ ऋतामृ
ताभ्यां जीवेत्तु मृतेन प्रमृतेन वा ॥ सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन ॥ ऋतमुंछशि
लं ज्ञेयममृतं स्यादयाचितं ॥ मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतं ॥ सत्यानृतं तु वाणिज्यं

Indira Gandhi National
Centre for the Arts

आ॰ का॰ ३९

तेनन्नैवापिजीवंते॥सेवाश्वहत्तिरारव्यातातस्मात्तांपरिवर्जयेत॥तथा॥कुसूलकुंभीधान्योवात्र्यहि
कोःश्वस्तनोपिवा॥ ॥कुसूलकोष्ठकं॥कुंभीउष्ट्रिका॥ताभ्यांपूरितंधान्यंयस्यसतथोक्त
:॥त्र्यहर्यीतसधान्यंयस्यसत्र्यहिकः॥नास्तिश्वस्तनंधान्यंयस्यसोःश्वस्तनः॥कुसूलधान्या
दिसंग्रहोपायमाहयाज्ञवल्क्यः॥जीवेद्वापिशिलोंछेनश्रेयानेषांपरःपरः॥शालादेर्नि
पतितनपरिग्रहकवल्लरीग्रहणंशिलं॥एकैकस्यकणस्यग्रहणंउंछः॥एषांकु
सूलधान्यादीनामध्येपरःपरउत्तरोत्तरःश्रेयान्प्रशस्यतरइत्यर्थः॥एतद्यातिसंयतंयायाव
रंप्रत्युच्यते॥ ॥नशालीनमति॥एतद्वैविध्यंसिद्धेनोक्तं॥द्विविधोगृहस्थोयायावरःशालो
नश्चेति॥तत्रासंभनोयायावरः॥शालीनस्तुप्रेष्यचतुष्पदधनधान्यादियुक्तः॥शालीनस्या
पिवानुत्तिध्यमुक्तंमनुना॥षट्कर्मैकोभवत्येषांत्रिभिरन्यःप्रवर्त्तते॥द्वाभ्यामेकश्चतुर्थस्तु
ब्रह्मसत्रेणजीवति॥अत्रषट्कर्माणियाजनाध्यापनप्रतिग्रहकृषिवाणिज्ययाशुपाल्या राम: ३९
नि॥शांघंसुगमं॥कुमतुसंरणे॥देवेभ्यश्चपितृभ्यश्चदयान्सागंतुविंशकं॥ ॥त्रिप्राम्दा

त्यागंतुविदःपांकृषिंकृत्वानदोषभाक॥कृषिप्रकारोयंद्रुपाराशरेद्रष्टव्यः॥छ॥आपा
यदिप्रतिग्रहहृतिः॥चतुर्विंशतिमते॥सीदंस्रेत्प्रतिगृह्णीयाद्ब्राह्मणोःश्वस्ततोन्नपात
॥ततस्तूवैश्यशूद्राभ्यःशूरस्यवचनंमथा॥असीदनस्तु॥ ॥विद्यमानेधनेपस्तुप्र
तिग्रहरूविर्हिजः॥रौरवंनरकंप्राप्यतत्रेवपरिपच्यातइतिव्यांमक्रमाकलनीयं॥याज्ञव
ल्क्योपि॥राज्ञांनेवाल्पियाज्ञेभ्यःसीदत्रिछेद्धनंक्षुधा।दंभिहैतुकपाखंडिबकवृत्तांश्चवर्ज
येत्॥एकिवलेनसर्वत्रसंशयकारीहैतुकः॥राजात्रन्यायकृत्यापपरः॥ननुराज्ञमाद्या।प्रेरा
न्नःप्रतिगृह्णातिलुब्धस्योच्छास्त्रवर्तिनः।सपर्यायेणयातीमान्नरकानेकविंशतिमितिमा
यदराजप्रतिग्रहेनिषेधश्रवणात॥ ॥याज्ञवल्क्योपि॥प्रतिग्रहेसूनिचक्रिध्वजिवेश्या
नराधिपाः।दुष्टादशगुणंपूर्वात्पूर्वादेतेपयाक्रमं॥सूनीप्राणिहिंसापरः॥चक्रीतैलि
कः॥ध्वजीसुराविक्रयी॥वेश्यापण्यस्त्री॥पमोपि॥अराजप्रसूतस्यराज्ञःषंडदवर्त्ति

Indira Gandhi National
Centre for the Arts

आ॰क॰
४०

नः॥ घोरः प्रतिग्रहस्तस्य मध्वास्वादो विषोपमः॥ तथैव राजमहिषी राजामात्याः पुरोहि
ताः पापेनानेन संयुक्ताः सर्वे ते राजधर्मिणः॥ भारं ते दानधर्मो वै दक्षिणाश्चैव वैद
नां चैव दूषकाः॥ वेदानां लेखकाश्चैव ते वै निरयगामिनः॥ मनुः॥ एधोदकं मूल
फलमन्नमभ्युद्यतं च यत्॥ सर्वतः प्रतिगृह्णीयान्मध्वथाभयदक्षिणां॥ सर्वतः शूद्रादपि॥ अ
भयदक्षिणां तु म्लेच्छादपीति श्लोकार्थः॥ अत्र विशेषो विष्णुपुराणे॥ संप्रोक्ष्य विप्रो गृह्णीया
न्मध्वथाभयदक्षिणां॥ सर्वतः शूद्रादपि॥ अभयदक्षिणां तु म्लेच्छादपीति श्लोकार्थः॥ अत्र
विशेषो विष्णुपुराणे॥ संप्रोक्ष्य विप्रो गृह्णीयाच्छूद्रान्नं गृहमागतमिति॥ अत्र शूद्रान्नमा
मान्नं॥ नीचाच्छूद्रस्य पक्वान्नं विकुलस्य प्रदीयते॥ आददीतामम् एतस्मादवृत्तावेकरात्रि
कमिति मनुरुक्तेः॥ तथा॥ आममांसं मधु घृतं धानाः क्षीरं तथैव च॥ गुडं तक्रं रसं ग्राह्यं निवृ
त्तेनापि शूद्रतः॥ याज्ञवल्क्योपि॥ कुशाः शाकं पयो मत्स्या गंधाः पुष्पं दधि क्षितिः॥ मां
सं शय्यासनं धानाः प्रत्याख्येयं न वारि च॥ चकारान्मृहादि॥ अयाचिताहृतं ग्राह्यमपि दु

नीतघ्रा ४

एम:
४०

ष्कृतकर्मणः॥ अन्यत्र कुलटाषंढपतितेभ्यस्तथा द्विषः इति विशेषोक्तेः कुलटादेः प्रत्याख्येय
मेव॥ अयमुपदेशः प्रतिग्रहमप्यत्र स्वेच्छया तु निहन्त स्वीति विज्ञानेश्वरः॥ ॥ अथापद्वृत्तिः॥ बृह
स्पतिः॥ अजीवन् स्वकर्मणा स्वेन विप्रः क्षात्रस्य समाश्रयेत्॥ वैश्यकर्माथवा कुर्याद्धीनकर्म विवर्जये
त्॥ कौर्म्ये॥ कुसीदकृषिवाणिज्यं प्रकुर्वीतास्वयं कृतं॥ स्वपरमार्थवाणिज्यं तद्भावे कुसीदकं॥ कु
सीदोक्तं द्विजीवनं॥ सद्धिमाह याज्ञवल्क्यः॥ अशीतिभागो वृद्धिः स्यान्मासि मासि सबंधके॥ व
र्णक्रमाच्छतं द्वित्रिचतुःपंचकमन्यथा॥ अशीतिभागः अशीतितमो भागः॥ अन्यथा वंध
करहिते प्रयोगे वर्णक्रमाद्द्वित्रिचतुःपंचकं शतं धर्म्यं भवति॥ अयं भावः॥ ब्राह्मणो धमर्णो हि
कं शतं द्वौ भागौ अस्मिन्बंधके द्वितीयत इति द्विकं शतं॥ नृसिंहस्य पलाभशुल्को यद्दीयते
इति स त्रैणक त्रयेक्ष त्रियादौ त्रिकादिशतं प्रतिमासं ज्ञेयं॥ विशेषांतरमाह मरुच्च॥ कांता
रगाः स्वदशकं सामुद्रा विंशकं शतं॥ दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु॥ मनुः॥ नाति

Indira Gandhi National
Centre for the Arts

आ·क०
४१

सांवत्सरीकहिंनाभीष्टांतुपुनर्हरेत्॥ चक्रवद्भिः कालिकावाकारिकाकायिकाचया॥ द
हे हि द्विगुणचक्रवद्भिः प्रतिमासंतुकालिका॥ इच्छाकृताकारिकास्यात्कायिकाकायकर्मणा॥
हीनजातिंप्रविश्यैरामप्रणांर्थकर्मकारयेत्॥ ब्राह्मणास्त्वपरिक्षीणाःशनैर्द्रव्योयथोदयं॥
मनुः॥ वानस्पत्यंफलंमूलंदार्वग्न्यर्थंतथैवच॥ तृणंचगोभ्योग्रासार्थमस्तेयंमनुरब्रवी
त्॥ यत्तुभारतेलिखितस्याश्वत्थफलंप्रभृतेर्हस्तकर्तनंतत्प्रकारांतरेणनिर्वाहेसतिज्ञे
थानकार्यमिसेदनर्थमिसवषेयं॥ अंगिराः॥ व्याधितस्यदरिद्रेणनिर्वाहेसतितथान
कार्यमिसेदनर्थमिसवषेयं॥ अंगिराः॥ व्याधितस्यदरिद्रस्यकुटुंबात्प्रच्युतस्यच॥ अ
ध्यानंवाप्रहतस्यभिक्षाचर्यंविधीयते॥ देवलः॥ याजनंयोनिसंबंधस्वाध्यायंसहभो
जनम्॥ कृत्वासद्यःपतत्येवपतितेननसंशयः॥ उशना॥ पतितान्नमादद्याद्भुक्त्वा वाब्राह्म ग्रासः
णोयदि॥ कृत्वातस्यसमुत्सर्गमतिकृच्छ्रंसमाचरेदिति॥ इतियोगक्षेमविधिः॥ अथ

चतुर्थभागकृत्यम्॥ दक्षः॥ चतुर्थेतुतथाभागेस्नानार्थंमृदमाहरेत्॥ तिलपुष्पकुशादी
निस्नानंचाकृत्रिमेजले॥ नदीषुदेवखातेषुतडागेषुसरःसुच॥ स्नानंसमाचरेन्नित्यंगर्तप्र
स्रवणेषुच॥ मंत्रपूतैर्जलैःस्नानमाहुःस्नानफलप्रदं॥ नह्यथावारिमग्नानांयादस्नामि
वतत्समं॥ योगी॥ ब्राह्मणैःस्नातुमायातैःसहगच्छंतिदेवताः॥ पितरश्चापिगच्छंतिवायु
भूताजलार्थिनः॥ गत्वोदकांतेविधिवत्स्थापयेन्नान्यथाक्षितौ॥ तान्मृदादिसंभाग
न्॥ त्रिधाकृत्वामृदंतानुगोमयंचविचक्षणः॥ मृदैकपाणिरःक्षाल्यद्वाभ्यांनाभेरधोप
रि॥ अधश्चतिसृभिःकार्यःषड्भिःपादौतथैवच॥ मृशाल्यसर्वकायंचद्विराचम्ययथाविधि
॥ मंत्रन्मस्तोगपनीतंयन्नोद्दुर्नकुलादवनेतिमंत्रतः॥ कंठस्थमेवोपवीतंस्थीलनीयमितिकं
॥ तत्रविशेषोदहदान्हिके॥ तैत्राभंत्राःकराःकारावापित्रवाजसनेयिनः॥ कंठादुनयिस्त्रं
तुकुर्वीरनक्षालनंद्विजाः॥ बहूचाःसामगाश्चैवपंचागेयानुषाअपि॥ कंठादुर्ध्वंस्त्वतु

Indira Gandhi National
Centre for the Arts

आ॰ क॰ ४२ पुनः संस्कारमार्हति ॥ तथा ॥ लक्ष्मीमेवावगाहेत पदिस्याद्दक्षिणो नरः ॥ आचम्य विधिवत्पश्चात्
ततः स्नानं समाचरेत् ॥ यमः ॥ सपवित्रं करं कृत्वा आचम्य प्राङ्मुखः स्थितः ॥ प्राणायाम
त्रयं कृत्वा स्नानकालं ततः परमिति ॥ गंगाव्यतिरिक्तस्थले विशेषो वामनपुराणे ॥ ती
र्थानुकल्पयेद्विद्वान्मूलमंत्रेण मंत्रवित् ॥ नमो नारायणायेति मूलमंत्र उदाहृतः ॥ चतु
र्हस्तसमायुक्तं चतुरस्रं समंततः ॥ प्रकल्पमावाहयेद्गंगामेभिर्मंत्रैर्विचक्षणः ॥ विष्णो
ः पादप्रसूतासि वैष्णवी विष्णुदेवता ॥ त्राहि नस्त्वेनसस्तस्मादाजन्ममरणांतिकात् ॥ ति
स्रः कोट्योर्धकोटी च तीर्थानां वायुरब्रवीत् ॥ दिवि भुव्यंतरिक्षे च तानि ते संति जाह्नवि ॥
नंदिनीत्येव ते नाम देवेषु नलिनीति च ॥ दक्षा पृथ्वी च विहगा विश्वकाया शिवामृता ॥
विद्याधरी सुप्रसन्ना तथा लोकप्रसादिनी ॥ एतानि पुण्यनामानि स्नानकाले प्रकीर्तयेदि राम:
ति ॥ प्रकारांतरमपि ॥ नंदिनी नलिनी सीता मालती च महापगा ॥ विष्णुपादाब्जसंभू ४२

ता गंगा त्रिपथगामिनी ॥ भागीरथी भोगवती जाह्नवी त्रिदशेश्वरी ॥ द्वादशैतानि नामानि
यत्र यत्र जलाशये ॥ स्नानोद्यतः पठेन्नित्यं तत्र तत्र वसाम्यहमिति ॥ गंगायां तु नदीतीर्थस्नानस्य नेम
मिसु क्तं स्कांदे ॥ गंगा नदीं समासाद्य नान्यां स्नानेन नदीं स्मरेत् ॥ यदि स्मरेत्तदा सद्यः स्नानमप्यु
रापि विनश्यति ॥ स्नानकाले ऽन्यतीर्थेषु जप्यते जाह्नवी जनैः ॥ विना विष्णुपदीं कान्यत्समर्थं
मघशोधने ॥ इति ॥ अथ मध्याह्नस्नानविधिराश्वलायनपरिशिष्टे ॥ अथ मध्यंदिने ती
र्थे मेध्ये धौतपादपाणिमुखो हिरण्यमायतनप्राणः शुद्धे देशे खनित्रेण भूमिं गायत्र्या मृदं गृह्णा
लोपरि स्थितां चतुरंगुलमुद्धृत्य अधस्तात्स्तदंश निखायाप आदाय गायत्र्या उद्धृतामित यापरि सूर्यमंद
मुपातां शुचौ तीरे निधाय गायत्र्या प्रोक्ष्य हस्ताद्गामनुलिप्य पादौ प्रक्षाल्य पितृभ्यः दिसं निरी
क्ष्य तं ध्यायन् स्नायादेतन्मलस्नानं प्राहुस्तपस्विनो ॥ द्विराचम्य प्रदक्षिणमसकृदुदकमुप आपो
रु स्त्वा व्याहृतिभिर्मित्रैर्भावितमप्य दक्षिणं भागमसकृदुदकमुद्धृत्य विक्षिप्यो नररंतीर्थं क्षि
स्वा नत्वा गंगायत्र्याभिमंत्रितं मारीस्ता पदर्शी पिस्वा तेनम ॐ आपो हिष्ठा यम आपो णिंचे

Indira Gandhi National
Centre for the Arts

आ॰क॰
४३

न चा सर्वांगमनुलिप्य सुमिश्रान आपं नु बध मः संति तिसकृद द्विरात्मानमभिषि
च्य दुर्मिश्रास्तस्मै संनुयो स्नान्हे दिः पंचव पहि ख्मत ति मृद मद्भिः क्षालयेदथ प स्तृणप्रा
र्थिनाद्दिनात र्पणं तेनोक्तं न विविना स्नानान्नात्र प्रागुक्त स्नपस्तत पूणाह स्नानिष्पी
डयेत् पुत्रादमो हां तेन र्पात् इसेष स्नानविधिस्तदेतदसंभवे ऽद्भिः रेचकुयो स्नो माद्विषु
न च गृहेम दास्नायान्न शीतोदके न शीतोष्णोदकेन गृहे स्नायान्मंत्रविधिवर्जमेह
हि वी शुचौ देशे सर्व पश्चात्कुर्यादिति ॥ अत्र न प्रातर्म इति कास्नानं मध्यान्हे च गोमये रि
ति निषेधान्हो मय स्नानं नोक्तं तदाश्वलायन विषयं ॥ कात्यायनो नाम मध्यान्हे पित
न्सूत्रे गोमय स्नानमुक्तं ॥ तेषां प्रातः स्नाने संक्षेपेण भवति ॥ अनुदित होमितानं
॥ तथा च वृद्धलोगपरिशिष्टे कात्यायनः ॥ अल्पत्वाद्धोमकालस्य बहुत्वा स्नानक
र्मणः ॥ प्रातर्न तनुयात् स्नानं होमलोपो विगर्हितः ॥ प्रातः संक्षेपतः स्नानं मध्यान्हे तु स वि राम:
स्तरमिति ॥ अतश्च अथातो नित्यस्नानं नघाद्य विसाघेष स्नानविधि रिसंतः सो मध्या ५२

कं इति कौक्त सर्वांगोपहं हितं स्नानं मध्यान्हे एवं तेषां भवति ॥ यथाह नित्यायां प्रातर्नित्यं
स्नायाद नातुर इति कासपिन वचनं तु प्रधानभूत स्नानपरं अनाहिताग्नि परं वेति ज्ञे
यं ॥ प्रातर्न तनुयात् स्नानमिति तु तुक्तेरेव ॥ काम्याघमर्षणो मन्त्रमाह याज्ञवल्क्यः ॥
जंबुको नाम गायत्री वेदे वाजसनेयके ॥ अंतर्जले सकृज्जप्त्वा ब्रह्महत्यापोहति
॥ इदमापः प्र इमं मंत्रमुक्त्वा हेनो विमुंचति ॥ तद्विष्णोरिति मंत्रेण मज्जेदप्सु पुनः पुनः ॥
गायत्री वै वीही वा प्राजापत्यार्षिकाः स्मृता ॥ अथ क्रौ संक्षेप स्नानविधिमाह योगी या
ज्ञवल्क्यः ॥ एष विस्तरतः प्रोक्तः स्नानस्य विधिरुत्तमः ॥ असामर्थ्यान्न कर्तुं चेत्तत्रायं वि
धिरुच्यते ॥ स्नानमंत्र जले चैव मार्जनाचमनी तथा ॥ जलाभिमंत्रणं चैव तीर्थस्य परिक
ल्पनं ॥ अघमर्षणसूक्तेन त्रिरावर्तेन नित्यशः ॥ स्नानाचरणमित्येतदुपदिष्टं महात्म
भिरिति ॥ अत्र विशेषमाह स एव ॥ महास्नानं न कुर्वीत राज्ञो संध्यागृहे तु च ॥ नैमित्ति
केन यावत् स्नानेन पापो मार्कं वारमोः ॥ तथा ॥ भानौ भौमे त्रयोदश्यां नंदा भृगुमघासु

Indira Gandhi National
Centre for the Arts

श्रा॰क॰ ४४

सुच॥ स्नात्वा स्नानं पिंडदानं न कुर्यात्तिलतर्पणं॥ पिंडदानमत्र काम्यं॥ नित्यं तु क्षयाहश्राद्धादिमवत्येव॥ आदित्ये ह निजनक्षत्रे तथा जन्मतिथावपि॥ शोभनं स्यात् दिने चैव न कुर्यात्तिलतर्पणं॥ शोभनदिने श्राद्धमपि न कार्यं॥ येवा भद्रं दूषयंति स्वधाभिरिति श्रुतेरिति पारिजाते॥ स्नानांगतर्पणादि पूर्ववत्॥ मध्यान्हसंध्यावंदने विशेषः पूर्वमेवोक्तः॥ अथ मध्यान्हसंध्यातर्पणप्रयोगः॥ सावित्र्याः कश्यप ऋषिः त्रिष्टुप् मध्यान्हसंध्यातर्पणे विनियोगः॥ ॐ भुवः पुरुषं तर्पयामि। ॐ यजुर्वेदं तर्पयामि। ॐ मंडलं तर्पयामि। ॐ रुद्ररूपिणीं तर्पयामि। ॐ अंतरात्मानं तर्पयामि। ॐ सावित्रीं तर्पयामि। ॐ वेदमातरं तर्पयामि। ॐ सांकृतिं तर्पयामि। ॐ संध्यां तर्पयामि। ॐ युवतीं तर्पयामि। ॐ रौद्रीं तर्पयामि। ॐ उषसं तर्पयामि। ॐ निमृजं तर्पयामि। ॐ सर्वार्थसिद्धिकरीं तर्पयामि। ॐ सर्वमंत्राधिपतिं तर्पयामि। ॐ भूर्भुवः स्वः पुरुषं तर्पयामि॥ ततउपस्थानादि सर्वं समाप्य॥ मध्यान्हसंध्यागतत्वेन गायत्र्याजपितेनच॥ यथासंख्येन तत्स्थेन रुद्रेणैव प्रीयतामिति वसिष्ठोक्तमंत्रेण जलं निवेद्य सूर्याद्युपस्थानं प्रदक्षिणं ब्रह्मयज्ञं कुर्वीत॥ ॥तत्र श्रुतिः॥ राम: ४४
॥ प्रातर्यथो॥ अथ ब्रह्मयज्ञः स्वाध्यायो वै ब्रह्मयज्ञस्तस्मादिः॥ योगी॥ प्रदक्षिणं समावृ

सन्नमस्कृत्वोपविश्य च॥ दर्भेषु दर्भपाणिः स्यात्प्राङ्मुखस्तु कृतांजलिः॥ स्वाध्यायं च यथाशक्ति ब्रह्मयज्ञार्थमारभेत्॥ अत्र कर्मोद्देशपवित्रादिग्रहणं वृष्टिदर्भपाणित्वमेव यनंतरं पवित्रग्रहणमपि तिरस्कृतदर्भपाण्यर्थं॥ ब्रह्मयज्ञे तु यद्दर्भास्तेषां सा गोविधीयते इति तेषां गच्छ्रयते॥ नतु पवित्रादेः॥ योगी॥ आदावारभ्य वेदं तु स्नात्वोपर्युपरि क्रमात्॥ यदधीते स्वहं शक्त्या स स्वाध्याय इति स्मृत इति॥ अस्यापवर्गः॥ स्वस्तात्वाहुर्याह्निकं स्मृत्यर्थकारमाह तिगायत्रीमेकं मंत्रमात्मानं केवलं सर्वानंतेय पायशक्ति परिलापि प्रतिदिनमेव मेवोपर्युपरि यथापनेन समाप्यान्य वेदमारभेनमेव समापयेदिति॥ रुचि च्छंदो दैवतानि विनियोगं तथैव च॥ अविदित्वा जपेद्यस्तु महापापमवाप्नुयात्॥ आत्र लापनः॥ ब्रह्मयज्ञमथ संपर्कार्थमुक्तविधानतः॥ स्वाध्यायं प्रणवाद्यं तं कुर्याद्देवं द्विजः सदा॥ तदंते तर्पयेद्विद्वान्देवान् ऋषीन्पितॄंस्तथा॥ शौनकोत्र विशेषमाह॥ ग्रामात्प्राच्यामुदीच्यां वा ग्रामादुदीच्यां प्राग्वा विता॥ निष्क्रम्य तत्र नादेयं तत्रागस्त्यं पिबामसि

Indira Gandhi National
Centre for the Arts

॥ स्नात्वाय ह्योपवीतीच भस्त्वाचम्योदकं तथा ॥ पवित्रेलक्षणोयुक्ते कृत्वाऽछिन्नेसुनार
का॰ श्रा॰ के॥ तयोरेकेकमेकेकं पाणिनाधारयेत्पृथक्॥ एवं पवित्रवत्तोहोपाणीकृत्वाहृत्पार्श्वा॥
४५ सव्यस्यपाणेरंगुष्ठप्रदेशिन्योस्तुमध्यतः॥ दक्षिणस्यांगुलीर्मस्यचतलेंगुष्ठवर्जि
ताः॥ तथासकंशंगुष्ठंदक्षिणांगुष्ठवेष्टितं॥ कुर्यात्तचैवंसंवृत्तौपाणीदक्षिणजानु
नि॥ निधायस्वस्यहृदयेपस्यन्केवलमंबरं॥ संमीलिताक्षयुग्मावानिरुध्यमनसोगतिं॥
योगाधिरूढमात्मानेकस्थानन्यमनास्ततः॥ पार्वतंमंत्रमध्येतुशक्त्यासाध्यायमात्म
नः॥ तांवृतमनुवाकंवासूक्तंवर्गमथापिवा॥ संकल्पमनसापूर्वमिदमध्येष्यइम
थ॥ समस्ताव्याहृतीःपूर्वंजपन्प्रणवपूर्विकं॥ सावित्रींचजपेसिध्यःपूर्वमर्द्धचेश
स्ततः॥ पश्चात्समस्तांमिसेवंजपित्वात्रिःसमाहितः॥ ततोयावत्प्रतिज्ञात रामः ४५
मध्यायंसूक्तमेववा॥ ऋचंवाक्यंततोवश्यंअधीयीतस्वशक्तितः॥ पश्चादोंनम
इत्याद्यांकरोमीसंततसर्वं॥ ऋचंजपित्वापश्चादोमिसेवंसमुदीरयेत॥ पदद्यादति

थिभ्यः सावध्यायज्ञस्यदक्षिणेति॥ माध्यान्हिकांस्तर्वमेवतर्पणंचाग्रवेदिना॥ अन्येषांस्वस्वग
ह्योक्तंपश्चाह्यापूर्वमेववेदिजिसत्तमः॥ जप्यानाहाश्वलायनः॥ ऋचोयजूंषिसामान्यथर्वा
गिरसोब्राह्मणानिकल्पानाराशंसीरितिहासपुराणानीति॥ ऋग्विधाने॥ अग्निमीले
जपेत्सूक्तंपापघ्नंश्रीकरंपरं॥ पारायणफलंतस्यवेदानांतेसहस्रशइति॥ यमः॥ ॐकारं
व्याहृतीस्तिस्रोगायत्रींत्रिपदांतथा॥ मनेमेवमठस्य सर्वेदादिकमुपक्रमेत्॥ स्वरव
र्णलयोपेतंमात्रास्थानक्रियान्वितं॥ वेदमेवपठेद्यस्तुस्वाध्यायफलमश्नुते॥ मनुः॥
वेदोपकरणेचैवस्वाध्यायेचैवनैत्यके॥ नानुरोधोस्त्यनध्यायहोममंत्रेषुचैवहि॥ यथाव्र
ह्मयज्ञेपुरुषसूक्तस्यफलातिशयउक्तः॥ मात्स्ये॥ ब्रह्मयज्ञेजपेत्सूक्तंपौरुषं
चिंतयन्हरिं॥ सर्वान्जपतेवेदान्सांगोपांगान्द्विजोत्तमइति॥ एवमुक्तविधिनाब्रह्मयज्ञं
कृत्वास्वस्वशाखोक्तमार्गेणदेवऋषिपितृतर्पणंकुर्यात॥ अथतर्पणधर्माउच्यंते॥ स्मृत्य
र्थसारे॥ स्थलेशाघातेपात्रेरोमकूपेनकुत्रचित॥ असंस्कृतप्रमीतानांस्थलेदद्या

Indira Gandhi National
Centre for the Arts

ज्ञलांजलिं॥दालभ्यः॥ब्रह्मयज्ञोजपोहोमोदेवर्षिपितृकर्मच॥अनोक्तसंकल्पंतंसर्वन
आ॰को॰ भवेत्स्विष्टिकारकमिति॥तेनतर्पणप्रयोगेनुकारःप्रयोक्तव्यः॥हारीतः॥आर्द्रवासा
४६ जलेकुर्यात्तर्पणाचमनंजपं॥शुष्कवासाःस्थलेकुर्यादितिवेदविदोविदुः॥तर्पणंज
लप्रक्षेपरूपंजलेगकार्य्यः॥यत्तुकार्ष्णाजिनिराह॥देवानांचपितृणांचजलेदद्याज्ज
लांजलिमितितदशुचिस्थलविषयं॥तथाचविष्णुः॥यत्राशुचिस्थलंचस्यादुदकेदेवता
पितृन॥तर्पयेत्तुयथाकाममप्सुसर्वंप्रतिष्ठितं॥सव्येनदेवकार्याणिवामेनपितृतर्पणं॥
निवीतेनमनुष्याणांतर्पणंतुविधीयते॥वामेनअपसव्येनेत्यर्थः॥एकैकमंजलिंदेवा
द्वौतुसनकादयः॥अर्हंतिपितरस्त्रींस्त्रीन्स्त्रियएकैकमंजलिमितिव्यासः॥यत्तु॥अन्वार
ब्धेनसव्येनपाणिनादक्षिणेनतु॥इतियोगिवचनं॥तथा॥उभाभ्यामपिपाणिभ्यामुद
कंयःप्रयच्छति॥समूढोनरकंयातिकालसूत्रमवाक्शिराइतिव्याघ्रपादवचनंचतच्छ्रा रामः
द्धादिविषयमितिमदनपारिजाते॥युक्तमेतत्॥श्राद्धेविवाहकालेचपाणिनैकेनदी ४६

यते॥तर्पणेतूभयेनैवविधिरेषसनातनइतिकार्ष्णाजिन्युक्तेः॥यद्यप्येषांशाखायांविधी
यैकहस्तेनतर्पणमुक्तंतद्विषयमितिज्ञेयं॥मात्स्ये॥उत्तरयोर्हस्तयोःकृत्वासलिलैः
पूर्णमंजलिं॥देवानांचपितृणांचशुचिस्तर्पणमाचरेत्॥प्रागग्रैस्तर्पयेद्देवानुदगग्रैस्तु
मानुषान्॥तिलद्विगुणितैःसतर्पयेत्स्वपतःपितॄन्॥प्राचीनावीतादिलक्षणमुक्तंभा
रद्वाजेन॥उद्धृत्यवामबाहौतुदक्षिणांस्कंधमाश्रितं॥प्राचीनावीतमित्याहुस्तत्पि
त्र्येषुकर्मसु॥कंठावलंबितेचैवब्रह्मसूत्रेयदाभवेत्॥तन्निवीतमितिख्यातंशस्तं
कर्माणिमानुषे॥यथास्थानस्थितंसव्यंदैवकर्माणिशस्यते॥देवर्षिदिव्यपितृतर्पणं
जीवपितृकस्यापिभवति॥जीवपितृकोऽप्युतानस्मांश्चेतरइतिकात्यायनोक्तेः॥नजी
वत्पितृकःकुर्यादितिनिषेधस्त्वपितृतर्पणविषयः॥तस्यापसव्यप्रकारमाहभ
गुः॥अपसव्यंद्विजाग्र्याणांपित्र्येसर्वत्रकीर्तितं॥आम्रकोष्ठात्प्रकर्तव्यंमातापित्रो
स्तुजीवतोरिति॥आम्रकोष्ठात्प्रकोष्ठपर्यंतं॥नजीवत्पितृकःकुर्यात्तिलैःकृष्णैश्च

Indira Gandhi National
Centre for the Arts

तर्पणमितिकृष्णतिलनिषेधात्तन्नर्पणेशुक्लास्तिला एव ग्राह्याः॥अतिलमेवतुतर्
आ॰कृ॰ पैणामितिकेचित्॥पराशरः॥शुक्लैस्तु तर्पयेद्देवान्मनुष्यांश्छबलैस्तिलैः॥पितॄन्संतर्पयेत्कृ
५७ ष्णैस्तर्पणे सर्वदा द्विजः॥कौर्मेतु॥देवान्ब्रह्मऋषींश्चैव तर्पयेदक्षतोदकैः॥पितॄन्तिलै
श्च संतर्प्येदिति धर्मविदो विदुरिति॥तथा च देवर्षितर्पणं यवैर्वाशुक्लतिलैर्वेतिविकल्पः
॥वाहुदण्डी तिलैः कृत्वा जलस्थस्तर्पयेत्पितॄन्॥स्थलस्थेन न कर्तव्यं पितॄणां प्रीतिमिच्छ
तेति पराशरः॥मनुः॥रोमसंस्थैस्तिलैर्नैव तर्पयेन्मतिमान्पितॄन्नितिन्तु स्थलतर्पणं
प्रीतिमिच्छतेति पराशरः॥यत्तु॥रोमसंस्थैस्तिलैर्नैव तर्पयेन्मतिमान्पितॄन्नितितत्तु
स्थलतर्पणविषयं॥योगी॥आवाहयस्ततो मंत्रैरास्तीर्य च कुशान्सुधीमान्॥प्रागग्रेषु सुरान्
सम्यग्दक्षिणाग्रेषु वै पितॄन्॥आवाहनमंत्राः विश्वेदेवास आगतेत्याद्यादेवपितृलि
गकाग्राह्याः॥कुशास्तरणमपिस्थलतर्पणविषयम्॥जलेऽसंभवात्॥यमः॥द्वौहस्तौ राम:
युग्मतः कृत्वा पूरयेदुदकांजलिं॥गोशृंगमात्रमुद्धृत्य सजलमध्ये जलं क्षिपेत्॥प्रादेशमा ५७

त्रमुद्धृत्य सलिलं प्राङ्मुखः सुरान्॥उदङ्मनुष्यांस्तर्पयेत्पितॄन्दक्षिणतस्तथा॥सुरर्षिकर्म
कुर्वाणः सव्यं जानु निपातयेत्॥पितॄणां कर्म कुर्वाणो वामजानु निपातयेत्॥पाणिनैकगु
णं प्रोक्तं दर्भे शतगुणं भवेत्॥तर्पणं खड्गपात्रेण ह्यक्षय्यायोपकल्पते॥दक्षः॥कुशाग्रैस्त
र्पयेद्देवान्मनुष्यान्कुशमध्यतः॥पितॄन्तु समूलाग्रैस्तर्पणं तु यथाक्रमं॥खड्गमौक्ति
कहस्तेन कर्तव्यं पितृतर्पणं॥मणिकांचनदर्भैर्वा न स्पृष्टेन कदाचनेति शातातपवचनात्
अन्यो हस्तः खड्गादिमुद्रिकया कर्तव्यः॥न तु खड्गादिपात्रग्रहणेन॥अन्यथा हीति पिंगरत्नौ सौ
निर्मजलिविधाय कवाकावाधापनेः॥अत एवोक्तं योगिना॥अनामिकाधृतहेमतर्जन्यां
रौप्यमेव च॥कनिष्ठिकाधृतं खड्गं तेन पूतो भवेन्नर इति॥यद्यपि शिष्टाचाररक्षार्थं पयस्वि
न स्थूलक्ष्मपात्रे धृतेंऽजलिभंगो न भवतीति तत्रापि स्वीकर्तव्यं॥यथा च छागलेयः॥लघुपात्र
करे कृत्वा सौवर्णं खड्गमेव वा॥राजतं ताम्रजं वापि तेन संतर्पयेत्पितॄन्॥तथा॥जलांते
तिलदर्भादीन्मोनुष्ठानाय याचते॥नानुष्ठानफलं तस्य दातुरेव हि तत्फलं॥जलांते नि

Indira Gandhi National
Centre for the Arts

षेधादन्यत्रतत्संग्रहेणनदोषः॥देवातिथ्यर्चनंकृत्वेगुरूभ्यःसादिहृत्तये॥सर्वतःप्रतिगृह्णा
आ॰का॰ यादिसंकल्पात्॥तिलापवादमाहमरीचिः॥सप्तम्यांरविवारेचगृहेजन्मदिनेतथा॥भृत्यपुत्र
४८ कलत्रार्थीनकुर्यात्तिलतर्पणं॥अन्यत्रापि॥पक्षयोरुभयोराजन्सप्तम्यांनिशिसंध्ययोः॥
विद्यापुत्रकलत्रार्थीतिलान्सर्वत्रवर्जयेत्॥तथा॥सप्तम्यांरविवारेचजन्मर्क्षेदिवसेतथा
॥गृहेनिषिद्धंसतिलंतर्पणंतद्धिहिभवेत्॥बौधायनः॥विवाहेचोपनयनेचौलेसतियथाक्र
मं॥वर्षमर्धंतदर्धंचनेत्याहुस्तिलतर्पणं॥एतस्यकचिदपवादमाहवसिष्ठः॥उपरागेपितुः
श्राद्धेअमावास्यांचैवसंक्रमे॥निषिद्धेपिहिसर्वत्रतिलैस्तर्पणमाचरेत्॥कात्यायनः॥
मघासुगादिभरणीतीर्थपर्वविशेषतः॥तिथिवारनिषेधेपितिलैस्तर्पणमाचरेत्॥तथा॥
तीर्थेतिथिविशेषेचगयायांप्रेतपक्षके॥निषिद्धेपिदिनेकुर्यात्तर्पणंतिलमितित्रिस्थलीसे
तौ॥संग्रहेतु॥कठकात्यायनजावालायेचवाजसनेयिनः॥सतिलंतर्पणंकुर्युर्निषिद्धेष राम:
दिनेष्वपि॥उद्धृतोदकतर्पणंतुतत्रैव॥यद्युद्धृतंनिषिंचेत्तुतिलान्संमिश्रयेज्जले॥अ ४८

तोन्यथातुसव्येनतिलाग्राह्याविचक्षणैः॥अन्यथाऽनुद्धृतोदकतर्पणेमालिन्येतर्पणंश्रा
द्धंनकुर्याद्दारिधारया॥कुर्याद्धेद्दारिधाराभिस्तत्सर्वंनिष्फलंभवेत्॥हेमरूप्यमयंपात्रंता
म्रकांस्यसमुद्भवम्॥पितृणांतर्पणेपात्रंमृन्मयंतुपरित्यजेत्॥षड्विंशदंगुलंपात्रमुत्तम
परिकीर्तितं॥मध्यमंतुत्रिभागोनंकनिष्ठंद्वादशांगुलमितिशिवरहस्ये॥तर्पणस्यावश्यकता
माहकात्यायनः॥छायांयथेच्छेच्छरदातपार्तःपयःपिपासुःक्षुधितोऽन्नमत्रः॥बालोजनि
त्रींजननींचबालांयोषित्पुमांसंपुरुषश्चयोषां॥तथासर्वाणिभूतानिस्थावराणिचराणि
च॥विप्रादुदकमिच्छंतिसर्वाभ्युदयकांक्षिणः॥पतितस्यसन्यासिजीवपितृकस्यदेवर्षिदिव्य
पितृतर्पणंकृत्वास्वपितृपित्रादिभ्योपितृतर्पणमित्याहलौगाक्षिः॥ब्रह्मचारीचैवसन्यस्तेता
नेचपतितेसति॥येभ्यएवपितादद्यात्तेभ्योदद्यात्स्वयंसुतः॥अविभक्तैरपिभ्रातृभिर्ब्रह्म
यज्ञतर्पणेकार्ये॥भ्रातॄणामविभक्तानामेकोधर्मःप्रवर्तते॥विभागेसतिधर्मस्तुभवेत्ते
षांपृथक्पृथक्॥होमाग्रहानरहितंनभोक्तव्यंकदाचन॥अविभक्तेषुसंसृष्टेषुकेनापि

Indira Gandhi National
Centre for the Arts

आ॰क॰
४९

कृतं कृतं ॥ पृथगप्येकपाकानां ब्रह्मयज्ञो हि जातिनां ॥ अग्निहोत्रं सुरार्चा च संध्या तर्पण
मेव च ॥ जपस्त्रपस्तीर्थयात्रा कार्यमेव पृथक् पृथगिति आश्वलायनोक्तेः ॥ अग्निहोत्रमत्रोप
सनं ॥ अग्निहोत्रस्यानिषिद्धत्वात् ॥ तर्पणं तागात्तर्पयेत् ॥ योगी तु ॥ तृप्यन्त्विति समुदायस्य
नामिसंप्यापित्वा ॥ विधिज्ञः प्रक्षिपेन्नोयं देवादीनामशेषतः ॥ अमुं तर्पयामीति वा प्रयोगः ॥
नामान्ते तर्पयामीति ध्याद्दाषोमिति च ब्रुवन्निति कात्यायनोक्तेः ॥ तथा च यथासूत्रं प्रयोगत्व
वस्याद्दृष्ट्या ॥ यमतर्पणं तु काम्यं दिनविशेष एव ॥ तथा सायनोक्तेः ॥ तथा च यथासूत्रं प्रयो
गत्व वस्याद्दृष्ट्या ॥ यमतर्पणं तु काम्यं दिनविशेष एव ॥ तथा ह वृद्धमनुः ॥ यां काविसूरितं
प्राप्य कृष्णपक्षे चतुर्दशी ॥ ... यमुनायां विशेषेण नियतो नियतेन्द्रियः ॥ यमाय धर्मराजाय
मृत्यवे चान्तकाय च ॥ वैवस्वताय कालाय सर्वभूतक्षयाय च ॥ औदुम्बराय दध्नाय नीलाय
परमेष्ठिने ॥ वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥ इत्येतैर्नाममन्त्रैः स्यात् प्रणवादिन
मोन्तकैः ॥ तर्पयित्वा यमं देवं सर्वपापैः प्रमुच्यत इति ॥ स्कान्दे तु ॥ कृष्णपक्षे त्रयोदश्याम् राम:
४९

गारकदिनं यदि ॥ तदा स्नात्वा शुभे तोयेन तर्पयेद्धर्मनामभिरित्युक्तं ॥ यमतर्पणं वा जन्मनेपि
नां निसंन तु काम्यं ॥ तत्स्त्रेनि सत्वेन विधानादि तिकेचित् ॥ सर्वतर्पणान्ते ब्रह्मवैवर्ते विशेष
उक्तः ॥ यन्त्र कृच्छ्र नसंस्थाना क्षुत्तृष्णोपहतात्मनां ॥ तेषां हि दत्तमक्षय्यमिदमस्तु तिलोदकं
॥ संग्रहे तु ॥ आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवाः ॥ तृप्यन्तु पितरः सर्वे मातृमातामहा
दयः ॥ अतीतकुलकोटीनां सप्तद्वीपनिवासिनां ॥ आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकं
॥ एवमुक्तविधिनासंतर्प्य वस्त्रं चतुर्गुणीकृत्य स्थलेऽपसव्येनैव निपीडयेत् ॥ तदाह पराशरः ॥
एवं हि तर्पणं कृत्वा सर्वं चाविधिवद्द्विजः ॥ निष्पीडयेत् स्नानवस्त्रं तिलदर्भसमन्वितं ॥ न स्वेन तर्पणं
हस्तं न चामसितपाद्योः ॥ शिलाखधोरद्देशे नैव हि गुणं त्रिगुणं नवा ॥ एतेषु पीडयेद्वस्त्रं राक्ष
सीकुरुते क्रियां ॥ यत्तु ॥ द्वादश्यां पञ्चदश्यां च संक्रमे श्राद्धवासरे ॥ वस्त्रं निष्पीडयेन्नैव न च क्षारे
णमाजयेदिति न तु सर्वत्र निष्पीडने निषेधपरं ॥ मन्त्रस्तु ॥ ये के चास्मत्कुले जाता अपुत्रा गो
त्रिणो मृताः ॥ ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकमिति ॥ अथ श्राद्धाङ्गतर्पणे विशेषः

Indira Gandhi National
Centre for the Arts

आ.क. ५०

प्रयोगपारिजाते॥ दर्शे तिलोदकं पूर्वं पश्चाच्छ्राद्धं महालये॥ मातापित्रोः क्षये पूर्वं न पश्चात्तु परे
हनि॥ वैर्गोकस्य क्षयो येषां मृतेषां तु विवर्जयेत्॥ वृद्धगार्ग्यः॥ पूर्वं तिलोदकं दत्वा पश्चाच्छ्राद्धं
समाचरेत्॥ प्रसव्येन भवेत्स्वपरेह्नि तिलोदके॥ हारीतोपि क्षयाहप्रसंगे आह॥ ततः परेह्नि कु
र्वीत तर्पणं पुरुषः सुधीः॥ तच्छेषैस्तिलदर्भैश्च प्रातः स्नात्वा सुधी समं॥ गार्ग्यः॥ परेद्युः
श्राद्धकृन्मर्त्यो योन तर्पयते पितॄन्॥ अतस्तत्पितरस्तस्य शापं दत्वा व्रजंति तो॥ स्नात्वा ती
रं समासाद्य उपविश्य कुशासने॥ संतर्पयेत्पितॄन्सर्वान्स्नात्वा वस्त्रं च धारयेत्॥ इदं तु श्राद्धे द
र्शे भूतापितृ विषयं॥ तेन नित्यतर्पणं बहुदैवं संश्राद्धदिने यथाकालं भवत्येव॥ अत एव नि
र्णयदीपिकायां क्षयाहे तिलतर्पणमिति वचनं मुख्यं तेन नित्यतर्पणविषयत्वेन॥ अन्यथा
क्षयाहे तर्पणमेव नास्ति न कुत्रापि प्रसवः स्यादित्युक्तं प्रयोगरत्ने नारायणभट्टैः॥ महा
लयश्राद्धे तु देवविधिपितृतर्पणं कृत्वा श्राद्धं कुर्यात् श्राद्धानंतरं तु श्राद्धे देवतानां तर्पणं
मेव॥ तर्पयेत्क्षयाहे तु नित्यतर्पणं पूर्वमेव कार्यं॥ श्राद्धांगभूततर्पणं द्वितीयदिने संध्यावंद

राम: ५०

ना स्पर्वमेव कार्यं शिष्टाचारात्॥ तथा॥ पक्षश्राद्धं तु नित्यतर्पणं स्यादिने दिने॥ सकृन्महालये
दर्शे संस्कारेहनि तिलोदकं॥ जीवमानपितापि स्यमातायाद्विविपद्यते॥ मातुः श्राद्धं सुतः कुर्यात्
कुर्यात्श्राद्धतर्पणमिति निषेधः॥ श्राद्धतर्पणं श्राद्धांगतर्पणमिति निषेधः॥ हवि श्राद्धदिने तु नास्त्य
व॥ हविः श्राद्धे सपिंडे च प्रेतश्राद्धे तथैव च॥ मासानुमासिकश्राद्धे न कुर्यात्तिलतर्पणमिति गर्गः॥
न्तेः॥ तीर्थयात्रासु रवश्रास्वोक्तं तर्पणं कृत्वा देवा यक्षास्तथा नागा इत्यादिपुराणोक्तमंत्रैर्देवा
नां संतर्प्य सनकः सनंदनश्चैति ऋषीन्संतर्प्य अग्निष्वात्ता इत्यादि पितृतर्पणं च
कुर्यादिति त्रिस्थलीसेतौ उक्तं॥ तर्पणफलमाह शंखः॥ एवं यः सर्वभूतानि तर्पयेदन्वहं द्विजः॥
स गच्छेत्परमं स्थानं तेजोरूपं निरामयमिति॥ अकरणे तु दोषः काशीखंडे॥ अतर्पिता दे
हाद्रुधिरं पिबंतीति॥ तर्पणानंतरं जलेदेवतार्चनमाह योगियाज्ञवल्क्यः॥ निष्पीड्य स्नानवस्त्रं
तु आचम्य विधिवत्ततः॥ देवानामर्चनं कुर्याद्ब्रह्मादीनाममत्सरः॥ ब्राह्मविष्णवरौद्रैस्तु सावि
त्रैर्मैत्रवारुणैः॥ तल्लिंगैरेव मंत्रैस्तु अर्चयेत्सुसमाहितः॥ अप्सु ग्नौ हृदये सूर्ये स्थंडिले प्रति

Indira Gandhi National
Centre for the Arts

मासुच॥षट्स्वेतेषु हरेः सम्यगर्चनं मुनिभिः स्मृतमिति॥तल्लिंगमंत्राब्रह्मजज्ञानमित्यादयः
आम्नातसरेनवग्रहस्वाके विदिक्षुं ति॥ततः सूर्यायार्घ्यं दद्यात्॥तदुक्तं नृसिंहपुराणे॥ततो
र्घ्यं भानवे दद्यात्तिलपुष्पाक्षतान्वितं॥उत्थाप्य मूर्द्धपर्यंतं गायत्रीमंत्रमुच्चरन्निति॥योगी॥
ततोवलोकयेदर्कं हंसः शुचिषदित्यृचा॥स्वमंभ्रमरित्युपस्थाय सूर्यस्येति प्रदक्षिणं॥आहसच
नमस्कुर्याद्दिशो दिग्देवता अपीति॥प्रयोगस्तु प्राच्यै दिशे नमः इंद्राय नमः इत्यादिरूपो ज्ञेयः
॥एवमुक्तविधिना स्नानादिकं कृत्वा कलशमुत्तमोदकेनापूर्य पात्रहस्तो गृहं व्रजेत॥तदुक्तं मा
त्स्ये॥जलदेवं नमस्कृत्य ततो गच्छेद्गृहं बुधः॥पौरुषेण तु सूक्तेन ततो विष्णुं समर्चयेदिति॥इति
श्रीमदनंतभट्टविरचिते विधानपारिजाते मध्यान्हस्नानादिविधिः॥ ॥अथ गृहे देवताचेनंवि
धिः॥तत्र विधायदेवतास्नानं प्रातर्होमादनंतरं॥पूर्वाह्न एव कुर्वीत देवतानां च पूजनमिति मरी
चिवचनात्पूर्वाह्णे देवतार्चनस्य मुख्यः कालः॥पौरुषेण तु सूक्तेन ततो विष्णुं समर्चयेत॥वैश्व
देवं ततः कुर्याद्बलिकर्म तथैव चेति कूर्मपुराणोक्तो मध्यान्हकालो गौणः॥नारदीये तु॥प्रातर्म



ध्यंदिने सायं विष्णुपूजां समाचरेत्॥यथा संध्या स्मृतानि स्यादेवं पूजा तथा बुधैः॥अशक्तौ
विस्तरेणैव प्रातः संपूज्य केशवं॥मध्यान्हे चैव सायं च पुष्पांजलिमपि क्षिपेदिति॥पूज्य
देवताश्चानिगमेद् र्शिताः॥ब्रह्माणं विष्णुमीशानं सूर्यमग्निं गणाधिपं॥दुर्गां सरस्वतीं लक्ष्मीं
गौरीं वा निसमर्चयेत॥पाद्मेपि॥आदित्यं गणनाथं च देवीं रुद्रं यथाक्रमं॥नारायणं विष्णु
द्राख्यमंते च कुलदेवताः॥कौर्मे॥नविष्ण्वाराधनादन्यत् विद्यते कर्म वैदिकं॥तस्मादनादि
मध्यांतं विष्णुमाराधयेन्नरः॥तस्मिन्नाराधिते देवः सर्वमाराधितं भवेदिति॥पंचायतनस्था
पनक्रमउक्त आचारदीपे॥शं भौ मध्यंगते हरीनहर भूदेव्यो हरौ शंकरेभास्यनागसुतारवौ हरग
णेशाजांबिकाः स्थापिता॥दिव्यां विष्णुहरिकं दंतरवयोलं बोदरेजे भ्वरे नार्याः शंकरभाग
तोपि शुभदा व्यस्तास्तुते हानिदाः॥प्रधानस्य शंकरभागतः॥रुनःसूर्यः॥आद्याशक्तिः॥ई
शान्यादिक्रमेणोमर्थः॥शेषं प्रसिद्धं॥न्यासमाह योगी॥अंगुष्ठे चैव [illegible] गोविंदं तर्जन्यां च म
हीधरं॥मध्यमायां हृषीकेशमनाम्यां त्रिविक्रमं॥कनिष्ठायां न्यसेद्विष्णुं करमध्ये च माधवं॥ह

Indira Gandhi National
Centre for the Arts

आ॰का॰
५२

स्तन्यासोमयाख्यातोद्विजानांपावनःपरः॥अग्नौहुतंचर्दंचदेवतार्चनमेवच॥हस्तमा
स्यप्रसादेनसर्वंभवतिचाक्षयं॥शारदातिलके॥भूतशुद्धिंतथाप्राणप्रतिष्ठांमातृका
स्तनः॥षोढादौन्यसेत्कृत्वानकर्तव्याःपुनःपुनरितिक्रमः॥अर्पांगन्यासः॥कर
योःपादयोर्जान्वोःकट्योर्नाभौहृदिक्रमात्॥कंठवाह्वोर्मुखेनेत्रेमूर्ध्निवामादितोन्यसेत्॥
अयंप्रसन्नचेपुंसूक्तन्यासः॥षडंगन्यासइत्येकेअन्येःषडृचउत्तरे॥यथात्मनितथादेवे
न्यसंचपरिकल्पयेत्॥उंकारपूर्वकैर्मंत्रैःषोडशाभिःपृथक्पृथक्॥न्यासेनतुभवेत्सोपि
स्वयमेवजनार्दनः॥आवाहनासनंपाद्यमर्घ्यमाचमनीयकं॥स्नानंवस्त्रोपवीतेनगंधमा
ल्यादिभिःक्रमात्॥धूपंदीपंचनैवेद्यंनमस्कारंप्रदक्षिणां॥षोडशैवाद्वासनंकुर्यादेषना
रायणोविधिः॥स्नानेवस्त्रेचनैवेद्येदद्यादाचमनीयकं॥अर्घ्यस्नानेतथावस्त्रेउपवीतो
पहारयोः॥इति॥आगमदीक्षावतस्तुतदागमोक्तप्रकारेणन्यासान्कृत्वावैदिकंतांत्रि
कंमिश्रमार्गेणपूजाःकार्या॥तदुक्तमेकादशस्कंधे॥वैदिकंतांत्रिकंमिश्रंत्रिविधंतत्र राम:
५२

मिश्रकं॥उत्तमंसर्वपूजानांविष्णुभक्तस्यमाधवेति॥अत्रोपयुक्तंलिख्यते॥प्रक्षाल्यदवानु
स्पदेवतायतनंविशीता॥समासीनस्तुसंकल्प्यपात्रासादनमाचरेत्॥आराधकःस्वस्यपुरः
शंखस्थापनमाचरेत्॥यःशंखंचविसंस्थाप्यपूजयेत्पुरुषोत्तमं॥तस्यपूजानगृह्णाति
तस्मात्सौवंप्रकल्पयेत्॥शंखोदकंसदापुण्यंअतिप्रियतमंहरेः॥उद्धरेणजलंग्राह्यं
नाप्सुशंखंनिमज्जयेत्॥शंखपृष्ठसंलग्नंपयःपापकरंध्रुवं॥तेनतंस्नापयेद्देवंपूजनासा
पूसभवः॥संछाद्यसितवस्त्रेणलिंगसंशोधितेर्जलैः॥सुवर्णताम्ररजतपात्रस्थेशंखसं
स्थितैः॥यद्वान्नूतनमृत्पात्रसंस्थितैःस्नापयेद्विभुमित्यादिसत्पुराणेपूजापाद्याद्यर्थउक्त
द्वितारकीये॥आत्मनोदक्षिणेभागेजलपात्रादिनिधापयेत्॥घृतदीपंचतत्रैवतैलस्यतुवि
पर्ययः॥वामभागेजलैःपूर्णंशंखमेवंनिधापयेत्॥यथादेहेतथादेवेमंत्रन्यासंसमाचरेत्॥
न्मासनिषेधः॥स्थावरपरः॥चलाचलेतिद्विविधाप्रतिष्ठाजीवमंदिरं॥उद्वासावाहनेनस्तः
स्थिरायामुद्वार्चने॥अस्थिरायांविकल्पःस्यात्स्थंडिलेतुभवेद्द्वयमितिभागवतोक्तेः॥त

Indira Gandhi National
Centre for the Arts

आ॰क॰ ५३

या॥ द्विजानामेव नान्येषां शालग्रामशिलार्चनम्॥ स्त्रीणां चैवापि शूद्राणां विप्रहस्तेन पूज
नं॥ स्त्रीणामनुपनीतानां शूद्राणां च जनेश्वर॥ स्पर्शनेनाधिकारोस्ति विष्णोर्वा शंकरेपि वे
ति वृहन्नारदीये॥ कौर्मेपि॥ ब्राह्मणेष्वपि हरं विष्णुं न स्पृशेच्छूद्रयच्छती॥ सनाथामन्त
नाथा वा तस्या नास्तीह निष्कृतिरिति॥ लिंगस्पर्शनिषेधोपीदानीं न तु प्रतिष्ठितलिंगवि
षयो न पुनरन्यालिंगविषयः॥ तथाहि नारदीये॥ यदा प्रतिष्ठितं लिंगं मंत्रविद्भिर्यथा
विधि॥ ततः प्रभृति शूद्रश्च योषिद्वापि न संस्पृशेदिति॥ दीक्षितानां द्विजान्येषां स्त्रीणा
मपि तत्रैव च॥ लिंगे स्वगुरुणा दत्ते स्वज्ञानामत्र संशयः इति नंदिपुराणोक्तेः॥ स्त्रीशूद्राणां
पार्थिवलिंगादिस्वज्ञाधिकारो नैपः॥ यत्तु॥ जपस्तपस्तीर्थयात्रा प्रव्रज्या मंत्रसाधनं॥ देव
ताराधनं चैव स्त्रीशूद्रपतनानि षट् इति तत्तु शालग्रामादिविषयमिति सर्वमनवद्यं॥ निर्मा
ल्योद्वासनं प्रातः कार्यमित्युक्तं नारदपांचरात्रे॥ यः प्रातरुत्थाय विधाय नित्यं निर्माल्यमी
शस्य निराकरोति॥ न तस्य दुःखं न दरिद्रता च नाकालमृत्युर्न च रोगमात्रं॥ क्रियासारे॥ मध्य राम: ५३

मानामिकांगुष्ठैः पुष्पं संगृह्य पूजयेत्॥ अंगुष्ठतर्जनीभ्यां तु निर्माल्यमपनोदयेत्॥ ग्राह्य
पुष्पाणि नृसिंहपुराणे॥ पुष्पैररण्यसंभूतैः पत्रैर्वा गिरिसंभवैः॥ अपर्युषितनिश्छिद्रैः प्रो
क्षितैर्जंतुवर्जितैः॥ आत्मारामोद्भवैर्वापि पुष्पैः संपूजयेद्धरिं॥ शमीपुष्पं बिल्वपुष्पं चंप
कं नागरं तथा॥ करवीरं तुषाश्वेतं पाठलं कुशपुष्पकं॥ वनमालाप्यशोकं च सेवंती कुसुमा
लती॥ त्रिसंध्यं चनपाश्वेतं कुंदं च शतपत्रकं॥ मल्लिका चैव जाती च सर्वपुष्पाद्विशिष्यते
॥ प्रयोगपारिजाते व्यासः॥ प्रतिमापटपत्राणां नित्यं स्नानं न कारयेत्॥ कारयेत्सर्वदिवसेय
दि वा मलधारणं॥ तथा॥ जातीपुष्पसहस्रेभ्यो दधान्मालां सुशोभनां॥ विष्णवे विधिवद्भक्त्या
तस्य पुण्यमनंतकं॥ अपामार्गं भृंगराजं च शमीपत्रं च खादिरं॥ दूर्वा च कुशपत्रं च दमनं मरु
कं तथा॥ ततः श्रेष्ठं बिल्वपत्रं ततस्तु तुलसीवरा॥ एतेषां च यथालाभं पत्रैरभ्यर्चयेद्धरि
मिति॥ पुष्पेषु कलिकाः वर्ज्या ग्राह्यं कमलचंपकं॥ जातेन तुलसी ग्राह्या नान्यथा राजवल्ल
भ॥ अस्नात्वा तुलसीं छित्वा देवार्थे पितृकर्मणि॥ तत्सर्वं निष्फलं याति पंचगव्येन शुध्यति॥ इ

Indira Gandhi National Centre for the Arts

तिपाठे॥ अपवर्ज्यपुष्पाणि विष्णुधर्मोत्तरे॥ उग्रगंधीन्यगंधीनि कुसुमानि न दापयेत्॥ अन्या
यतनजातानि कंटकीनि तथैव च॥ रक्तानि मकालजातानि चैत्यवृक्षोद्भवानि च॥ श्मशानजा
आ. का. तपुष्पाणां दाने देवे विवर्जयेत्॥ कर्कराख्यस्य पुष्पाणि तथा धत्तूरकस्य च॥ कुष्माण्डकुटज
५४ चार्कं नैवेद्यं जनार्दने॥ शिवस्य वर्ज्यानि प्रासाददीपिकायां॥ जपावंधूक सिंहारं तथा त्रैसं
धिके शुभे॥ मदंती केतकी यूथी यूथी मालती कुटजानि च॥ बर्बरीसर्जपत्रीं च तथा त्वकुमु
दद्ययं॥ आनीतं नापयेत् स्वं भोः प्रमादादपि केशवः तत्॥ स्कांदे नु ग्राह्या॥ पुष्पाणि। वाहिनं कर्णि
कारं च करवीरं तिलस्य च॥ विल्वपत्रं च कल्लारमर्कं मंदारमेव च॥ नीलोत्पलं च रक्तं च कम
लं पद्मसंज्ञकं॥ कदंबं च कुसुंभं च अशोकं वकुलं तथा॥ एवमादीनि पुष्पाणि विशिष्टानि
शिवार्चने॥ काशीखंडे॥ कस्तूरीकापाहौ भागौ द्वौ भागौ कुंकुमस्य च॥ चंदनस्य त्रयो भागाः राम:
: शिशिनस्त्वेकएव हि॥ यक्षकर्दम इत्येव समुसुरवल्लभः॥ गारुडे॥ कर्पूरं चंदनं दर्भं कुं ५४
कुमं च समांशकं॥ सर्वगंधमिति प्रोक्तं समस्तामरवल्लभं॥ देवीपुराणे विशेषः॥ शिव

विवर्जयेत् कुंदमुन्मत्तं च हरेः सदा॥ देवीनां चार्कमंदारावादित्ये तगरं तथा॥ आचारदीपेपि॥ अक्ष
तैर्नार्चयेद्विष्णुं न तुलस्या गणेश्वरं॥ दूर्वाभिर्नार्चयेद्दुर्गां न केतक्या महेश्वरं॥ जलं पर्युषितं त्या
ज्यं पत्राणि कुसुमानि च॥ तुलस्यगस्त्यविल्वानि गंगावारि न दुष्यति॥ न निर्माल्यं हेमपुष्पमपु
ष्पमर्पितं सदेति॥ तथा॥ वस्त्रानीतं करानीतं यं गानि न मेव च॥ एरंडपत्रेणानीतं तत्स
र्वं पूजाच निष्फला॥ योर्चयेद्धिविम्हलप्यापराणी तैस्त्रु साधनैः॥ पूजाफलादिमेवाप्य न समग्रं
फलं लभेत्॥ शौनकोपि॥ उत्तमावन्नापूजाक यक्तानां तु मध्यमा॥ अधमा याचितापूजा
चौर्येणैव तु निष्फला॥ शौर्पदोषः शूद्रस्य न हि जस्य॥ तदुक्तं मिताक्षरायां॥ याज्ञवल्क्येन॥
ग्रामेच्छया गोप्रचारे भूमी राजवशेन वा॥ द्विजस्तृणैधपुष्पाणि सर्वतः स्ववदाहरेत्॥ रणं वा
यदि वा कार्यं पुष्पं वा यदि वा फलं॥ आनाएच्छन्हि गृह्णानः शूद्रो वै दंडमर्हतीति॥ तुलसीग्र
हणे निषिद्धदिवसादिकाल निर्णये॥ भानुभार्गवभौमेषु च मनी याने च वैधृतौ॥ संक्रांतौ पक्ष
योरंते द्वादश्यां निशि संध्ययोः॥ तुलसीं ये विचिन्वंति ते छिंदंति हरेः शिरः॥ वैष्णवस्तु विशे

Indira Gandhi National
Centre for the Arts

षः स्कांदे॥ नाछिंद्यात्तुलसीं विप्रो द्वादश्यां वैष्णवः क्वचित॥ अमेध्यपि निषिद्धेषु चिनुयात्तुल
सीं सदेति॥ मात्स्येपि॥ भानुवारं विना हर्वी तुलसीं द्वादशीं विनेति॥ तद्ग्रहणमंत्रस्तु॥ तुलस्य
मृतजन्मासि सदा त्वं केशवप्रिये केशवार्थं विचिनोमि वरदा भव शोभने इति॥ अथ बिल्वादी
नाम निर्माल्यदिनसंख्योच्यते॥ ह्रदाह्निके॥ बिल्वापामार्गजातीतुलसीशमीशतकैतकी
भृंगराजमंदारभोजाहि दर्भ मुनितिलजगुरब्रह्मकल्हारमल्लयः॥ पंचाग्न्यारातिकुंतीदमन
मरुवकाबिल्वतो ह्यानि शस्ता सिंश३० ऋ३ का१ मा११ श११ द धि४ नि धिर्वसु८ भृ१ यमा
२ भ्र्य एवं॥ भारते दानधर्मे॥ हरिचंदन कस्तूरी कर्पूर केसरान्वितं॥ गंध द्यात्प्रयत्नेन
दुर्गंधान्विवर्जयेत्॥ गंधेन देवास्तुष्यंति दर्शनाद्यक्षराक्षसाः॥ नागाः समुपभोगेन त्रिभि
रेतैस्तु मानुषाः॥ अत ऊर्ध्वं प्रवक्ष्यामि धूपदानविधेः फलं॥ निर्यासाः सारिणश्चैव कृत्रि
माश्चैव ते त्रयः॥ निर्यासाः शल्लकीवर्ज्या देवानां दयितास्तु ते॥ गुग्गुलुः प्रवरस्तेषां सर्वेषा
मिति निश्चयः॥ अगरुः सारिणां श्रेष्ठो यक्षराक्षसभोगिनां॥ दैत्यानां शल्लकीयश्च कांक्षि



तो यश्च तद्विधः॥ अथ सर्जरसादीनां गंधैः॥ पार्थिवदारवैः फलिनो रससंयुक्तैर्मनु
ष्याणां विधीयते॥ दीपदाने प्रवक्ष्यामि फलयोगमनुत्तमं॥ यथा येन यदा चैव प्रदेया यादृ
दृशा ते॥ ज्योतिस्तेजः प्रकाशं वाप्यूर्ध्वगं चापि वर्ण्यते॥ प्रदानं तेजसां यस्मात्तेजो वर्द्धयते नृणां
॥ अंधं तमस्तामिस्रं च दक्षिणायनमेव च॥ विनाशयति तत्सर्वं तमस्यैव भेषजं॥ आलोक
दाता चक्षुष्मान् प्रभायुक्तो भवेन्नरः॥ दीपान्दत्वा नोपहिंस्येन्न हरेन्नोपनाशयेत॥ दीप
हर्ता भवेदंधस्तमोगतिरसुप्रभः॥ हविषा प्रथमः कल्पो द्वितीयश्चौषधीरसैरित्यादि॥ त
था॥ स्नाने धूपे तथा दीपे नैवेद्ये भूषणे तथा॥ घंटानादं प्रकुर्वीत तथा नीराजनेपि च॥ वन
स्पतीति मंत्रेणादेव प्रादेशं धूपयेत्॥ धूपयेद्यजनेनैव न करेण न वाससा॥ तुलसीरहितं पु
ष्पं हृद्विशल्यं मया पितं॥ तुलसीमंजरीग्राह्या तदभावेतु पल्लवः॥ तदभावेतु पत्रं स्यात्तदभा
वेतु काष्ठकं॥ तदभावेतु मूलं स्यात्तदभावेतु मृत्तिका॥ मृत्तिकायाः अभावेतु तुलसीशब्द
उच्यते॥ तथा॥ स्वयं निर्वापितं दीपमाजिघ्रंति सुरारयः॥ तस्मात्त्रिर्वापयेद्दीपं देवानां घ्राणतु

Indira Gandhi National
Centre for the Arts

ष्ठये॥सूक्तकालेतुनैवेद्यंनचेत्पुष्पादिनैवतु॥कल्पनीयंमयप्राचोक्तंहरिणेवार्जुनायवै
॥पत्रंपुष्पंफलंतोयंयोमेभक्त्याप्रयच्छति॥तदहंभक्त्युपहृतमश्नामिप्रयतात्मनामिति
गीतायां॥वसिष्ठः॥उपादेयानिशाकानिभक्ष्याणिचफलानिच॥सुपक्वानिसुहृद्यानि
पवित्राणिनिवेदयेत्॥कदलीकारवल्लीचपटोलीबृहतीद्वयं॥कूष्मांडंकंटजंचैवउर्वा
रुद्वयमेवच॥पनसंनारिकेलंचधात्रीचबदरीफलं॥कपित्थंपक्वद्राक्षंनाकमाम्रमाम्रा
तकंतथा॥अपवित्राणितुसएवाह॥कोद्रवाणिकुलित्थानिनिष्पावंचमसूरकं॥कूष्मा
ण्डावककल्मानिमूलकंभिल्लपिष्टकं॥एतद्वर्जयेन्नित्यंसंहर्तेनैवेद्यवेदने॥पंचरात्रे॥पार्श्व
संस्थानहिनिभोज्यान्वारिभिःक्षालितान्बहिः॥तन्मध्यमभिन्नतुर्दिक्षुकल्पोर्ध्वकासूपंडका
न॥देवस्यदक्षिणेपार्श्वेनालाफलकमूपिषु॥सुवर्णादिषुपत्रेषुपरिप्लावेषुहूरे:
॥नपिबेद्भूरवतोयंचनभूमौतुनिक्षिपेत्॥नसंप्रोक्षतेनैवेद्यंभुक्तौवाघवान्नभवेत्॥
तस्मात्कुंभोद्भवनैवेद्यंप्रोक्षयेत्बुधः॥ततःप्रणाघाहुतयोदातव्याःपरमात्मनि॥ 

ष्या टंहाठकोतमः:वह्निमंडलपर्यंतंपेद्युगांतःपंसतितस[illegible] मूलमंत्रंजपेदनुतोनारायणात्मकं॥
अष्टोत्तरशतंवैवुने॥घंटानादंविनाऽर्पणंविहान्याजुमर्हति॥दीपोपचारैनैवेद्यंघंटास्वनसमन्वि
तं॥चतुरष्टांगुलोत्सेधंदीपंवर्तिसमन्वितं॥उद्वेएदायहंस्ताभ्यामापादतलमस्तकं॥त्रिःपरिभ्रा
म्यदेवेशंवहिरेनंततःक्षिपेत्॥नीराजनेमहाविष्णोर्मिरवंसूर्यसमप्रभं॥येपश्यंतिमहाभागास्तेषां
पुण्यमनंतकं॥कोषीब्रह्महत्यानामगम्यागमकोटयः॥दहत्याल्लोकमात्रेणविष्णोरारात्रिकंस
देति॥तत्रैव॥आवाहनंचासनंचसांनिध्यंसंनिरोधनं॥अर्घ्यंचाचमनंचैवंगंधपुष्पविभूषणं॥
दद्यादेतोपचारांस्कसर्वेभक्ष्यपृथक्पृथक्॥सदावरणसंस्थेभ्यःस्वाहांतैःस्वस्वनामकैः॥पंचधूपदी
पादिकंतेषांतत्संविष्णुनासहेति॥अथविष्णुशक्तयः॥विमलोत्कर्षिणीज्ञानाक्रियायोगातथैव
च॥प्रव्हीसत्यातथेशानाःनुग्रहाविष्णुशक्तयः॥अथशिवस्य॥वामाज्येष्ठाततोगौरीकलाक
लविकरणिका॥विकरिणपाह्निमाप्रोक्तावलावलविरिणिका॥मनोन्मनीतिसंप्रोक्ताःशैवपीठस्य
शक्तयः॥अथगणेशस्य॥तीव्रास्याज्वलिनीनंदाभोगदाकामरूपिणी॥उग्रातेजोवतीसत्या

Indira Gandhi National
Centre for the Arts

आ॰का॰ ५८

नवमी विघ्नाशिनी॥ अथ सूर्यस्य ग्रस्तक्षा जया भद्रा विभूतिर्विमला तथाः॥ अमोघा वैद्यु
ती चेति नवमीः सर्वतोमुखी॥ अथ दुर्गायाः॥ विभूतिरून्नतिः कान्तिः कीर्तिः सृष्टिः कीर्तिस्व
संनतिः॥ व्याष्टिरुत्कृष्टिकृद्धिश्च दुर्गा शक्त उदाहृताः॥ तथा॥ द्वादश्यां हरेः स्नानोपचारेण का
र्येद्रात्तुर्मासं सिंहपरिचर्यायां॥ जन्मप्रभृति यत्किंचित्सुकृतं तु पुराजितं॥ नश्यति द्वादशदिने
होर्निर्माल्यलंघनादिति पाद्मोक्तेः॥ न चैतन्निर्माल्यलंघनविषयं॥ तस्य सर्वदैव संबंधि
नः सर्वदा निषिद्धत्वेन हरिद्वादशीपदयोर्वैयर्थ्यापत्तेः॥ स्नानं यो हरये दद्याद्द्वादश्यां वैष्णवादि
कः॥ पक्षस्रजा फलं [illegible] संविवा कुलं यायगच्छतीपंच रात्रेत्रैरुष्टम भिधानात्॥ दिवा निषेधा द्रात्रा
व भिषेको द्वादश्यामिति गम्यते॥ दमनकपवित्र[illegible]रोपणाद्वादश्यामि रात्रावपि नाभिषेकः॥
दमनद्वादशे चैव पवित्रारोपणी तथा॥ न स्नानं हरये दद्यात्त्रावार्षिकपिंडाभिषेकः॥ दम
नद्वादशी चैव पवित्रारोपणी तथा॥ न ष्पा स्नाने हरये दद्याद्रात्रा वार्षिकदाचनेति स्मृतेः॥ का
र्तिकद्वादश्यां प्रातः स्नपनमुक्तं निर्णयामृते॥ प्रातरुत्थाय मतिमान् विष्णोः स्नानं प्रकल्पयेत्॥ रमः ५८

दद्यात्क्षीरेण मधुना तथा गंधोदकेन वेति॥ नैवेद्यपात्रमुक्तं स्कांदे॥ हैरण्यं राजतं ताम्रं कांस्यं
पालाशपत्रकं॥ नैवेद्याय यात्त्रपत्रं वा पात्रं विष्णोरतिप्रियं॥ भक्ष्यं भोज्यं च लेह्यं च चोष्यं पेयं
गुणान्वितं॥ दद्याद्धि हरये नित्यं पथ्यं प्रियमथात्मनः॥ प्रक्षिप्य तुलसीं सोक्ष्मस्तत्समस्तं मम
मंत्रयेत्॥ नैवेद्यं शंखतोयेन प्रोक्षेतन्नकादन्यथा॥ पानीयं चामृतीकृत्य परेशाय निवेदयेत्॥
ततो जवनिका कार्या मुहूर्तं मनवेक्षमाणा आसीनो जपनीति स्मृत्वा मकरणे बोधायनो
क्तेः॥ गंधूषार्घ्यं जलं दत्वा दद्याद्वाचमनं ततः॥ हस्तप्रक्षालनं सकर्पूरं मुकुटं भूषणं निवा॥ कं
पूरैलादिसंयुक्तं मूलं च निवेदयेत्॥ प्रदर्शयेद्दर्पणं कल्पयेच्छत्रचामरं॥ महानीराजनं
चैव पुष्पांजलिमथाक्षिपेत्॥ प्रदक्षिणा नमस्कारान्कुर्याद्वै भक्तिपूर्वकं॥ पद्मोत्सर्दन्तर
गर्भे त्कृत्वा चलनवार्जितो॥ वाचामात्रं मनो ध्यानं चतुरंगं प्रदक्षिणं॥ उरसा शिरसा दृष्ट्या
मनसा वचसा तथा॥ पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टांग ईरितः॥ यजुस्कंध स्पृष्ट्वा गर्दभस्य
मूलिंगास्पृष्ट्वा तथैव हि॥ स्त्रीणां नक्षः स्थाले स्पृष्ट्वा सा भूमिर्नश्यति॥ ध्रुवमिति तत्र नमस्का

Indira Gandhi National
Centre for the Arts

अ॰का॰ ५८ र्व्यतिरिक्त विषयं ॥ नमस्कारे उरसेति विधानात् ॥ एकोंचं यां खोसे भतिस्तोदधाविनाय
के ॥ चतस्त्रः केशवेद धाक्षि वेचाईमर क्षिणां ॥ अर्ह्मद क्षिणापि देवालये ॥ नग्न दो ॥ त
त्रत्रषचंउ घभावात् ॥ ततो देवं स्तुवीत ॥ जितंते पुंडरीकाक्ष नमस्ते विश्वभावन ॥ नमस्तेस्तु
हृषीकेश महापुरुष पूर्वज ॥ नमो हिरण्यगर्भाय प्रधानाव्यक्तरूपिणे ॥ ॐ नमः भगव
ते वासुदेवाय सूक्ष्मज्ञानस्वभाविने ॥ देवानां दानवानां च सामान्यमधिदैवतं ॥ सर्वदा चरण
द्वंद्वं व्रजामि शरणं तव सादिरम्बिधानोक्तं स्तोत्रं ॥ तत्प्रथमस्तवकं पुरुषसूक्त वि
धानेन द्रष्टव्यं ॥ एवं भगवंतं प्रसन्नं ब्रह्मादीन् पूजयेत् ॥ मुखे पुष्पांजलिं दत्वा गणेशादि चिन्ने
भवेत् ॥ गणेश एव सरस्व श्रेतत्र सूर्यश्च मामद्वेदिसाचादीपोक्तः ॥ तत्र मंत्रः ॥ रमाप्र रामः
सादयादेवासिन काद्याः शुकादयः ॥ श्रीनृसिंह प्रसादो यस्य सर्वेग हं तं शं भवार्हति ॥ गणे ५८
शस्तत्र क्रतुउ प्रदद्यात् ॥ संपूर्णस्तु चंउांशवे ॥ शक्त्यास्तु उद्धिष्टं चंउाय निवेदयात् ॥ अयप्र
जापरा चः ॥ स्कांदे ॥ नांगुष्ठे मर्दयेद्देवं नाधः पुष्पैः समर्चयेत् ॥ करांग्रे निक्षिपेन्नोयं वज्रफत

समं भवेत् ॥ शालग्राम शिलातोयमपीत्वा यस्तु मस्तके ॥ मक्षेपणं प्रकुर्वीत ब्रह्महा स निगद्य
ते ॥ गारुडे ॥ पादोदकं पिबेन्नित्यं नैवेद्यं भक्षयेद्धरेः ॥ शेषा स्तु मस्तके धार्या इति वेदानुशासनं ॥ पा
दोदकस्य रूपं तु ॥ उदकं वसने चक्रं शंखं तुलसीदलं ॥ घंटा सुं कं शिला ताम्रं नव भिश्र रणोद
कमिति ॥ पावनं विष्णु नैवेद्यं सुरसिद्धर्षिभिः स्मृतं ॥ अन्यदेवस्य नैवेद्यं भुक्त्वा चांद्रायणं चरेत् ॥
स्कांदे ॥ विष्णुमूर्द्धि स्थितं पुष्पं शिरसा यो वहेन्नरः ॥ अपयाति तत्पापः स्याघात्युग चतुष्टयं ॥ ती
र्थग्रहणमकारस्तु ॥ वस्त्रं चतुर्गुणीकृत्य समास्थाय वामके करे ॥ दक्षिणेन करेणाथ शंखोदकम
थाददेत ॥ प्रक्षिप्य मस्तके विप्रः तीर्थं ग्राह्यं त्रिहततः ॥ देवदेव जगन्नाथ शंख चक्र गदाधर ॥ दे
हि देव ममानुज्ञां तव तीर्थ निषेवणे ॥ लब्ध्वानुज्ञां ततस्तीर्थं पठेन्मंत्रमिमं ततः ॥ शालग्राम शिला
वारि पापहारि निषेवितं ॥ अकालमृत्युहरणं सर्वव्याधि विनाशनं ॥ सर्वदुरितोपशमनं विष्णु
पादोदकं शुभं ॥ विष्णोः पादोदकं पीतं कोटिजन्माघनाशनं ॥ मदेवाष्टगुणं पापं भूमौ बिंदुनिपातना
त् ॥ स्नाने चाचमने चैव भोजनादौ तथैव च ॥ तथैव भोजनस्यांते शालग्राम जलं पिबेदिति ॥ आ

Indira Gandhi National
Centre for the Arts

आ॰का॰ ५९

दिसपुराणेतु॥ अग्राह्यं शिवनिर्माल्यं पत्रं पुष्पं फलं जलं॥ शालग्रामस्य संपर्कात्सर्वं याति
पवित्रतामिति विशेषोक्ते निषेधस्य केवललिंगपरत्वं गम्यते॥ शिवैकभक्तस्य तु ग्राह्यमपि भवति
॥ निर्माल्यं धारयेद्भक्त्या शिरसा पार्वतीपतेः॥ राजसूयस्य यज्ञस्य फलं प्राप्नोति निश्चितमिति
॥ अत्र भक्तेति वदता लोभादिना न ग्राह्यमिति सूचितं॥ यद्वा निषेधस्य महास्थानपरः॥ कू
र्मसंहितायां निक्षिप्तेदिति पाद्मोक्तेः॥ अन्यत्रापि॥ बाणलिंगे स्वयंभूते चंद्रकांते हृदि स्थिते॥ सौ
वर्णे मरकते चैव शंभोर्नैवेद्यभक्षणमिति॥ अथ वाराहोक्ताः॥ पूजापराधाः॥ द्वात्रिंशत्तत्र मु
ख्यास्ते वाराहे विष्णुनोदिताः॥ नियमक पुंड्र धरोभूत्वा वाह्यकृत्वा देवतार्चने॥ यावितैः पत्र पु
ष्पाद्यैर्यः करोति ममार्चनं॥ अप्रक्षालितपादोयः प्रविशेन्मम मंदिरं॥ ममहृद्यैरभि मुख्ं तां
बूलं चर्वयेद्बुधः॥ कौसुंभशाकं मत्स्यो मक्षयेन्मम सेवकः॥ उरूहकपलाशस्थैः पुष्पैः
कुर्यान्ममार्चनं॥ ममार्चमासुरे काले यः करोति विमूढधीः॥ अवैष्णवस्य पक्वान्नं यामे
ध्यं विनिवेदयेत्॥ अवैष्णवेषु पश्यत्सु मम पूजां विदधाति यः॥ दिनांतरे जपक्वान्नं योम

राम: ५९

ध्यं विनिवेदयेत्॥ नीलीरंजितवस्त्रं यन्मर्त्यो मह्यं निवेदयेत्॥ नवमक्षालितं वस्त्रं जीर्णं
यन्मे निवेदयेत्॥ नीलीरंजितवस्त्रं यन्मर्त्यो मह्यं निवेदयेत्॥ नवमक्षालितं वस्त्रं जीर्णम्
न्ये निवेदयेत्॥ अमोनीधमैलिप्तांगो मम पूजां विदधाति यः॥ ज्ञानमन्त्रनिरोधेन मम पूजा
विदधाति यः॥ नखोदकेन स्नपने कुरुते मम मानवः॥ कृत्वा वा तमनाचम्य तथा प्राकृतके
वलः॥ पीठमस्तो पविष्टस्तु पूजयेद्यो निरासनः॥ मन्मये धूपदहनं दीपं च कुरुते ऽर्चने॥
मम पूजकोनकुरुते तां तु पूजां वदामि ते॥ मम पूजकः शिवद्वेषी मद्भक्तस्त्वं शिवो द्यमः॥ भूता
ममूजको न कुरुते तेन कं नहृद्विवासरं॥ परस्य परिधानं यत्परिधाप्यार्चयेत्तु मां॥ आपूजयि
त्वा विघ्नेशं संभाष्य च कपालिनं॥ हद्यो यत्कर्म क्रियते त्रिकालार्चनवर्जितं॥ अंधकारे
स्पृशेन्मां च संभाष्य च रजस्वलां॥ वामहस्तेन मां स्पृष्ट्वा स्नापयेद्यदि मूढधीः॥ महापराधा
न्न जानीहि द्वात्रिंशल्लक्षमामिताः॥ अन्येपि॥ अंगलग्नं च जीर्णं च वस्त्रं देवे न चार्पयेत्
॥ मन्मये भिन्नपात्रे वा पाषाणे लोहकाष्ठजे॥ पल्लवे करभे मोह्यं न नैवेद्यं समर्पयेत्॥ या

Indira Gandhi National
Centre for the Arts

आ.का. नैर्वा पादुके गोपीमतं भगवद्गृहे। देवोन्सवाघसे वा च अग्रणामस्तदग्रातः॥ उच्छिष्टे चैव चा
६० ण्डाले भगवद्दत्ता द्विके॥ शाक्तो गौराणोपचारस्क अनिवेदितभक्षणं॥ तत्र स्का लोऽह्वानं
च फलात्ना मनपीणामिस्वगसोन्कापराधाः॥ ॥ अथ गृहे कर्तृक पूजा मांसज्ञ
देवतानियमो भविष्यपुराणे॥ गृहे लिंगद्वयं नार्च्यं गणेशत्रितयं तथा॥ शक्तित्रयं
तथा नार्च्यं शालग्रामद्वयं तथा॥ द्वौ शंखौ नार्चयेद्वैव भग्नां च प्रतिमां तथा॥ नार्चयेद्वत
थामत्स्यकूर्मादिदशकं तथा॥ द्वे चक्रे द्वारकायास्तु नार्च्ये सूर्यद्वयं तथा॥ शालग्रामाः समा
पूज्या विषमा न कदाचन॥ विषमेषु त्रयं शस्तं समेषु द्वितयं नहि॥ एतेषां पूजना त्रिस मुद्वेगं
प्राप्नुयाद्गृही॥ तथा॥ रंकारूक्षाव क्राःतिस्थूलाः शालग्रामशिला न पूज्याः स्युरिति पुराणे॥
अत्र गृही सुपाहानाहूत्मवारिपसोदेर्न दोष इति ध्वन्यते॥ शालग्रामलक्षणमुक्तं स्कां
दे॥ शालग्रामशिलायास्तु प्रतिष्ठा नैव विद्यते॥ महापूजां तु कृत्वादौ पूजयेत्तां ततो बुध राम:
:॥ खंडितं स्फुटितं भग्नं पार्श्वभिन्नं विभेदितं। शालग्रामसमुद्भूतं शैलदोषावहं नहि॥ च ६०

क्रं वा केवलं तत्र पद्मेन सह संयुतं॥ केवला वनमाला वा हरिर्लक्ष्म्या सह स्थितः॥ अत्रापि दो
षाभावो यस्मादिति परः॥ द्वारदेशे समे चक्रे दृश्यते नान्तरीयके॥ वासुदेवः स विज्ञेयः शुक्लाभश्चा
तिशो सूक्ष्मवक्रस्तु पीतदीप्तिस्तथैव च॥ सुषिरं छिद्रबहुलं दीर्घाकारं तु तन्मद्वेत्॥ अनिरु
द्धस्तु नीलाभं वर्तुलं चातिशोभनं॥ रेखात्रयं तु पद्मोर्ध्वं पद्मेन लांछितं॥ नानावर्णमनं
तं स्यान्नागभोगेन लांछितं॥ अनेकमूर्तिसंयुक्तं सर्वकामफलप्रदं॥ विदिक्षु दिक्षु सर्वासु
यस्मा छुद्रहश्यते मुखं॥ संदितरे वो विज्ञेयः पुराणपुरुषो जनः॥ अर्द्धचंद्राकृति देवो हृषीकेश उ
दाहृतः॥ तम चोलभते स्वर्गं विषयांश्च समीहितान्॥ श्रीधरं तु तथा देवं चिह्नितं वनमालया॥ कदंब
कुसुमाकारं रेखापंचकसंयुतं॥ मत्स्यरूपं तद्देवेशं दीर्घाकारं तु तन्मद्वेत्॥ बिंदुद्वयसमायुक्तं
कांस्यवर्णं सुशोभनम्॥ वामपार्श्वस्थिते चक्रे शुभवर्णे च बिंदुके॥ लक्ष्मीनृसिंहो विख्यातो भु
क्तिमुक्तिफलप्रदः॥ कपिलो नारसिंहोऽथ पृथुचक्रे सुशोभने॥ ब्रह्मचारी विकाशी स्यान्नान्य
स्य समर्पजने॥ नरसिंहस्त्रिबिंदुः स्यात् कपिलः पंचबिंदुकः॥ ब्रह्मचर्येण पूज्यः स्यादन्यथा सर्ववि

Indira Gandhi National
Centre for the Arts

ग्रहः॥ स्थूलं च क्रतुर्यं मध्ये गुडलाक्षासवर्णकः॥ हारोपरि तथा रेखा पंकजस्य सुशोभना॥ स्फु
टितं विषमं चक्रं नारसिंहं तु कापिलं॥ संप्राप्य मुक्तिमाप्नोति संग्रामे विजयी भवेत्॥ त्रिविक्रमं तथा
देवं श्यामवर्णं महाद्युतिं॥ वामपार्श्वे तथा चक्रे रेखा चैव तु दक्षिणे॥ प्रदक्षिणावर्तकृता वनमा
लाविभूषिता॥ सा शिलाक्रमसंज्ञा स्याद्धनधान्यसुखप्रदा॥ स्थूलो दामोदरो ज्ञेयः सूक्ष्मचक्रो
भवेत्प्रभुः॥ चक्रे च मध्यदेशस्थे मलिनः सुखदायकः॥ चतस्रो यत्र दृश्यन्ते रेखाः पार्श्वसमीप
गाः॥ द्वे चक्रे मध्यदेशे तु सा शिला तु चतुर्मु। खी॥ तत्राप्यामलकीतुल्या सूक्ष्मा चातीव या भवे
त्॥ तस्यामेव सदा लक्ष्मीस्तिष्ठति सहवासम्यहं॥ यथा यथा शिला सूक्ष्मा तथैव च महत्फलं॥ तस्मा
त्पूजयेत्त्रिसधर्मकामार्थसिद्धये स्मृतिः॥ द्वारकायां च क्रतीर्थे चक्रांकं नेत्रमुत्तमं॥ सम्प्रसन्ने
मुने साक्षात्कृत्स्नहत्याप्रलोकिते॥ तस्माच्चक्रांकमपि पूजनं सर्वभक्त्या द्विजैः सदा॥ भिन्नं चैव दर्प
नाशाय स्थूलं बुद्धिविनाशनं॥ दीर्घश्चायुर्हरं ज्ञेयं रूक्षं बुद्धिविनाशकृत्॥ शुल्कवर्णं शुभं
चक्रे शतचक्रं तथैव च॥ स्कान्दे॥ प्रतिमामूर्तिलक्ष्मस्य मयिका श्रीखंडदो ज्ञेयं॥ ग्रंथगौरव



भियानालिखि॥ तथा॥ पूज्यपूजकयोर्मध्ये सर्वाभिसमभिधीयते॥ नैशीनं पूजकस्यैव सं
ज्ञापेक्षं नम्रचेतन॥ देवस्य मुखमारभ्य दिशं प्राचीं प्रकल्पयेत॥ तदादि परिवाराणामंगस्थावरं
गंकमात॥ इदमागमोक्तपूजाविधयं॥ यस्मिन्विवस्वान्विष्णुवस्तु देतिप्राचीतितां वेदवि
दो वदंति॥ मध्यं पुनः पूजकपूज्ययोश्च सदागमज्ञाः प्रवदंति पूर्वामिति संग्रहोक्तेः॥ तथा
॥ अकुर्वन्देवतापूजां भुंजीयाद्वात्मरोऽपदि॥ ग्रामसंख्यान्लोहपिंडानश्राति यममं
दिरे॥ नविघ्ना राधनाद्यस्मद्विघ्नेतकर्म वैदिकं॥ तस्मादनादिमध्यांतं नित्यमाराधयेद्धरि
मितिकूर्मपुराणोक्तेरिसकलमतिमंगलं॥ इति श्रीमन्नागदेवमहात्मजश्रीमदानंतभट्ट
विरचिते विधानपारिजाते देवतार्चनविधानम्॥ ॥अथ पंचमहायज्ञाः॥ तत्र क्रमः॥
पंचसूनाः गृहस्थस्य वर्तंते हरहः सदा॥ कंडनी पेषणी चुल्ली जलकुंभ उपस्करः॥
एता निवाहयन्विप्रो बाध्यते वा मुहुर्मुहुः॥ एतेषां पावनार्थाय पंचयज्ञाः प्रकीर्तिताः॥ हिं

Indira Gandhi National
Centre for the Arts

सास्थानं स्नता॥ उपस्कारो मार्जनादिः॥ कात्यायनोपि॥ देवभूतपितृब्रह्ममनुष्याणा
मनुक्रमात्॥ महासत्राणि जानीयात्त एव हि महामखाः॥ एते च॥ पंचयज्ञविधानं तु गृ
ही नित्यं न हापयेदिति शंखवचनान्नित्या एव॥ ननु फलश्रवणात्काम्याः॥ न वाकंउ
मादिनिमित्तश्रवणान्नैमित्तिका इति॥ तदुक्तं मिताक्षरायाम्॥ येदेषां फलश्रवणात्का
म्याः॥ न वाकंउमादिनिमित्तश्रवणान्नैमित्तिका इति॥ तदुक्तं मिताक्षरायाम्॥ येदे
षां फलश्रवणं तत्सावनत्वाख्यापनार्थं न काम्यत्वप्रतिपादनायेति॥ एवं नित्यत्वेपि॥
सायंप्रातर्वैश्वदेवः कर्तव्यो बलिकर्म च॥ अनश्नतापि सततमन्यथा किल्बिषी भवे
दिति कात्यायनवचनाद्वैश्वदेवाख्यं कर्म पुरुषार्थमेव नत्वन्नसंस्कारकं॥ अत एव प्र
वसतोप्यावश्यकमिदमित्याह परिशिष्टकारः॥ प्रवसेदाहिताग्निश्चेत्कादाचित्काल
पर्ययात्॥ यस्मिन्नग्नौ भवेत्साको वैश्वदेवस्तत्र वै॥ मनुरप्येवमेवाह॥ वैश्वदेवं तु नि
र्हृतं यद्युन्यो तिथिराव्रजेत्॥ तस्मा अन्नं यथाशक्ति प्रदद्यान्न बलिं हरेत्॥ यद्यन्न राम:
६२

संस्कारः स्यात्तर्हि बलिं नाम वैश्वदेवं न कुर्यादिति न वदेन्नानुदितितहीकापि॥ केचित्तु सा
यंमानः सिद्धस्य हविष्यस्य जुहुयादित्याश्वलायनादिवचनात्पुरुषार्थत्वमन्नसंस्कारकत्वं
चेत्युभयात्मकत्वमन्यते॥ अत्र॥ अत्र सायंशब्देन रात्रिः कथ्यते॥ प्रातःशब्देन च दिन
मिति स्मृतं॥ धर्मप्रश्नेप्येवमेव॥ यस्याग्नौ न क्रियते यस्य चाग्रं न दीयते॥ नजभ्दीक्रमृषि
ति यस्योति कर्मणि षष्ठी॥ यदन्नमित्यर्थः॥ अग्रं भिक्षा॥ संग्र क्रियते यस्य चाग्रं न दीयते॥
न तन्भोक्तव्यमिति यस्येति कर्मणि षष्ठी॥ यदन्नमित्यर्थः॥ अग्रं भिक्षा॥ संग्रेहेपि॥ भ्रातॄ
णामविभक्तानामेकपाको भवेद्यदि॥ वैश्वदेवादिकं श्राद्धं कुर्युस्ते वै पृथक्पृथक्॥
तथा॥ अविभक्तेन पुत्रेण पितृमेधो मतेहनि॥ स्थानांतरे पृथक्कार्यो दर्शश्राद्धं तथैव
चेति॥ तथा स्वविशेषं मदनपारिजातिज मदग्निराह॥ वैश्वदेवं तथा रात्रौ कुर्याद्बलिहृति
तथा॥ महतः पंचयज्ञांस्तु दिवैवेत्याह धर्मविदिति॥ अस्यार्थः॥ येषां तु प्रातस्तिनां ब्र
ह्मयज्ञव्यतिरिक्तमहायज्ञानां वैश्वदेवबलिहरणोचीनभीवक्ते यां वाजसनेयादीनां

Indira Gandhi National
Centre for the Arts

आ॰कं ६३

तिरिक्तमहायज्ञानां वैश्वदेवबलिहरणे चीतर्भावस्तेषां वाजसनेयादीनां द्विवैश्वदेवा
र्थ्यं कर्मेन रात्रौ ॥ येषां तु स्वप्रशस्ता यां कालद्वये पितृद्विधान्नमस्ति नाप्तिवा तेषां माश्वाला
यनादीनां कालद्वये पिभवतीति निर्णयइति ॥ तत्रैव व्याख्याने ॥ हविष्येषु यवामुख्यास्त
दनुव्रीहयः स्मृताः माषादिह निष्पंज्ञेयं ॥ पंचयज्ञलक्षणमाह मनुः ॥ अध्यापनं ब्रह्मयज्ञः
पितृयज्ञस्तु तर्पणं ॥ होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनं ॥ ऐपनामिध्यनं तत
र्पणं नित्यश्राद्धं अत्र विकल्पमाह कात्यायनः ॥ श्राद्धं वा पितृयज्ञः स्यात्पित्र्यो बलिर
थापि वेति ॥ पितृभ्यः स्वधा नम इति यो बलिः स पित्र्यबलिः ॥ मनुः ॥ र्पादहरहः श्राद्ध
मन्नाद्येनोदकेन वा ॥ पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन् ॥ पितृन्नुद्दिश्य विप्रां
स्तु भोजयेद्विप्रतेववेति ॥ शक्तितो अप्यवस्थेयम् ॥ अत्र विशेषमाह व्यासः आवाह
न ॥ पितृन्नुद्दिश्य विप्रांस्तु भोजयेद्विप्रतेववेति ॥ शक्तितो अप्यवस्थेयम् ॥ अत्र विशे
षमाह व्यासः ॥ आवाहनं स्वधाकारः पिंडाग्नौकरणं तथा ॥ ब्रह्मचर्यादिनियमो विश्वे

श्राप

राम: ६३

देवास्तथैव च ॥ नित्यश्राद्धे त्यजेदेतान् भोज्यमन्नं प्रकल्पयेत् ॥ याज्ञवल्क्योपि ॥ नित्यश्राद्धं दैवही
नं नियमादिविवर्जितं ॥ दक्षिणारहितं चैव दातृभोक्तृव्रतोज्झितं ॥ अत्र दक्षिणानिषेधो यथोक्तदक्षि
णापरः ॥ न तु नत्सामान्यपरः ॥ दत्वा तु दक्षिणां शक्त्या नमस्कारैर्विसर्जयेदिति नित्यश्राद्धप्रकरणे
व्यासोक्तेः ॥ इदं श्राद्धं षड्दैवतं ॥ तत्तु षट्पुरुषं ज्ञेयं दक्षिणापिंडवर्जितमिति व्यासोक्तेः ॥ इदं यत्रा
मावास्याश्राद्धादौ षड्पिदेवतारेखास्तत्र न भवति ॥ यत्र सांवत्सरिकादौ नेष्टास्तत्र भवति ॥ नित्य
श्राद्धं न कुर्वीत प्रसंगाद्यत्र सिद्ध्यति नित्यमत्कारसंज्ञोक्तेः ॥ तथा कालविशेषे काम्यश्राद्धमप्युक्तं
हेमाद्रौ ॥ अयनद्वितये श्राद्धं विषुवद्वितये तथा ॥ मन्वादौ च युगादौ च पिंडनिर्वपणादृते ॥ सर्वसं
क्रांतिषु पितृयेत्सादिसृ तिवृशाद्युगादिमन्वादिसंक्रांसमापूर्णिमावैधृतिमहालयाष्टकापाते
षु काम्यादिश्राद्धान्यनुसंधेयानि ॥ अथ वैश्वदेवधर्माः ॥ व्यासः ॥ जुहुयात्सर्पिषाभ्यक्तं तैलं
क्षारं विवर्जयेत् ॥ दध्यक्तं पयसाक्तं वा तदभावे भमापिवा ॥ लब्धसर्पसारं ॥ अलाभे येन केनापि
फलशाकोदकादिभिः ॥ पयोदधिघृतैः कुर्याद्वैश्वदेवं स्तुवेणतु ॥ हस्तेनान्नादिभिः कुर्याद्दद्वि

Indira Gandhi National
Centre for the Arts

माद्रा०
६४

संस्थिनाततः॥ कात्यायनः॥ पाणिपाहतिर्हृद्देशपूर्वस्तरीकाघ्नतादिना चेत्सुवमात्रपरीका॥ दै
वेनतीर्थेनचहूयतेहविः स्वंगारिणीत्वर्चिर्धितब्बपावके॥ उत्तानेनतुहस्तेन अंगुष्ठाग्रेणपी
डितं॥ संहतांगुलिपाणिस्तवाग्यतोजुहुयाद्धविः॥ कोद्रवंचणकंमाषंमसूरंचकुलित्थकं॥
क्षारंचलवणंसर्वंवैश्वदेवेविवर्जयेत्॥ आपस्तंबीयेपि॥ नक्षारलवणहोमोविद्यतेतथाप
रान्नसंसृष्टस्येति॥ क्षारलवणपरान्नसंसृष्टेनहविषानहोमइतिमदनपारिजातेव्याख्या
तं॥ क्षारलवणंपुराणे॥ तिलमुद्गादृतेशैव्यंसस्यंगोधूमकोद्रवौ॥ चीनकंदेवधान्यंचचण
कंचतथैवहि॥ सिन्नधान्यंसर्वशाकमेषक्षारगणःस्मृतः॥ आश्वलायनगृह्यपरिशिष्टेतु
विशेषउक्तः॥ सएषदेवयज्ञोऽहरहर्गोस्वसंमितःसर्वाभीष्टप्रदस्तस्मादेनमहरहःकुर्वी
ततमेनंवैश्वदेवहुतशेषेणपृथगन्नेनवाकुर्यान्नासशेषेणवैश्वदेवंकुर्यादिति॥ सएषःपंचा रामः
यतनप्रजारूपइत्सर्पिः॥ नान्नकरणतान्॥ इदंतुस्मार्तविषयं॥ वैश्ववानंतु॥ विष्णोर्निवेदितं ६४

ऽन्नेनयष्टव्यंदेवतांतरं॥ पितृभ्यश्चापितद्देयंतदनंतायकल्पते॥ पितृशेषंतुयोदद्याद्धरये परमात्म
ने॥ रेतोधाःपितरस्तस्यभवंतिक्लेशभागिनः इतिपंचरात्रोक्तेर्नैवेद्यशेषेणैवपंचमहायज्ञाःस्युः॥
शेषनिवेदनेदोषश्रवणात्॥ यदिदंवैश्वदेवप्रत्यक्षतोनलभ्यतेतत्रमनुष्ययज्ञात्पूर्वंकर्तव्यः॥ यच्चस्मृ
तिजयःश्रीकृष्णयज्ञस्स्मृतः॥ सचार्वाक्पर्णात्कार्यःपश्चाद्धाप्रातराहुतेः॥ वैश्वदेवा
वसानेवानामत्रेसमितिनतदितिकात्यायनोक्तेः॥ सचप्रमहेसकृदेवस्यात्॥ नहंतंतिनहोमंच
स्वाध्यायंपितृतर्पणं॥ नैकःश्रीहृदयंकुर्यात्समानोहनिकुत्रचिदितिमरीच्युक्तेः॥ हंतंतिमनु
ष्ययज्ञः॥ होमोदेवयज्ञः॥ सचयेषांद्विवारंनोक्तस्तेषामेवनिषिद्धः॥ तर्पणमपिनीवीविशेष
मात्रैभवंस्येव॥ स्नानतर्पणंकोविप्रस्त्रीयेतर्पयेत्तिलैरितिस्कांदोक्तेः॥ अयंवैश्वदेवःश्रीहृत्साग्नेः
पंचमिरग्नेःपश्चाद्भवति॥ तदुक्तंकालनिर्णयदीपिकायां॥ भिन्नान्नेनतुवैश्वदेवःश्राद्धचरेत्साग्नि
कः॥ पश्चाद्भूतमस्तावधाननिग्निकजनस्त्वग्नौहुतेर्वाक्तरंखलसमुक्तेर्विकरस्यचान्नहुततस्त्राकांत
रेणाचरेदिति॥ अनुवैश्वदेवानंतरंश्राद्धंचरेत्सर्पिः॥ हेमाद्रावपिपक्षांतकर्मनिर्वर्त्यवैश्वदेवंचसा

Indira Gandhi National
Centre for the Arts

आकं०
६५

ग्निकः॥ पिंडयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुधः इति॥ तथा॥ वैश्वदेवं गृह्णीरन्नावर्ज्यं ब्राह्मणभोजना
त॥ पितृस्संनयविधिवत्तु लिंदद्याद्विधानतः इति॥ अग्नौ अग्नौकरणोत्तरं ब्राह्मणभोजनात्संवि
वैश्वदेवः कार्य इत्यर्थः॥ यद्वा॥ वैश्वदेवं तथा कृत्वा पश्चाद्ब्राह्मणवाचनमिति॥ अनेन विकरान
न्तरं स्वस्तिवाचनात्पूर्वं कर्तव्य इति भावः॥ पित्र्यं निर्विपेत्सार्कं वैश्वदेवार्थमेव च॥ वैश्वदेवं न
पित्र्यं न दार्शं वैश्वदेविकमिति पृथक्पाकोक्तिः॥ वाजसनेयिनामुभयार्थमेक एव पाकः॥ उ
द्धृत्य घृताक्तमन्नं पृच्छत्यग्नौ करिष्य इति सूत्रव्याख्याने कर्काचार्येण तथा व्याख्यातत्वात्॥ सा
ग्नेरपि कचिदं न भवति॥ श्राद्धात्प्रागेव कुर्वीत वैश्वदेवं तु साग्निकः॥ एकादशाहिकं मुक्त्वा तत्र
यं तेविधीयते इति शालंकायनोक्तेः॥ निरग्निविषयेयं द्विरुक्तं मतं॥ प्रातिवात्सरिको होमः श्राद्धादौ
क्रियते यदि॥ देवा हव्यं न गृह्णंति कव्यानि पितरस्तथेति॥ श्राद्धशेषेणैतदिति सएवाह॥ श्राद्धं निर्व रामः
र्त्य विधिवद्वैश्वदेवादिकं ततः॥ कुर्याद्भिक्षां ततो दद्याद्धंतकारादिकं तत इति॥ यत्तोन्वाद्धाद्धूतन ६५
इति निबंधकारैर्व्याख्यातं॥ तस्मादेकादशाहश्राद्धेऽपि भिन्नपाकेन वैश्वदेवो भवति॥ एकोद्दि

ष्टेषु शेषं तु ब्राह्मणेभ्यः समुत्सृजेदिति निर्देवलेन तदन्नस्यो त्सर्गविधानात्॥ संप्रत्येपार्वणश्राद्धे एको
द्दिष्टेतर्पैव च॥ अग्रतो वैश्वदेवः स्यात्पश्चादेकादशाहनीति वैश्वदेवविधानाचेति सर्वमनवद्यं॥ ॥वै
श्वदेवानामत्र विशेषः पंचरात्रोक्तः॥ साग्नेस्तद्रहितस्यापि वैष्णवस्य विशेषतः॥ श्राद्धं नैवेद्यशेषेण वै
श्वदेवादिपूर्वकं॥ आदिशब्दाद्बलिहरणं॥ हृदप्राणशरीरेऽपि पंचमाध्याये॥ वैश्वदेवं कदा कार्यं श्राद्धे च स
मुपस्थिते॥ पाकस्तु सर्वमेवैतत्सर्वमेव विधीयते॥ वैश्वदेवोग्रतश्चैव साग्नेर्हीनाग्निकस्य च॥ कर्तव्यः
पाकस्तु सर्वभुक्तोच्छिष्टं विवर्जयेत॥ कठका एवादेर पिविशेषो धर्मानुशासने॥ निर्वर्त्य श्राद्धयज्ञं वै वै
श्वदेवं विधाय च॥ ततो गृहबलिर्देयः कठकाण्वादिकान्विनेति॥ स्थालीपाकद्विनेपि शेषमाह देवलः॥
अहूतैर्वैश्वदेवस्तु स्थालीपाकाः प्रकीर्तिताः॥ अमत्र पितृयज्ञास्तु सोपराह्णे विधीयते॥ पितृयज्ञः पिं
डपितृयज्ञः। स्थालीका इति बहुवचनं स्थालीपाकसाध्यकर्मोपलक्षकं॥ नित्यश्राद्धं पितृयज्ञ इत्याश्व
लायनादिविषयं॥ वाजसनेयिनां तु पित्र्यो बलिः पितृयज्ञः॥ अपरपक्षे श्राद्धं कुर्वीतेति सूत्रं व्याकु
र्वता कर्काचार्येण श्राद्धशब्दस्य राजसूयवत्समुदायनामधेयत्वं पूर्वपक्षितत्वाऽसावेतज्जइति मंत्रव

Indira Gandhi National Centre for the Arts

३ आ॰ कं

६६

र्णादिना पिंडदानेपि पितॄणां देवतात्वावगमात् पिंडदानसेवनामधेयत्वमिसुक्तत्वात् ॥ अंगप्रधानवि
तायाः प्रयोजनं तत्रप्रधानाकरणे ॥ नांगकरणमिति ॥ तन्मतेब्राह्मणभोजनस्यांगत्वात् ॥ गयादौ
तथादृष्टत्वात्क्षेमलं प्रपंचेन ॥ ॥ अथ मनुष्ययज्ञः ॥ अर्चितितमनाहूतं वैश्वदेवेव स्थितं ॥ अ
तिथिं तं विजानीयान्नैकग्रामनिवासिनं ॥ चक्षुर्दद्यान्मनोदद्याद्वाचं दद्यात्सूनृतां ॥ अनुव्र
जेदुपासीत स यज्ञः पंचदक्षिणाइति दानधर्मे ॥ इमादिलक्षणोपेतायानायगोत्रकुलापत्राह्म
णायासनादिनार्चयित्वान्नं दद्यादिति योद्गुरवः सनकादीन्ध्यायन्नारदमन्नेः सनकादिमनुष्येभ्यो हंतेमुक्त्वा
दद्यात् ॥ अग्रदानासामर्थ्ये कात्यायनः ॥ भिक्षां वा पुष्कलां दद्याद्धंतकारमथापि वेति ॥ मनुः ॥ ग्रास
मात्रं भवेद्भिक्षा अग्रं ग्रासचतुष्टयं ॥ अग्रं चतुर्गुणं प्राहुः हंतकारो विधीयते ॥ ब्राह्मणाभावे कात्याय
नः ॥ अप्युद्धृत्य यथाशक्ति किंचिदन्नं यथाविधि ॥ पितृभ्योथ मनुष्येभ्यो दद्यादहरहर्द्विजे ॥ उद्धृत्य पा
त्रे निक्षिपेत्तमर्पयेत् ॥ तदभावे गवादौ दद्यात् ॥ यदा वैश्वदेवात्प्रागतिथिरागच्छति तदा व्यासः ॥ अकृते वै राम:
श्वदेवे तु भिक्षुके गृहमागते ॥ उद्धृत्य वैश्वदेवार्थं भिक्षां दत्वा विसर्जयेत् ॥ भिक्षुरपि तेनैव दर्शितः ॥ ६६

ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः ॥ अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः ॥ एतेषां
च महायज्ञाय यथाकाले प्रदत्तान्नस्त्यायमः ॥ द्विजोदिनानिकर्माणि समादद्यन्नानि वेन ॥ शर्वे
र्याः प्रथमे पादे नानि सर्वाणि कारयेत् ॥ ब्रह्मयज्ञाद्वगाहीचसौरं च परिवर्जयेत् ॥ एवं सर्वश
स्त्रोक्तप्रकारेण वैश्वदेवः सांगो भवति ॥ निरग्नेरपि पचोद्वि विधानेन स्वशाखोक्त एव ॥ तदुक्तं
कात्यायनस्य परिशिष्टे ॥ अथातो धर्मजिज्ञासा केशांतादूर्ध्वमपत्नीक उत्सन्नाग्निरनग्निकः प्र
वासी ब्रह्मचारी विधुरो वा ऽन्वग्निरिति या मादृग्निमाहृत्य पचेद्द्वीसधिप्राप्यत्रिभिस्त्रसवित्रैः प्रज्व
लनादि सवितुस्त्वा सवितुर्विश्वानि देव सवितरिति एवं वदेक्षणे हुत्वा पाकं पचेत् तत्र स्वशाखोक्तं वै
श्वदेवं कुर्यात् तथा पाको भवति नद्दृष्टा पाकमध्ये यानत्रैव पिंडपितृयज्ञपक्षाधानाग्रयणानि कुर्या
दिति ॥ आश्वलायनोपि ॥ लौकिकारमोनैश्वंतसंतानसा विश्वानि नो द्यानरमेव मंत्राः ॥ नारी परां
वाप्यपरोपरां वा बुसतिरेवं विधुरानलस्येति ॥ ॥ अथ यथाकालसारिना पचोद्वि विधानेनक

Indira Gandhi National
Centre for the Arts

आं॰कं
६७

रोतिनदाशाकलैर्वैश्वदेवः कार्यः ॥ तदुक्तं व्याससमृतौ ॥ अनग्निकस्तु यो विप्रः आह्वायिन्नेदधुत
स्तुतं ॥ शाकलोक्तविधानेन जुहुयाल्लौकिकेऽनले ॥ व्यस्ताभिर्व्याहृतीभिस्तु समस्ताभिस्त
तः परं ॥ षड्भिर्देवकृतस्येती मादिमंत्रैर्यथाक्रमं ॥ प्राजापत्यं स्विष्टकृतं हुत्वैवं द्वादशाहुतीः
॥ देवकृतस्येति षण्मंत्रास्तु ॥ ॐ देवकृतस्यैनसोवयजनमसि स्वाहा १ मनुष्यकृतस्यैः
स्वाहा २ पितृकृतस्य स्वाहा ३ आत्मकृ॰ हा ४ अन्यकृत॰ स्वाहा ५ एनस एनः स्वाहा ६ अग्नयेनममे
तिसर्वत्र स्वाहा ॥ ॐकारः सर्वः स्वाहांतस्त्यागः शिष्टविधानतः ॥ भुविदर्भान्समास्तीर्य बलिकर्म
समाचरेत् ॥ विश्वेभ्यो देवेभ्य इति सर्वभूतेभ्य एव ॥ भूतानां पतये चेति नमस्कारेण शास्त्रवित् ॥
दद्याद्बलित्रयं चाग्रे पितृभ्यश्च स्वधा नमः ॥ पात्रनिर्णेजनं वारि वायव्यां दिशि निक्षिपेत् ॥
उद्धृत्य षोडशग्रासमात्रमन्नं घृतोक्षितं ॥ इदमन्नं मनुष्येभ्यो हंतेत्युक्त्वा समुत्सृजेत् ॥
गोत्रनामस्वधाकारैः पितृभ्यश्चापि शक्तितः ॥ षड्भ्यो न्नमन्वहं दद्यात्पितृयज्ञविधानतः

राम:
६७

ततोन्यदन्नमादाय निर्गत्य भवनाद्बहिः ॥ काकेभ्यः श्वपचेभ्यश्च प्रक्षिपेद्ग्रासमेव च ॥ उपवि
श्य गृहद्वारि तिष्ठेद्यावन्मुहूर्तकं ॥ अप्रमत्तोऽतिथिं लिप्सुर्भावशुद्धः प्रतीक्षकः इति ॥ ॥ सच्छू-
द्रस्यापि वैश्वदेव उक्तो याज्ञवल्क्येन ॥ भार्यारतिः शुचिर्भृत्यभर्ता श्राद्धक्रियापरः ॥ नमस्का
रेण मंत्रेण पंचयज्ञान्न हापयेदिति ॥ न हापयेदनुतिष्ठेत् ॥ नमस्कारेण मंत्रेणेति ॥ देवेभ्यो
नमो भूतेभ्यो नमः पितृभ्यो नमो मनुष्येभ्यो नम इति नमस्कारांतेन मंत्रेण ॥ यद्वा ॥ देवताभ्यः
पितृभ्यश्च महायोगिभ्य एव च ॥ नमः स्वाहायै स्वधायै नित्यमेव नमो नम इति वा पुराणोक्ते
न वाक्येन पंच महायज्ञा भवंति ॥ तेषामद्भ्येण कार्याः ॥ पक्वेन निषिद्धत्वात् ॥ पाकभावे
प्रवासे चैतत्तुल्यानौषधीस्तथा ॥ पयो दधि घृतं वापि कंदमूलफलानि चेति स्मृत्यंतरानुक
ल्पदृष्टोऽयं पंचमहायज्ञान्कृत्वा तद्दृष्टं विप्रकुले प्रवेष्टपितमपि इति श्रासुर हूर्यं ॥ श्राद्धेत्वामेनै
व तु शूद्रस्यैसादि नियमादामेनैव श्राद्धं ॥ विवाहे तु विवाहमात्रसंस्कारं शूद्रोपि लभते सदेति

Indira Gandhi National
Centre for the Arts

आ॰ क॰ ६८

विवाहेतरसंस्कारनिषेधपराद्धावचनाच्छिष्टसमाचाराच्चलौकिकेग्नौब्राह्मणद्वारानाममंत्रेणै
तादिनाहोमोभवतीतिगम्यते॥स्कांदेप्रभासखंडेशूद्रस्यनिषिद्धमुक्तं॥नदर्भानंकुरेच्छूद्रो
नपिबेत्कापिलंपयः॥मध्वपत्रेनभुंजीतब्रह्मवृक्षस्यभामिनि॥नोच्चरेद्वेदमंत्रांश्चपुरोडाशं
नभक्षयेत्॥नशिखांनोपवीतंचनोच्चरेत्संस्कृतांगिरं॥नपठेद्वेदवचनंत्रिवचनाहिंसेत्कथयेत्॥
नमस्कारेणमंत्रेणक्रियासिद्धिर्भवेद्ध्रुवं॥निषिद्धाचरणंकुर्वन्पतितैःसहमज्जतीति
॥नशिखामित्येतदसच्छूद्रविषयं॥सच्छूद्रेतु॥परिवर्याच्छूद्रस्यनियताअतिरनियताः
केशवेशादितिवसिष्ठस्मरणाद्विकल्पेनशिखाभवतीतिगम्यते॥मनुः॥शूद्राणांमासिकं
कार्यंवपनंन्यायवर्तिनां॥वैश्यवच्छौचकल्पश्चद्विजोच्छिष्टस्यभोजनं॥अर्थावैश्यस्तद्वच्छौ
चेसूतकादौकल्पःप्रकारः॥शेषंस्पष्टं॥अन्यच्च॥देवार्चापरतःकृत्वाब्राह्मणानांनपो
नम॥श्रोतव्यमेवशूद्रेणतथान्यैश्चद्विजातिभिः॥तथा॥स्त्रीभिःशूद्रैश्चश्रोतव्यंकथा

राम: ६८

ब्राह्मणमग्रतः॥पुराणंचेतिहासश्चश्रोतव्यंचदिनेदिने॥तथा॥क्षमासत्यंदमःशौचंदानमि
द्रियसंयमः॥अहिंसागुरुशुश्रूषातीर्थानुगमनंदया॥आर्जवंलोभशून्यत्वंदेवब्राह्मणपूजनं॥
अनभ्यसूयाचतथाधर्मःसामान्यउच्यतइतिविज्ञेयाःसाधारणधर्माःसर्वेषामनुष्ठेयाइत्युक्तं
चतुर्भुजंचेनेतिप्रकृतमास्थियते॥एवंकृतेवैश्वदेवोगोग्रासंदद्यात्॥तत्राहऋष्यशृंगः॥गोग्रासं
चकुर्वीतनित्यमेवसमाहितः॥गवांकंडूयनंस्पर्शंग्रासमाह्निकमेवच॥तत्रमंत्रः॥सौरभेय्यःस
र्वहिताःपवित्राःपापनाशनाः॥प्रतिगृह्णंतुमेग्रासंगावस्त्रैलोक्यमातरः॥इतिमंत्रेणसंपठ्यगो
ग्रासंदद्यात्॥ततोनन्तरंकाकबलिः॥मनुः॥श्वानांचपतितानांचश्वपचांपापरोगिणां॥वायसा
नांकृमीणांचशनकैर्निक्षिपेद्भुवि॥तन्मंत्रस्तु॥ऐंद्रवारुणवायव्यायाम्यावैनैर्ऋतास्तथा॥
वायसाःप्रतिगृह्णंतुभूमौपिंडंमयार्पितम्॥वायसेभ्योनमइतिवायसबलिः॥तथा॥द्वौश्वानौ
श्यामशबलौवैवस्वतकुलोद्भवौ॥ताभ्यांपिंडंप्रदास्यामिरक्षेतांपथिमांसदा॥इतिश्वभ्योनमः

Indira Gandhi National
Centre for the Arts

आ०कं० ६९

तिष्ववलिः॥ तथा॥ पिपीलिका कीटपतंगकाद्या बुभुक्षिताः कर्मनिबद्धबधाः॥ प्रयांतु ते तृप्तिमि
दं मयान्नं तेभ्यो निसृष्टं सुखिनो भवंतु॥ इति क्रिमिकीटपतंगेभ्यो नमः इति तद्व लिं दद्यात्॥ तत्र॥ प्रवा
सं गच्छतो यस्य गृहे कर्त्ता न विद्यते॥ पंचानां महतां मेष सपत्नैः सह गच्छती मंत्रिस्मरणात्प्रवासे येते य
थाशक्ति कर्तव्या एव॥ तत्रापि वैश्वदेवस्तु स्यो निषिद्धः॥ तुल्ली भोमोत्रा मद्यानमन जौगमनं तथा॥
असंस्थानं तु यज्ञानां तत्सर्वं निष्फलं भवेत्॥ तथा॥ नपर्षेभूवलिं वीदत्वा ग्रहवली द्विजः॥ स्वयं
नैवो हरेन्मोहाद्यदि तच्छ्रीर्विनश्यति॥ गालवः॥ वैश्वदेवं हि वानक्तं न भवेत् पृथक् पृथक् पृथक्॥ प्रा
तरेव हि एस्मात्कर्म स्मृति शासनात्॥ तथा॥ द्विवा वापि दिवा रात्रौ क्रियते वैश्वदेविकं॥ हिरहसांत
दा कुर्यादिति वेदविदो विदुः॥ एतच्च यच्छ्रवण पांसार्यमानैर्वैश्वदेवो विहितस्तद्विषयं॥ अमेषां सह
देवभवतीत्युक्तमेव॥ शौनकः॥ वैश्वदेवं तथा श्राद्धं ब्रह्मयज्ञं च सूतके॥ न कुर्यात्स्वमर्मेभेनकार
येन्नन्वसर्वथा॥ सन्तर्पसारेपि॥ कुर्यास्तं च महायज्ञान्नित्य सदा सूतकं विनेति॥ तथा॥ आमार्थे रामः ६९
पचनं यस्य स्यात्सुंर्थे यस्य मैथुनं॥ हस्तर्थे यस्य चाधीतं निष्फलं तस्य जीवितं॥ अस्नाताशी मलं भुंक्ते

लंजपी पूयशोणितं॥ अहुत्वाशी क्रिमीन् भुंक्ते अनश्वोस्तु धिरं तथेत्यादि॥ ततस्तदीयाबालस्ये
द्धांगं घासपर्यार्हमग्रभुः॥ अन्नोपितत्कालसमागताभोजनीयाः॥ भोजनकाले समागतानस सिसं
बंधिबांधवान्भोजयेदिति वसिष्ठोक्तेः॥ एवं पंच महायज्ञा अहरहः कार्याः॥ अन्नाभावे केनचिदाक्र
सद्देवेभ्यः पितृभ्यो मनुष्येभ्यश्चोदपात्रादिति कात्यायनोक्तेः॥ विनास्तु तकं पंचमहायज्ञाकरणे प्राय
श्चित्तमुक्तं स्मृतौ॥ स्वकर्महानौ पतनमवेन्नेव तत्तापदि॥ स्वकमहानौनास्तिकृत्यान्मासेन पतनं
स्मृतं॥ द्वादशाद्व्रतेनैव तत्स्यशुद्धिस्तकनान्यथा॥ तन्निरीक्ष्याकर्मोक्षेत सद्यः स्नानं सचेलकं॥
वैद्योदिनानां नित्यानां कर्मणां समतिक्रमे॥ स्नातकव्रतलोपे च प्रायश्चित्तमभोजनमित्यापस्तंबल
प्रपंचेन॥ ॥इति श्रीमदनंतभट्टविरचिते विधानपारिजाते आह्निकविधौ वैश्वदेवविधान
म॥ ॥अथ भोजनविधानं॥ तत्र याज्ञवल्क्यः॥ संभोज्यातिथिभृत्यांश्च दंपत्योः शेषभोजनमा
बालस्वसासिनीवृद्धगर्भिण्यातुरकन्यकाः॥ दंपत्योरपि मध्ये पूर्वं गृहपतिः श्रेष्ठान्नमश्रीयात्॥
ततः पत्नीति॥ भारते दानधर्मे॥ भृत्यातिथिषु यो भुंक्ते भुक्तवत्सु नरः सदा॥ अमृतं केवलं भुंक्ते

Indira Gandhi National
Centre for the Arts

इति विद्धि युधिष्ठिर ॥ अंभुक्तं वस्तुनाश्नाति ब्राह्मणो वृषयोनरः ॥ अभोजनेनान्नेनापि जितः स्वर्गो
भवत्युत ॥ देवे भष्ट्रापितृभ्य श्चर्स श्रितेभ्यस्तथैव च ॥ अवशिष्टानि यो भुंक्ते तमाहुर्विघसाशि
नमिति ॥ देवलः ॥ आहारं तु रहः कुर्यान्निर्हारं चैव सर्वदा ॥ गम्याम्यां लक्ष्म्युपेतः स्याच्छाका
श्यपेहीयते श्रिया ॥ रहः एकांते ॥ निर्हारः पुरीषाद्युत्सर्गः स्त्रीसंगश्च ॥ मैथुनं सततं गुप्तमाहारं
च सदाचरेदिति दानधर्मोक्तः ॥ व्यासश्च ॥ पंचार्द्रो भोजनं कुर्यात्प्राङ्मुखो मौनमास्थितः ॥
हस्तौ पादौ तथैवास्यमेषां पंचार्द्रता स्मृता ॥ आचारदीपे ॥ स्नास्यतो वरुणः कांतिं जुह्वतोग्निः
श्रियं हरेत् ॥ भुंजतो मृत्युरायुष्यं तस्मान्मौनं त्रिषु स्मृतं ॥ मनुः ॥ आयुष्यं प्राङ्मुखो भुंक्ते य
शस्यं दक्षिणामुखः ॥ श्रियं प्रत्यङ्मुखो भुंक्ते ऋतं भुंक्ते उदङ्मुखः ॥ एतत्काम्यं ॥ नित्यवि
धिस्तु प्राङ्मुखोन्नानि भुंजीत तथोत्तरमुखोपि वेति ॥ अनोयुग्मत्वेवं मुखस्य भोजनमा
त्र इत्यपदिशती सापस्तंबस्मरणाज्जीवन्मातृकस्य दक्षिणामुखभोजननिषेधः ॥ आ
चारदीपेपि ॥ पुत्रवान्नस्वगेहेनि संनाश्नीयादुत्तरामुखः ॥ सोमवारे तथा संतं वर्जयेत्तु स



दा बुधः ॥ भोजनकालमाह मनुः ॥ सायंप्रातर्द्विजातीनामशनं श्रुतिचोदितं ॥ नांतरा भोजनं कुर्या
दग्निहोत्रसमो विधिः ॥ भारते दानधर्मे ॥ सायंप्रातर्मनुष्याणामशनं देवनिर्मितं ॥ नांतरा भोज
नं दृष्टमुपवासविधिर्हि सः ॥ अतस्तु सायमाशं च प्रातराशं च यो नरः ॥ सदोपवासी भवति यो न भुं
क्तेंतरा नरेति ॥ अत्र प्रातःशब्दः पंचधा विभक्तदिनस्य तृतीयभागवाचकः ॥ तथा ततो भोज
नवेलायां कृत्वाचारं सदात्मवान् ॥ पोष्यवर्गसमोपेतो भोजनं कारयेद्बुधः ॥ माता पिता गुरुर्भार्या
पुत्रो दासस्तथैव च ॥ अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्गो अमी नव ॥ ब्रह्मपुराणे ॥ उपलि
प्ते समे स्थाने शुचौ शुद्धासनान्विते ॥ मंडलं गोमयेनस्याद्यवा गौरमृत्तया ॥ मंडलमाह व्यासः
॥ चतुरस्रं त्रिकोणं च वर्तुलं चार्द्धचंद्रकं ॥ कर्तव्यमानुपूर्व्येण ब्राह्मणादिषु मंडलं ॥ शंखः ॥ आ
दित्या वसवो रुद्रा ब्रह्मा विष्णुस्तथैव च ॥ मंडलं त्वपजीवंति तस्मात्कुर्वीत मंडलं ॥ यातुधानाः पि
शाचाश्च असुरा राक्षसास्तथा ॥ हरंति रसमन्नस्य मंडलेन विवर्जितं ॥ आसनमाह मनुः ॥ श्रीपर्णी
च शमी शल्ली कदंबो वारुणस्तथा ॥ पंचासनोपविष्टस्तु स्नानहोमादिकं चरेत् ॥ वर्ज्यमुक्तं

Indira Gandhi National
Centre for the Arts

प्रचेतसा॥ गोशकृन्मृन्मयं भिन्नं तथा पालाशपिप्पलं॥ लोहबद्धं सदैवार्कं वर्जयेत्सततं बुधः॥
तथा॥ मधुपर्के भोजने च संध्यादौ नित्यकर्मणि॥ आसनस्थः सदाचामेदन्यत्र कुक्कुटासनः॥ यस्क
७१ भोजनवेलायामासननिषेधः॥ पैठीनसिः॥ एक एव तु यो भुंक्ते विमले कांस्यभाजने॥ चत्वारि त
स्य वर्द्धन्ते आयुः प्रज्ञा यशो बलं॥ भिन्ने भोजननिषेधाद् भिन्नं कांस्यपात्रं॥ सौवर्णे राजते चैव पात्रे
भोजनमाचरेदिति स्मृतेः सौवर्णादिकमपि विभवे सति कार्यं॥ ताम्रपात्रे न भुंजीत भिन्नकांस्ये मला
न्विते इति ह मनूक्तेस्ताम्रपात्रनिषेधः॥ स्वीयपात्रे सर्वदा भोज्यं॥ परपात्रेषु भुंजानः प्राजापत्यं च
रेद्द्विज इति स्मृतेः॥ पात्रपरिमाणमाह योगी॥ पंचाशतः पलादूर्ध्वं महाभाजनमिष्यते॥ नातिदीर्घ
नातिह्रस्वं त्रिमात्रप्रमाणकं॥ ग्रंथांतरे तु॥ पलविंशतिमारभ्य अत ऊर्ध्वं यथेच्छया॥ इदमेव
गृहस्थानां न यतिब्रह्मचारिणामित्यल्पप्रमाणमप्युक्तं तत्समंताल्लघुपात्राणि निषेध्यानि न
तन्मध्ये॥ लघीयांस्यपि पात्राणि भस्मौस्थाप्यानि भारत॥ पयः शाकादि भुक्त्यर्थं न महाभाजनो एम०
परि॥ समे पार्श्वे च पानीयपात्रं दद्याद्विचक्षणः॥ आचारदीपे॥ दक्षिणं तु परित्यज्य वामे नीरं नि ७१

धापनात्॥ अभोज्यं तद्भवेदन्नं पानीयं सुरया समं॥ तथा॥ तांबूलाभंजनं चैव कांस्यपात्रे च
भोजनं॥ यतिश्च ब्रह्मचारी च विधवा च विवर्जयेदिति व्यासाद्युक्तेर्यत्यादेः कांस्यपात्रनि
षेधः॥ अत्र प्रसंगाद्विधवाधर्माः कथ्यंते॥ स्कांदे॥ पत्यौ मृते तु या योषिद्वैधव्यं पालये
द्यदि॥ सा पुनः प्राप्य भर्तारं स्वर्गलोकान्समश्नुते॥ एकाहारः सदा कार्यो न द्वितीयः क
दाचन॥ त्रिरात्रं पंचरात्रं वा पक्षव्रतमथापि वा॥ मासोपवासं वा कुर्याच्चांद्रायणमथापि
वा॥ यवान्नेन फलाहारैः शाकाहारैः पयोव्रतैः॥ प्राणयात्रां प्रकुर्वीत यावत्प्राणः स्वयं व्रजे
त्॥ विशेषात्कार्तिके माघे विशेषनियमं चरेत्॥ स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं मुहुः॥
नाधिरोहेदनडुहं प्राणैः कंठगतैरपि॥ कंचुकं न परीदध्याद्वासो न विकृतं वसेत्॥ विधवा कबरी
बंधो भर्तृबंधाय जायते॥ शिरसो वपनं तस्मात्कार्यं विधवया सदा॥ पर्यंकशायिनी नारी विधवा पात
येत्पतिं॥ तस्माद्भूशयनं कार्यं पतिसौख्यसमीहया॥ नैवांगोद्वर्तनं कार्यं स्त्रिया विधवया क्वचित्॥
गंधद्रव्यस्य संभोगो नैव कार्यस्तया पुनः॥ यद्यदिष्टतमं लोके यच्च पत्युः समीहितं॥ तत्तद्गुणवते

Indira Gandhi National Centre for the Arts

आ॰ कं॰ ७२ देयं प्रतिपीरणानृकाम्यया॥ नर्पर्णप्रसहं कार्यं मर्जोः कुशातिलोदके॥ तस्मिन्नसति तु श्वैवतन्मात्रा
दिम्पएव च॥ तर्पणं तु पुत्रपौत्राभावे ज्ञेयं॥ श्राद्धं च तर्पणं चैव न कुर्यात्सु त्रिरात्रिसदेति मगस्क्ते॥ वि
प्रोसक्तरजने कार्यं पंगिवुधानुच्यमथा॥ पतिमेव सदा ध्याये हिसुरूपधरं परं॥ अपुत्रानु सु
ना किं चिन्न कुर्या दर्त्त्रंतरेति॥ उत्राद्यभावे हरिं विशेष एक व्रतक स्पविशेषः॥ मन्त्रं मं पि
त्रगं वापि कृत्वा भार्ता रमात्मनः॥ तद्धयास्तान दान व्रतादी नाचरेत्सदेति॥ ॥ अथ प्रक
तमनुसिंयते॥ कांस्यपात्राभावे यमः॥ रंभा कुरज मध्याम्र जंबू पनसं चपकाः॥ पद्मोदुंबरपाला
शव्रह्मपत्रपवित्रकं॥ अत्रिः॥ न तर्कांस्यत्प्रत्रेषु कुंभीतिंदुकपत्रयोः॥ श्रीकामो नैव भुंजी
त को विदारक ह्नयोः॥ करेरव पेरके चैव शिलायां ताम्रभाजने॥ भिन्न कांस्ये च वस्त्रे च न भुंजीत
न पायसे॥ आसने पादमारोप्य यो भुंक्ते ब्राह्मणः क्वचित्॥ मुखेन धमितं चान्नं तुल्यं गोमांसभ रामः
क्षणैः॥ दक्षः॥ भोजनं हवनं दानमुपहारः प्रतिग्रहः॥ बहिर्जानु न कार्याणि तद्वच्च मनं जप
पं॥ नाश्रीयाद्भार्यया सार्द्धं नाकाशे न न तपोत्थितः॥ शयानः प्रौढपादश्च कृत्वा चैवावसक्थि ७२

कं॥ आकाशे मंत्रादौ॥ पादारोपितपितपादः पौढपादः॥ संग्रहे त्र विशेषः॥ मात्रा सहोपनीते
स्याद्विवाहे भार्यया सह॥ अन्यत्र सह भुंजानः समः स्यात्पशुभिः सह॥ प्रयोगपारिजाते गर्गः॥
रंभापत्रपलाशेषु यः कुर्यात्पारणं क्वचित्॥ सप्तजन्मकृतं पुण्यं तत्क्षणादेव नश्यति॥ मनुस्मृ
ताक्षरायां॥ पलाशपत्रभोक्ती च अह्नो एत्रेण शुध्यतीति योनि सनिषेध उक्तः सवल्ली पलाश
विषयः॥ इति मदनपारिजाते व्याख्यातं॥ पलाशपत्रभोजी यः सोनंतफलमश्नुत इति विशेषोक्तेः
॥ यमः॥ शाकादिपुरतः स्थाप्यं भक्ष्यं भोज्यं च वामतः॥ अन्नं मध्ये प्रतिष्ठाप्य दक्षिणे घृतपाय
से॥ पात्रं धृत्वा तु वामेन यावद्भवति भोजनं॥ पाणिना दक्षिणेनेव पर्युक्ष्य परिषेचयेत्॥ अंगुष्ठ
स्तर्जनी चैव मध्यमा चैव सर्वदा॥ तिस्रो द्वे कं गुली चैव प्रशस्ता पात्रधारणे॥ भारते॥ आत्मा
ति विना चैव पल्किं समीरिप्यते॥ दुराचारैश्च यन्भुक्तं तं भागं रक्षसां विदुः॥ मार्कंडेपोत्र विशेषमा
ह॥ न्यस्तपात्रस्तु भुंजीत पंच ग्रासान्महामुने॥ शेषमुद्धृत्य भोक्तव्यं श्रूयतामत्र कारणमिति॥
उद्धृत्य यंत्रादौ पात्रं स्थाप्य पित्वे सर्वैः॥ यंत्र मुक्तं संग्रहे॥ कांस्य काष्ठ कस्यापि वंशस्यापि न

Indira Gandhi National
Centre for the Arts

थैव च॥ यंत्रिकाजु त्रिकोणावै कर्तव्या पात्रधारणे॥ षट्त्रिंशन्मते॥ उदनेपस्मान्नेव च धृतपात्रे स्थितं
आ॰क॰ यदि॥ एतदाज्यं भवेद्भुक्तं तदन्नं मांसमुच्यते॥ ब्राह्मे॥ सैंधवं लवणं चैव तथा मानससंभवं॥ पवित्रे
७३ परमे ह्येते प्रत्यक्षे च न दुष्यतः॥ सामुद्रं भूमिजं चैव प्रत्यक्षे चैव दुष्यतः॥ तस्मादिदं दद्यात्र खुतं पारि
वेष्यं॥ श्राद्धादि भोजने यंत्रा भावउक्तो ब्राह्मे॥ पंचग्रासांस्तु भुंजीत यश्च विहुश्मनिसंकटे॥ पात्रमु
दुस्सशेषं तु भक्षयेन्मेरुकाहते॥ गर्गः॥ ससंत्तर्जनिवैमानवीरेणापरिवेचयेत्॥ सायंकाले तु पै
वस्ताहतं त्वंसाक्षितः क्रमात्॥ आपस्तंबः॥ कौशं तु बिभृयान्नित्यं पवित्रं दक्षिणे करे॥ भुंजानस्तु
विशेषेण गृहितान्न विशुद्धये॥ भोजने वर्तुलं मोक्तं पवित्रं यं विवर्जितमिति॥ तथा॥ उद्धृत्य
किंचिदन्नाग्रं धर्मराजाय चैव बलिं॥ दत्वाथ चित्रगुप्ताय भूतेभ्यश्च तथैव च॥ अन्नेनैव शता
कैन नमस्कारेणैव भुवि॥ तिस्र एवाहुतीर्दद्याद्भोजनादौ तु दक्षिणे इति भविष्यपुराणे॥ भोज राम: 
नात्प्राग्वन्नेनेस्तुक्ते भोजनादन्मत्रफलाहारादौ न चित्राहुतिरिति गम्यते॥ केचित्तु॥ भूपतये भु ७३
वनपतये भूतानां पतये नमः॥ एवं बलित्रयं दद्याद्भोजनादौ विशेषतः स्माहुः॥ अत्राचार

तो व्यवस्थं॥ पितृकार्ये तु॥ पितृणामन्नउत्सृष्टे बलिं कुर्वंति ये द्विजाः॥ आसुरं तत्भवेच्छ्राद्धं पितृणां
नोपतिष्ठति॥ यत्तु॥ स्पर्शनांते स्पृशेदन्नं संकल्पांते बलिं हरेत्॥ होमस्य मध्ये नांते होमांते चोदकं
पिबेदिति॥ तत्तु वैश्वदेविकद्विजविषयं॥ पित्र्यद्विजस्य बलिदाननिषेधात् इति श्राद्धकल्पे॥ सूत
केपि बलिदानापोनप्राणाहुतिपात्रधारणादयो भुक्तिनियमा भवंतीति स्मृत्यर्थसारे स्पष्टमुक्तं॥
अन्यत्रापि॥ नित्यस्नानं च शौचं च भोजने नियमान्वितं॥ अस्पृश्यस्पर्शने स्नानं कुर्याद्देवं च सूत
की अन्यप्रशनषिकारान्तर्पणदेवार्चादयो न भवंति॥ मनुः॥ दत्वा तु चित्रगुप्ताय हस्तं प्रक्षालयेद्द्वि
जः॥ अक्षालितकरो भुंक्ते रौरवं नरकं व्रजेत्॥ चंद्रिकायां दक्षः॥ भोजनादौ बलिं मुक्तं समुद्र
स्य च भोजनं॥ अतहस्ये यो भुंक्ते प्राणायामा पंचकं चरेत्॥ उत्कायतोपस्तरणमश्रित्वाहांतमेव च
॥ अपोशानं तदिन्माद भोजनादौ पिवेज्जलं॥ अपोशानमकृत्वा तु यो भुंक्ते द्विजसत्तमः॥ अभोज्यं
तद्भवेदन्नं भुक्त्वा दोषमवाप्नुयात्॥ तद्दोषपरिहारार्थं प्राणायामान्समाचरेत्॥ अपोशनार्थं य
त्तोयं धृतं चेन्निःसृतं भवेत्॥ हस्तप्रक्षाल्य तोयेन पुनर्वै धारयेज्जलं॥ अपोशानं करे कृत्वा यद्य

Indira Gandhi National Centre for the Arts

श्रीर्विचनं पठेत्॥ अभोजनं तद्वेदन्नं दाता भोक्ता च विलिप्यते॥ यो यस्यान्नं समश्नाति स तस्याश्नाति
किल्बिषं॥ तद्दोषपरिहारार्थं मंत्रमेतमुदीरयेत्॥ अन्नं ब्रह्मा रसो विष्णुर्भोक्ता देवो महेश्वरः॥ एवं
आ॰ कं॰ ध्यात्वा द्विजो भुंक्ते ह्यन्नदोषैर्न लिप्यते॥ प्राणाहुतीर्हुत्वा तु यश्चान्नं परिमर्दयेत्॥ मर्दितं भोज
७४ ये ग्रस्तः प्राज्ञो पर्यनत [redacted] ष्टेरेण विना हुतिदानानंतरं हस्तप्रक्षालनपर्युक्षणदोषसंभावना
र्था जलधारादिना पर्युक्षणं भिंद्यादित्युक्तं॥ पारिजाते बहूमनुना॥ एकपंक्त्युपविष्टानां दुष्कृतं यद्दुरा
त्मनां॥ सर्वेषां तत्समं तावद्यावत्पंक्तिर्न भिद्यते॥ अग्निना भस्मना चैव स्तंभेन सलिलेन वा॥ द्वा
रेणैव च मार्गेण पंक्तिभेदो बुधैः स्मृतः॥ स्तंभेन निष्कवि मार्ग॥ ऋग्वेदकल्पः॥ अपोशाने नो
परिष्टाद्धस्तादशनं तथा॥ अनग्नममृतं चैव कार्यमन्नं द्विजन्मना॥ दक्षः॥ शब्देनापोश
नं पीत्वा शब्देन घृतपायसं॥ शब्देनापः पयः पीत्वा सुरापानसमं भवेत्॥ आर्द्रामलकमानं
तु प्रह्वा बदरमात्रकं॥ प्राणाहुतिप्रमाणं च सघृतान्नं समश्नुवेत्॥ घृतहीनं तु यो भुंक्ते नरस्त्वा राम: ७४
हुतिपंचकं॥ पश्चात्तेन नरो भुंक्ते द्विजश्चांद्रायणं चरेत्॥ घृताभावे तु गव्येन संकुर्वीत जलेन

वा॥ गव्येन दुग्धादिना त्वर्थः॥ पराशरः॥ मुखे चान्नस्य निक्षेपो मंत्रैः प्राणादिपंचभिः॥ भो
जनं तद्विजानीयं तन्नैव नियमाः स्मृताः॥ पात्रालंभस्तथा मौनं तदूर्ध्वमपि चेच्छया॥ शौनकः
॥ स्वाहांताः प्रणवाद्याश्च नाम्ना मंत्राः स्मृता बुधैः॥ जिह्वया च ग्रसेदन्नं दशनैर्न संस्पृशेत्॥
तथैव षडपि यजुषा चैतन्मे सुखात्मनि॥ तर्जनीमध्यमांगुष्ठलग्ना प्राणाहुतिर्भवेत्॥ मध्य
मानामिकांगुष्ठैरपाने जुहुयाद्बुधः॥ कनिष्ठानामिकांगुष्ठैर्व्याने तु जुहुयाद्बुधः॥ कनिष्ठा तर्ज
न्यंगुष्ठैरुदाने जुहुयाद्बुधः॥ सर्वांगुलिभिरादाय समाने स्याहुतिर्भवेत्॥ तथैव षष्ठीं जुहुयात्सर्वे
न मे सुखात्मनीति॥ केचिद्दशानेनाहेति सदामी माहुः॥ श्रद्धायां प्राणे निविष्टोऽमृतं जुहोमीत्या
दिनैतत्रिभीमारणापके न योक्तव्या इति॥ इदं च प्राणाग्निहोत्रमिति ज्ञेयं॥ तदुक्तं शतपथब्राह्म
णे॥ तेपुरुषमाविशत स्तस्य मुखमेवाहवनीयं कुर्वंति जिह्वां समिधमन्नमेव शुक्रमाहु
तिं तेपुरुषं तर्पयतः स य एवं विद्वानश्नात्यग्निहोत्रमेवास्य हुतं भवतीति॥ श्रुसंतरेपि॥ यथे
दमविद्वानग्निहोत्रं जुहोति यथांगारानपोह्य भस्मनि जुहुयात्तादृक् तत्स्यादथ य एतदेवं विद्वा

Indira Gandhi National
Centre for the Arts

आ॰का॰
७५

नग्निहोत्रं जुहोति तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवतीति॥ गोभिलसूत्रे
पंचग्रासानगृह्णीयात्प्राणाय स्वाहेति गार्हपत्यमेव तेन जुहोत्यपानाय स्वाहेत्यन्वाहार्यप
चनमेव तेन जुहोति व्यानाय स्वाहेत्याहवनीयमेव तेन जुहोत्युदानाय स्वाहेति सभ्यमेव तेन जु
होति समानाय स्वाहेत्यावसथ्यमेव तेन जुहोतीति॥ सामोपनिषद्युपितद्भर्क्षं प्रथममाग
च्छेद्दिस्वाहा॥ मन्त्रोच्छिष्टीवः प्रत्याहुति॥ तदाह मनुः॥ मधुपर्के च सोमे च अप्सु प्राणाहुती
षु च॥ आसहोमेषु सर्वेषु नोच्छिष्टं मनुरब्रवीत्॥ तथा॥ स्मृतिसंग्रहे॥ एवं पंचाहुतीर्हुत्वा
ब्रह्मग्रंथिं विसर्जयेत्॥ प्रक्षाल्य वामहस्तं तु पश्चाद्भोजनमाचरेत्॥ तर्जन्यंगुष्ठच्छिन्तेरोप
ब्रह्मग्रंथीं च सर्जयेत्॥ कनिष्ठिकांगुष्ठिनेस्वरुद्रे नैव भोजनमाचरेत्॥ प्राणाग्निभोजनं कु
र्वन्प्राणायामशतं चरेत्॥ यद्भुक्ते तदन्नं तु किंचिद्दुक्तापयेत्पृथक्॥ यद्यपपेक्षितं चा
न्नं गृहीत्वा भोजनं चरेत्॥ अनिधाय पृथक्कोन्नं गायत्र्यात्वभिमंत्रितं॥ पुनरन्नं नगृह्णी
याद्यदि भुंजीत दोषभाक्॥ पङ्क्तिभेदेन यो भुंक्ते परकीये स्वके पि वा॥ तदन्नं मांसमित्याहुः

राम:
७५

क्षयरोगी च जायते॥ सर्वाभिरंगुलीभिः सममश्नीयाद्विशिष्टोक्तेः समुच्छिन्नांगुलिभिर्भुंजीत॥
तथा॥ जलपात्रं तु निक्षिप्य मणिबंधे च दक्षिणे॥ विप्रो भोजनकाले तु पिबेद्वामेन पाणिना॥
अन्यत्र तु॥ धारया नोदकं पेयं पीत्वा दोषमवाप्नुयात्॥ जलपात्रेण तत्पेयमिति शातातपोब्रवी
त्॥ एकपङ्क्त्युपविष्टानां विप्राणां सहभोजने॥ यद्येकोपि त्यजेत्पात्रं नाश्नीयुरितरे पुनः॥ भुंजा
नेषु तु विप्रेषु योग्रे पात्रं विमुंचति॥ स मूढो नरकं याति ब्रह्महा स निगद्यते॥ मर्यादाकरणे दोषो
नैमित्तमेव प्राक्॥ एकपङ्क्त्युपविष्टानामन्योन्यं संस्पर्शने यदि॥ तदन्नमत्यजन्भुक्त्वा गायत्र्यष्ट
शतं जपेत्॥ भवेदुच्छिष्टसंस्पर्शो भोक्तुर्वा भाजनस्य वा॥ अन्नं तदेव भोक्तव्यं न त्याज्यं भाजने
स्थितं॥ अमदन्नं न भोक्तव्यं यदि भुंजीत किल्बिषी॥ स्नात्वा नक्तो जपेद्देवीं शतमष्टोत्तरं द्विजः॥
अष्टशतात्परं॥ यदा भोक्तव्ययदि तुंजीनाखिः जनकाले तु अशुचिर्भवति द्विजः॥ भूमौ नि
क्षिप्य तं ग्रासं स्नात्वा शुद्धिमवाप्नुयात्॥ अश्नित्वा सर्वमेवापि त्रिरात्रेण विशुध्यति॥ अज्ञानाद्भो
जनं कुर्वन्गायत्र्यष्टशतं जपेदित्याह॥ मत्वा परिज्ञाने सर्वमेवापि त्रिरात्रेण विशुध्यति॥ अज्ञा

Indira Gandhi National Centre for the Arts

आ॰का॰
७६

नान्भोजनं कुर्वन्न गायन्न चहसन्नं जपेद्धि साह्या ॥ मदनपारिजाते मार्कंडेयः ॥ यस्तु पाणितले भुंक्ते यः सशब्दं समश्नुते ॥ अंगुलिभिश्च यो भुंक्ते गोमांसाशनवत्स्मृतं ॥ विष्णुपुराणे ॥ अश्नीयात्तन्मनाभूत्वा पूर्वं तु मधुरं रसं ॥ लवणाम्लौ तथा मध्ये कटुतिक्तादिकांस्ततः ॥ प्राक् द्रवं पुरुषोऽश्नीयान्मध्ये तु कठिनाशनः ॥ अंते पुनर्द्रवाशी च बलारोग्ये न मुंचति ॥ नोच्छिष्टं घृतमादद्यान्न पाणौ विशेषतः ॥ जठरं पूरयेदर्धमन्नैर्भागं जलस्य च ॥ वायोः संचारणार्थाय चतुर्थमवशेषयेत् ॥ आपस्तंबः ॥ अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः ॥ द्वात्रिंशत्तु गृहस्थस्य अमितं ब्रह्मचारिणः ॥ पुलस्त्यः ॥ भोजनं तु न निःशेषं कुर्यात्प्राज्ञः कथंचन ॥ अन्यत्र दधिसक्त्वाज्यपललक्षीरमध्वपः ॥ पललं मांसं ॥ अनिंद्यं भक्षयेन्नित्यं संवागपनोऽन्नमकुत्सयन्निंद्यात् स्मृते रनिंद्यान्नं भोक्तव्यं ॥ तच्च न निंद्यात् ॥ अन्नेन निंद्यान्न तद्धृतमिति निंदेति रीयश्रुतेः ॥ अत्रवर्ज्यमाह यमात्तु वल्काः ॥ अनर्चितं वृथामांसं केशकीटसमन्वितं ॥ शुक्तं पर्युषितोच्छिष्टं स्पृष्टं श्वचक्रामतः ॥ अनर्चितं उनमायावमाद्दतं यदन्नं न तन्न वृथामांसं ॥ प्राणात्ययेन या श्राद्धे प्रोक्षितं द्विजकाम्यया ॥

देवान्पितॄन्समभ्यर्च्य खादन्मांसं न दोषभाग्भवेदुक्तप्रकारेण संपादितं मांसं तद्वृथा मांसं ॥ केशकीटसमन्वितमन्नं शुक्तं ॥ पत्स्वयमनम्लं सत्कालपरिवासादिना अम्लीभवति तदित्यर्थः ॥ पर्युषितं रात्र्यंतरितं ॥ उच्छिष्टं भुक्तोच्छिष्टं ॥ उदक्यारजस्वलात यास्पृष्टं ॥ संघुष्टं को भुंक्त इत्यादिघोषपूर्वं दीयते ॥ पर्यायान्नं अन्यसंबंधमन्यापदेशेन यद्दीयते ॥ अन्यस्यशेषं ॥ पर्युषितेऽप्यतिप्रसंगमाह स एव ॥ अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितं ॥ अस्नेहा अपि गोधूमयवगोरसविक्रियाः ॥ गोधूमविकारो मंडकः ॥ यवविकारः सक्तुः ॥ शंखः ॥ अपरान्हेः सक्तवो धानास्तं कं दधिवर्जं मधु ॥ एतत्तु एव भक्षयं भांडलेपो न चेद्भवेत् ॥ तथा ॥ आसुरिभांडसंस्थानि यदीहविषतानि च ॥ नावस्पृजे द्विजश्चांडपावकजत्रति एति ॥ फलिंगं चपठोलं वृंताकं संविनालिकं ॥ उपोदकी रक्तशाकमेतान्येव वर्जये द्विजः ॥ नारदीयेपिहं तार्कं च गलिंगं च दग्धमन्नं मसूरिका ॥ उदरे यस्य तिष्ठंति तस्य दूरतरो हरिः ॥ शाकमूलक

आ·क· ७७

लेक्षर णिर्दतद्वेद्देनभक्षयेत॥ लवलेर्गजनंचैव घृतैतेलंतथैव च॥ लेह्यंपेयंचविविधंहस्तद
त्तंनभक्षयेत॥ अतोलवणादिदर्व्यादेयं॥ अपक्वंस्नेहपक्वंचनतुदर्व्याकदाचन॥ भुक्तेएपक्वस्ने
हपक्वेहस्तेनैवदेयं॥ केचित्तुहंतकनिषेधःश्रेनपरस्मात्तुः॥ कुर्यात्वेच्छेनहंतकमलावुंसु
लंतथा॥ वृत्राकंलशुनंचैवभुक्त्वाचांद्रायणंचरेदिति विशेषोक्तेरिति॥ ननुनिबंधेपल
पलेभादुयेक्षां॥ ए गमूलत्वात॥ उपलंभेवाश्रेनत्वविशेषणंदोषाधिक्यायनत्विनरप्रतिप्र
सवाय॥ प्रायश्चित्ताधिक्यकथनादितिज्ञेयं॥ तथा॥ रात्रौदधिनभोक्तव्यंदिवाचनवनीतकं॥ प
यएकशफंहेयंतथाक्षामेलकाविकमितिस्कांदे॥ तथातिथिविशेषवर्ज्यमाहबृहस्पतिः॥
कूष्मांडंतरुणीचैवमूलकंहतीतथा॥ श्रीफलंचकलिंगंचधात्रीमतिपदादिषु॥ वर्जयेत्सप्तमी
यावदमथालवृष्माचरेत॥ सप्तम्यांरविवारेवादिवारात्रौतथैवच॥ धात्रीफलंतरोश्रीयाद
लक्ष्मीकोभवेन्नरः॥ विप्राणांभोजनेकालेयद्दीपोविनश्यति॥ पाणिभ्यांपात्रलभ्याय राम: ७७

त्रीमनसास्मरेत॥ प्रश्नाप्यदीपकंहष्टानच्छेषंभुंजतेद्विजाः॥ अमदन्नंतभोक्तव्यंभुक्त्वाकृच्छ्रमाचरेत॥
मक्षिकासंततोधारावेदसंबंधिविरक्तः॥ मुरनेह्रीमुरवंचैवपवित्रमनुरब्रवीत॥ अन्यत्र॥ प्राणात्ययेतथाश्रा
द्धेप्रोक्षितंद्विजकाम्यया॥ देवान्पितॄन्समभ्यर्च्यखादन्मांसंनदोषभागिति यदुक्तं॥ तत्रायमर्थः॥ अ
न्नाभावेनयदिप्राणनाशस्तदामांसभक्षणेनदोषः॥ सर्वतःआत्मानंगोपायेतिश्रुतेः॥ तथाश्राद्धेनि
मंत्रितोमांसमश्नीयात॥ यथाविधिनियुक्तस्तुयोमांसंनातिमानवः॥ सप्रेत्यपशुतांयातिसंभवानेक
विंशतिमितिमनूक्तेः॥ तथाप्रोक्षणाख्यश्रौतसंस्कारसंस्कृतमांसभक्षणेनदोषः॥ विहितत्वात॥ अ
भक्षणेयागासिद्धेश्च॥ तथाऽतिथ्यर्थेनार्थसंपादितंयन्मांसंद्विजप्रार्थनयातद्भक्षणेनदोषइति॥ अ
त्रयद्यपिदोषाभावउक्तस्तथापियागादन्यत्रकलौमांसंवर्ज्यं॥ तथाहि॥ अक्षतागोपशुश्चैवश्रा
द्धेमांसंतथामधु॥ देवराच्चसुतोत्पत्तिःकलौपंचविवर्जयेदितिबृहन्नारदीयोक्तेः॥ अक्षताहतविवाहा
नुपभुक्ताद्युगांतरवन्नविवाहेत्यर्थः॥ शौचंचपात्रशुद्धिश्चश्राद्धंचपरमायशि॥ अंतेनतरामिक्षुछ
द्रोएतत्तवलुनिर्णयमिषमितिबृहस्पतिरोक्तेश्च॥ क्षिप्त्वाकूपेयथाकिंचिद्धालग्रासंमृदिछन्ति॥ पत

Indira Gandhi National
Centre for the Arts

आ॰ क॰ ७८

स्नानतः सोऽपि मांसेन श्राद्धकृज्जायेतेति निगमोक्तेः॥ तद्ग्राह्यामिषं श्राद्धेन चाग्राह्यमेतत्त्वविलं। मुस
न्नेः स्यात्सदा प्रीतिर्यथान पशुहिंसयेति भागवतोक्तेः॥ सर्वान्कामानवाप्नोति हयमेध फलं तथा। ग
हेऽपि निवसन्विप्रो मुनिर्मांसविवर्जनादिति याज्ञवल्क्योक्तेश्च॥ प्रोक्षितमभ्युक्षितं मांसं तथा ब्राह्मणका
म्यया॥ अल्पदोषमिदं ज्ञेयं विपरीतेन तु लिप्यत इति च न धर्मः स्याद्दोषश्च न तेश्च॥ ननु पितॄणां मासिकं
श्राद्धमन्वाहार्यं विदुर्बुधाः॥ तदामिषेण कर्त्तव्यं प्रशस्तेन प्रयत्नतः॥ तथा॥ कालशाकं महा
शल्काः॥ खड्गलोहामिषं मधु॥ आनंत्यायैव कल्पंते मुन्यन्नानि च सर्वश इति मनुयाज्ञवल्क्या
दिस्मृतौ श्राद्धे मांसविधानाद्विधिनिषेधानां देशभेदेन व्यवस्थाकुतो नांगीक्रियत इति चेन्न॥
मांसनिषेधकवाक्येषु वलावलवित्तिवद्देशभेदग्रहणाभावात्॥ तत्कल्पनायां तु यावति देशे मांसवर्जनं
दृश्यते तत्तद्देशवाचकपदाभावादनेकपदकल्पनेनैकवाक्यभेदापत्तिः प्रसज्येत॥ देशाचारः परिग्रा
ह्यस्तत्तद्देशीयजैर्नरैः॥ अन्यथा पतितो ज्ञेयः सर्वधर्मबहिष्कृत इति हेमाद्रीयवचनबला
न्नापि देशाचारतो व्यवस्था॥ इदं वचनं तत्र देशसदाचाराणामेव व्यवस्थापकं न दुराचारस्य। य

राम: ७८

स्मिन्देशे य आचारः पारंपर्यक्रमागतः॥ श्रुतिस्मृत्यविरुद्धश्चात मनुष्ठानमहीनीति देवलोक्तेः॥ क
लौ पंचविवर्ज्येति निरवकाशप्रमाणविरोधाच्चेयलं प्रसक्तानुप्रसक्तेन॥ प्रकृतमुच्यते॥ याज्ञव
ल्क्यः॥ परपाकरुचिर्न स्यादनिंद्यामंत्रणादृते॥ षट्त्रिंशन्मतेपि॥ दुराचारस्य विप्रस्य निषिद्धाचरण
स्य च॥ अन्नं भुक्त्वा द्विजः कुर्यादिनमेकमभोजनं॥ लिखितः॥ परपाकनिवृत्तस्य परपाकरतस्य च॥ अपच
स्य च भुक्त्वान्नं द्विजश्चांद्रायणं चरेत्॥ चांद्रायणमभ्यासविषयं॥ अनभ्यासे तु त्रिरात्रमभोजनमेव॥ जल्लक्ष
णमपि स एवाह॥ गृहीत्वाग्निं समारोप्य पंचयज्ञान्न निर्वपेत्॥ परपाकनिवृत्तोसौ मुनिभिः परिकीर्ति
तः॥ पंचयज्ञान्स्वयं कृत्वा परान्नमुपजीवति॥ सततं प्रातरुत्थाय परपाकरतस्तु सः॥ गृहस्थधर्म
हत्तो यो ददाति परिवर्जितः॥ ऋषिभिर्धर्मतत्त्वज्ञैरपचः परिकीर्तितः॥ आदित्यपुराणे एकादशा
ध्याये॥ तस्मादहरहर्देयमन्नमेव विचक्षणैः॥ अपरीक्ष्यैव सर्वेभ्य इति सार्वयुगशासनात्॥ आम
मन्नं गृहस्थाय पक्वं नैव कदाचन॥ दातव्यं हि निषिद्धं तद्दत्ते श्राद्धादिवो ब्रवीदिति॥ शातातपः॥ वन
स्पतिगते सोमे परान्नं ये तु भुंजते॥ तेषां मासकृतं पुण्यं दातारमधिगच्छतीति॥ उपासते ये गृहस्थाः

Indira Gandhi National Centre for the Arts

परपाकमबुद्धयः॥ तेषामेषामपक्वान्नं ब्रजं मन्त्रा घृता विनामिति मनुवचनं लोभेन ग्रामान्तरामंतरंग
आ॰ क॰ त्वा परान्नं भुंजतो दोषविशेषावेदकमिमाकलनीयं॥ अभोज्यान्नानाह याज्ञवल्क्यः॥ कदर्य
७९ बद्धचौराणां क्लीबरंगावतारिणां॥ वेणाभिशस्तवार्द्धुष्यगणिकागणदीक्षिणां॥ चिकित्सकातु
रक्रुद्धपुंश्चलीमत्तविद्विषां॥ क्रूरोग्रपतितव्रात्यदांभिकोच्छिष्टभोजिनां॥ अवीरास्त्रीस्वर्णकार
स्त्रीजितग्रामयाजिनां॥ शस्त्रविक्रयकर्मारतन्तुवायश्ववृत्तिनां॥ नृशंसराजरजककृतघ्नवधजी
विनां॥ चैलधावसुराजीवसहोपपतिवेश्मनां॥ पिशुनानृतिनोश्चैव तथा चाक्रिकबंदिनां॥ एषाम
न्नं न भोक्तव्यं सोमविक्रयिणस्तथेति॥ अस्यार्थः॥ कदर्यो ऽतिलुब्धः॥ बद्धो निगडादिना॥ चौरो ब्रा
ह्मणहेमव्यतिरिक्तपरद्रव्यापहारी॥ क्लीबो नपुंसकः॥ रंगावतारी नटादिः॥ वेणो वेणुच्छेद
जीवी॥ अभिशस्तः पतनीयेन कर्मणाऽभियुक्तः॥ वार्द्धुष्यो निषिद्धवृद्ध्युपजीवी॥ गणिका पण्य रामः
स्त्री॥ गणदीक्षी बहुयाजकः॥ चिकित्सको भिषग्वृत्त्युपजीवी॥ आतुरो महारोगाभिभूतः॥ पुं ७९
श्चली व्यभिचारिणी॥ मत्तो विद्यादिना गर्वितः॥ विद्विट् शत्रुः॥ क्रूरोऽन्तरधिककोपः॥ उग्रो

वाग्यादिनोद्वेजकः॥ पतितो ब्रह्महादिः॥ व्रात्यः पतितसावित्रीकः॥ दांभिको वंचकः॥ अवीरा
स्त्री पतिपुत्ररहिता॥ स्वर्णं तत्रे मम्ये॥ ग्रामयाजी ग्रामशांत्यादिकर्त्ता॥ कर्मारो लोहकारः॥ तंतुवा
यः॥ सूची शिल्पोपजीवी श्ववृत्ती॥ श्वभिर्हत्वजीवनमस्यास्तीति॥ नीचसेवको वा॥ नृशंसो निर्द
यः॥ रजको वस्त्ररंगकृत्॥ चैलधावः वस्त्रनिर्णेजकः॥ सहोपपतिवेश्मा॥ सह सहितं उपपतिना
जारेण वेश्म यस्याः सो सतथा॥ पिशुनः परदोषदुष्टनामेषां द्विजाद्यावक्ता॥ चाक्रिकस्तैलिकः
॥ बंदीजनस्तावकः सोमविक्रयी॥ यज्ञे सोमलताविक्रेता॥ कदर्यत्वादिदोषदुष्टानामेषां द्वि
जानामन्नं न भोक्तव्यमिति समुदायार्थः॥ तथा॥ अग्निहीनद्विजातेश्च नान्नमद्यादनापदी
ति॥ अग्निहीनः समस्याधिकारेऽपि श्रौतस्मार्त्ताग्निरहितः॥ शूद्रस्यान्नं न भोक्तव्यमिति शूद्र
स्याभोज्यान्नत्वे प्राप्ते प्रतिप्रसवमाह॥ शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणः॥ भोज्यान्ना
नापितश्चैव यश्चात्मानं निवेदयेत्॥ दासो गर्भदासादयः॥ अर्द्धसीरी सीरोपलक्षितकृषि
फलार्द्धग्राही॥ शेषं प्रसिद्धं॥ संग्रहे॥ गंजनं चारनालं च कोद्रवान्नं मसूरिका॥ कांस्यपात्रं

Indira Gandhi National
Centre for the Arts

आ॰क॰
८०

चतैलंच मंत्रवीर्यहराणिषट्॥ गणान्नंगणिकान्नंच तथान्नंग्रामयाजकात्॥ सूतकान्नंतथा
भुक्त्वा द्विजश्चांद्रायणंचरेत्॥ शूद्रंस्पृष्ट्वा च दृष्ट्वा च तदन्नेन त्रिमंत्रणं॥ प्रोषितान्नंच पक्वान्नं
शूद्रान्नंचद्विर्धमस्मतं॥ भुक्त्वा नेच्छन्तुविप्रेषु प्रमादात्सवनेषु दं॥ उच्छिष्टमशुचित्वंच तस्य शेषं च क
र्थ्यं भवेत्॥ पूर्वंकृत्वा तत्रच्छौचं पश्चात्स्नानं समाचरेत्॥ अहोरात्रोषितः स्नात्वा पंचगव्येनशुद्ध्यति॥
हस्तमराशरे॥ ब्राह्मणान्नंददच्छूद्रः शूद्रान्नं ब्राह्मणोददत्॥ द्वावप्येतावभोज्यान्नौ चरेच्चांद्रायणंश्रि
व्रतं॥ विप्रेणमंत्रितो विप्रः शूद्रान्नस्यकथं भुंजे॥ श्राद्धमन्नपितृभोक्तारो मुखेनामेध्यं वेन तु॥ वा
ताकंगंजनंच भुक्त्वा ह्यहोरात्रोपवासाच्छुचिः॥ गाणिकागणयोरन्नं यदन्नं वहुयाजके॥ सीमं
तोन्नयने भुक्त्वा द्विजश्चांद्रायणंचरेत्॥ भुंक्ते शय्यासनस्थोपः पिवेद्वा पिद्विजोत्तमः॥ अक्षक्षप
णाहित तुल्यं चरेच्चांद्रायणव्रतं॥ आसनारूढपादःसन्नस्पृष्ट्वा पदेहतं॥ मुखेनधमितंभुक्त्वा द्वि
जश्चांद्रायणंचरेत्॥ उद्धृत्य वामहस्तेन यत्किंचित्पिवते नरः॥ सुरापानेन तत्तुल्यं पीत्वा चांद्रायणं
चरेत्॥ चांद्रायणं नवश्राद्धे पाराको मासिके तथा॥ आद्दिके पादकृच्छ्रः स्यादेकाहमपराह्णिके॥

राम:
८०

स्नानमन्येषुकुर्वीत प्राणायामंजपंतथा॥ उच्छिष्टोच्छिष्टसंस्पृष्टो ब्राह्मणस्तु कदाचन॥ कुर्वी
तत्क्षणे स्नानमाचामेन विशुद्ध्यति॥ इदंतु क्षत्रियादिस्पृष्टब्राह्मणविषयं॥ ब्राह्मणस्पर्शेतु॥ उच्छि
ष्टो ब्राह्मणः स्पृष्टउच्छिष्टेनाग्रजन्मना॥ आचमेद्वत्त्रशुद्धः स्यादित्यनामानुकीर्तनात्॥ भुक्त्वा नाचम्य
कुर्याद्वा विण्मूत्रे केह निष्कृतिः॥ नाक्तोपवासी ह्येतु द्वितीये द्विगुणंचरेत्॥ आद्यमन्ने नत्रैव। यज्ञोप
वीतेन विना भोजनंकुरुते द्विजः॥ अथमत्रपुरीषे वा रेतःसेचनमेव वा॥ त्रिरात्रोपोषितो विप्रः पादकृच्छ्रेण
मामिषः॥ अहोरात्रोषितो वैश्यः शूद्रो पापक्रीतिनः॥ विप्रः क्षुत्स्तमन्निष्ठीवनकृत्वा वाऽन्नतमावरां
॥ वचनं पतितैः कृत्वा दक्षिणं श्रवणं स्पृशेदिति॥ पुराणसमुच्चये॥ आज्यपात्रे स्थितं तक्रं मधु मिश्रं
तु यत्कृतं॥ ताम्रपात्रे स्थितं गव्यं त्रिषु सर्पिः सुरासमं॥ पारिजाते मनुः॥ गव्यं ताम्रोणसंयुक्तं कांस्ये
चैवेक्षुगोरसः॥ सक्रांस्ये नारिकेलांवुमघतुल्यं घृतं विना॥ आर्द्रकं सगुडं मर्घं दधिसंमिश्रितं गु
डः॥ नारिकेलांवुसंमिश्रमैक्षवं वदरं तथा॥ मनुः॥ ताम्रेगव्यं भुंजेमेधं समंच परिवेषणे॥ दोहेपा
त्रेन पात्रेतामेन ताम्रे गव्यं न दुष्यति॥ गर्गः॥ मूलाद्यपफलेक्ष्वादि दंतच्छेदं न भक्षयेत्॥ ग्रासशेषं न चा

Indira Gandhi National
Centre for the Arts

आ·क्व·
८१

श्नपान्सीत शेषं पिबेन्न च ॥ अन्यथाकुरुते यस्तु जपेद्देवीशतं ततः ॥ यस्त्वन्नं यतिपात्रस्थं यति
नाप्रेरितं च यत्न ॥ दंपत्योर्भुक्तशेषं च भुक्त्वा चांद्रायणं चरेत् ॥ अर्कद्विपर्वरात्रौ च चतुर्दश्यष्टमी
दिवा ॥ एकादश्यामहोरात्रं भुक्त्वा चांद्रायणं चरेत् ॥ अत्र सर्वत्र चांद्रायणप्रायश्चित्तं कथनम
भ्यासविषयं ॥ अनभ्यासे तु अहोरात्रमभोजनं ॥ एतेषु सर्वेषु ज्ञानेषु अहोरात्रमभोजनमिति विशे
षोक्तेः ॥ स्कंदविधाने तु ॥ पर्वणोर्कवारे च रात्रौ भुंक्ते द्विजो यदि ॥ सप्तुर्मत्रं जपेद्द्वेकादशवारं वि
शुद्ध्यति ॥ अष्टम्यां च चतुर्दश्यां यदि भुंक्ते दिवा द्विजः ॥ दशवारं जपेन्मंत्रमभिस्वहृष्टिमेव च ॥ ए
कादश्यां यदा भुंक्ते स्वेच्छया आधिवर्जितः ॥ त्वं सोमासीति वै सूक्तं जपेत्पापात्प्रमुच्यते ॥ इदं प्रा
यश्चित्तमवैधव्यस्मव विषयं ॥ वैधव्ये त्वेकादशीभोजने प्रायश्चित्तविशेष श्रवणादिति दिक् ॥ य
द्यपत्रकुष्मांडं तदूंणी चैव मूलकं वहगीतम्येनिर्हरत्तिना निषिद्धो विशेषे मूलकभक्षणनि
षेध उक्तस्तथापि ब्राह्मणस्य सर्वदा मूलकनिषेध उक्तो दक्षस्मृतौ अंतिमाध्याये ॥ पितॄणां
देवतानां च मूलकं नैव दापयेत् ॥ ददन्नरकमाप्नोति भोक्ता च ब्राह्मणस्तथा ॥ ब्राह्मणो मूलकं

राम:
८१

भक्ष्यंश्चरेच्चांद्रायणव्रतं ॥ अन्यथा याति नरकं पातित्यं चैव विंदति ॥ वरं भुक्तमभेध्यं चापि वेद्या गर्हितं
क्वचित् ॥ वर्जनीयं सदा विप्रैर्मूलकं मदिरासमं ॥ पितॄणां वल्लभा ये च अस्मै तेव नमूलकाः ॥ स्वयंजाताः
पवित्राश्च भक्ष्यंति वनवासिनः ॥ लोहितं वासितं नापि मूलकं मदिरासमं ॥ देवानां वल्लभा ये सुरमे
तेव नमूलकाः ॥ मूलकं तु नारो भुंक्ते दुष्टो रुधिरं दिने दिने ॥ न तस्य नरको नारो यावद्ब्रह्मतसंप्लवमिति
॥ उशना ॥ क्षुरकर्मणि वांते च स्नानमात्रेण शुद्ध्यतीति ॥ चंद्रिकायां जीवत्पितृकादेर्विशेष उक्तः ॥
कनीयान्सपिता चैव भुक्त्वा श्राद्धिकभोजनं ॥ प्राणाग्निहोत्रादन्यत्र न समो न समाचरेदिति ॥ भोजनं
तु न निःशेषं कुर्यात्प्राज्ञः कथंचन ॥ अन्नत्र दध्नः क्षीरात्क्षौद्रात् सक्तुभ्य एव वा ॥ भुक्त्वा पीत्वा तु यः क
श्चिदुच्छिष्टं पात्रं विमुंचति ॥ क्षुधार्त्तः स पिपासार्त्तो भवेज्जन्मनि जन्मनि ॥ देवलः ॥ भुक्तोच्छिष्टात्स
मादाय सर्वस्मात्किंचिदेव तु ॥ उच्छिष्टभागधेयेभ्यः सोदकं निर्वपेद्भुवि ॥ मंत्रस्तु ॥ यत्र क्वचन सं
स्थानां क्षुत्तृष्णोपहतात्मनां ॥ दुर्गतीनां मया दत्तमक्षय्यमुपतिष्ठतु ॥ रौरवे पुण्यनिलये पद्मार्बुद
निवासिनां ॥ अर्थिनामुदकं दत्तमक्षय्यमुपतिष्ठतु ॥ व्यासः ॥ अर्द्धं पीत्वा तु गंडूषमर्द्धं स्नानं मही

Indira Gandhi National
Centre for the Arts

आ·कं ८२ तले॥ रसातलगता नागास्तेन प्रीणन्ति निसृताः॥ यद्युत्तिष्ठेदनाचांतो भुक्तवानासनाद्द्विजः॥ सद्य
ःस्नानं प्रकुर्वीत नान्यथाप्रयतो भवेत्॥ उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेण वा द्विजः॥ उपोष्य रजनी
मेकां पंचगव्येन शुध्यति॥ गंडूषकरणात्पूर्वं हस्तं प्रक्षालयेद्द्विजः॥ हुतं देवं च पित्र्यं च घ्रात्वा चैवो
पपातकैः॥ यो वै गंडूषसमये तर्जन्या वक्त्रशोधनं॥ कुर्वीत पश्चिमस्थान्मा रौरवं नरकं व्रजेत्॥
आचम्य च ततः कुर्याद्धृतकाष्ठस्य भक्षणं॥ भोजने दंतलग्नानि निर्हृत्याचमनं चरेत्॥ अहुँ पंच तथा
स्मश्रीणि त्रीणि तथैव च॥ आचमेत् बुलकान् प्राज्ञो मुखशुद्धिं यदीच्छतीति॥ गौतमः॥ आचांतोप्य
शुचिस्तावद्यावत्पात्रं न चोद्धरेत्॥ उद्धृतेप्यशुचिस्तावद्यावद्भूर्न प्रमार्जिता इति ब्रह्मपुराणे॥ भोज
नांते हि आचमनं तज्जलेर्नेत्रमार्जनं॥ कार्यं चक्षुर्विहद्ध्यर्थं भार्गवादींश्च संस्मरेत्॥ तदुक्तं भार
ते आरण्यके पर्वणि॥ शर्यातिं च सुकन्यां च भार्गवं चाश्विनौ स्मरः॥ भोजनांते स्मरेद्यस्तु तस्य चक्षु
र्न नश्यति॥ आहारपरिणामार्थमिमान् संस्मरेत्॥ अगस्त्यं कुंभकर्णं च शनिं च वडवानलं॥ अन्न
स्य परिणामार्थं स्मरेद्भीमं च पंचममिति॥ मार्कंडेयः॥ भूयोप्याचम्य कर्तव्यं तांबूलस्य च भ रामः ८२

क्षणं॥ श्रवणं चेतिहासस्य तथा रामायणस्य चेति॥ तांबूलभक्षणे विशेषमाह गर्गः॥ प्रातःका
ले फलाधिक्यं चूर्णाधिक्यं तु मध्यतः॥ निशि पर्णाधिक्यं च द्विजस्य लक्ष्मीर्विवर्द्धते॥ फलं पूगी
फलं॥ पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसंभवः॥ चूर्णं हरत्यायुः शिरा बुद्धिं विनाशयेत्॥ तस्मा
देतान्परित्यज्य तांबूलं भक्षयेत्सदा॥ अनिधाय मुखे पर्णं पूगं खादति यो नरः॥ सप्तजन्मदरिद्री स्या
दंते नैव स्मरेद्धरिम्॥ पंच सप्ताष्टपत्राणि दश द्वादश वा पिबा॥ दद्यात्स्वयं च गृह्णीयाद्भक्षणे वीटकस्य
तु॥ तर्जन्या चूर्णमादाय मत्तांबूलं न तु भक्षयेत्॥ यदि वा भक्षयेन्मूढो नरकं प्रतिपद्यते॥ मध्यमांगु
लिनादाय चूर्णं पर्णे विलेपयेत्॥ अंगुष्ठाग्रेण वा तद्वद्दोषमाप्नुयात्॥ मृताशौचे तथा श्रा
द्धे मातापित्रोर्मृतेऽहनि॥ उपवासे च तांबूलं दिवा रात्रौ विवर्जयेत्॥ यतिश्च ब्रह्मचारी च विधवा च रजस्व
ला॥ तांबूलं च वर्णांते षां तुल्यं गोमांसभक्षणेनेति॥ आयुर्वेदे॥ भुक्त्वा वह्निमुपस्पृश्य शनैः सप्त
पदं व्रजेत्॥ शयीत वामभागेन यतो रोगैर्न पीड्यते॥ भुक्त्वोपविशतः स्थौल्यं बलमुत्तानशायिनः॥

Indira Gandhi National
Centre for the Arts

आ॰ कं
८३

आरोग्यं बामकुक्षौ तु मन्त्युर्भवति धावतस्तथा॥ ॥इत्याह्निके भोजनविधौ पंचमभागकृत्यम्॥ ॥
अथ भोजनानंतरकृत्यमाह दक्षः॥ इतिहासपुराणाद्यैः षष्ठसप्तमकौ नयेत्॥ अष्टमे लोकया
त्रा तु बहिः संध्या ततः पुनः॥ याज्ञवल्क्योपि॥ अहःशेषं समासीत शिष्टैरिष्टैश्च बंधुभिरिति॥
इत्याह्निकविधौ षष्ठसप्तमभागकृत्यं॥ ॥अथ सायंसंध्या निरूप्यते॥ भविष्योत्तरे॥ शौचं
कृत्वा यथान्यायमर्धास्तमिते भास्करे॥ बहिः संध्यामुपासीत आसीनस्त्वथवा गृहे॥ शौनातपः॥
अन्नं तं मध्यगं धं च दिवा मैथुनमेव च॥ पुनाति हि बलस्यान्नं बहिः संध्यामुपासिता॥ यमः॥ रवेरस्तम
यात्सं[illegible]घटिकैकापदा भवेत्॥ सायंसंध्यामुपास्याथ कुर्याद्धोमं च पूर्ववत्॥ अप्यमेव दीपदानस्य समयः
॥रवेरस्तसमारभ्य यावत्सूर्योदयो भवेत्॥ यस्य तिष्ठेद्गृहे दीपस्तस्य नास्ति दरिद्रता॥ आर्षुदः प्राङ्मुखो
दीपो धनदः स्याद्दशमुखः॥ प्रत्यङ्मुखो दुःखदो सौ हानिदो दक्षिणामुख इति संग्रहे॥ संध्याध्यानादि राम॰
पूर्वमेवोक्तं॥ अथ सायंसंध्यातर्पणमुच्यते॥ सरस्वत्या वसिष्ठ ऋषिः विष्णुर्देवता जगती छंदः॥ सायंसंध्या ८३

नादि पूर्वमेवोक्तं नदं स्यादुदङ्मुखः॥ कृ॰॥ अथ सायंसंध्यातर्पणमुच्यते॥ सरस्वत्या वसिष्ठ ऋषिः विष्णु
र्देवता जगती छंदः॥ सायंसंध्यातर्पणे विनियोगः॥ ॐ भूः पुरुषं तर्पयामि॥ सामवेदं तमंडलं तः।
विष्णुरूपिणीं त॰। परमात्मानं त॰। सरस्वतीं त॰॥ वेदमातरं त॰। सांकृतीं त॰॥ हृद्रीं त॰। वैष्णवीं त॰। उप
संतं॥ निम्रुजीं त॰। सर्वार्थसिद्धिकरीं त॰॥ सर्वमंत्राधिपतिं त॰॥ ॐ भूर्भुवःस्वःपुरुषं त॰। ततः सूर्योप
स्थानादि कार्यं॥ अत्र विशेषमाह व्यासः॥ जपेद्वारुणमंत्रांस्तु इमं मे वरुणादिकान्॥ चतुर्मंत्रानि
शेषतः संध्याफलमवाप्नुयात्॥ गौतमः॥ दर्भहीना तु या संध्या संध्याहीनश्च यो जपः॥ जलहीनं तु यद्दा
नं तत्सर्वं निष्फलं भवेत्॥ जपमध्ये गुरुर्यातिपतिर्वा ब्राह्मणोत्तमः॥ तस्य पूजां समाप्याथ जपशेषं स
मापयेत्॥ यथाकाले संध्याः करणे पारिजाते विशेषमाह गौतमः॥ संध्याकालेत्वतिक्रांते स्नात्वाचम्य
यथाविधि॥ जपेदष्टशतं देवीं ततः संध्यां समाचरेत्॥ यमस्तु॥ प्राणायामत्रयं प्रातः सगर्भं द्विगुणं च
रेत्॥ मध्याह्ने त्रिगुणं प्रोक्तं पराह्णे चतुर्गुणं॥ सायाह्ने पंचगुणकं संध्यातिक्रमणे भवेत्॥ वसिष्ठस्तु॥
कालातिक्रमणे चैव त्रिसंध्यमपि सर्वदा॥ चतुर्थार्घ्यं प्रकुर्वीत भानोर्व्याहृतिसंपुटं॥ सर्वपातिक्र

Indira Gandhi National Centre for the Arts

आ.का.
८४

मेत्रमदग्निः॥ एकाहं वा व्यतिक्रम्य संध्यावंदनकर्म च॥ अहोरात्रोषितो भूत्वा गायत्र्यायुतं जपेत्॥ द्वि
रात्रे द्विगुणं प्रोक्तं त्रिरात्रे त्रिगुणं स्मृतं॥ त्रिरात्रात्परतश्चैतस्या कृच्छ्रद्वयं न संशयः॥ यः संध्याकालतः
प्राप्तमालस्यादतिवर्तते॥ स पापिष्ठतमो लोके मंदेहेषु स जायते॥ मंदेहा राक्षसाः॥ राहुग्रस्ते भेदपक्षेऽ
रोगार्तो भय आगते॥ देवाग्निद्विजवृद्धानां कार्ये महति संस्थिते॥ संध्याहानौ न दोषोऽस्ति यत्नस्तन्मुख्
यसाधानमित्यादि॥ तथा॥ दिवोदितानि कर्माणि प्रान्तुवंस्तु नराणि च॥ दिवा नाडिनिकृत्स्वेव विद्ध्या
दुत्तराणि तु॥ अत्रापि विशेषः॥ प्रातःसंध्याप्रकरणे इष्टमहनिदिक्॥ तद्विधानेन तु॥ यदादीक्षेति मंत्रे
णासम वारं जपेद्यदि॥ अकाले कुर्वतः कर्म कालिकृन्नानि तु॥ भवंतीति शेषः॥ श्राद्धभोजिनां तु॥ गर्गः॥
दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुग्द्विजः॥ ततः संध्यामुपासीत शुध्यते मदनेन रे॥ ततः संध्यादिकृ
त्ववैदिकनित्यविस्मारः॥ भारते तु॥ जलाभावे महामार्गे बंधने ऽशुचावपि॥ उभयोः संध्ययोः काले
रजसा चार्घ्यमुत्क्षिपेत्॥ तेनैव च महाराज दंशितारणमर्हति॥ संध्यागतं सहस्तोऽर्घ्यमादि समु
पतिष्ठिरमिति॥ अथवार्घ्यमुत्क्षिपेत्॥ तेनैव च महाराज दंशितारणमर्हति॥ संध्यागतं सहस्तोम

राम.
८४

सायंहोमविधानं॥ तस्य कालादिकं पूर्वमेवोक्तं॥ उपस्थाने विशेष उच्यते॥ जपेदग्निपमंत्रांस्तु
सायंहोमादनंतरं॥ एवं होमः प्रकर्तव्यः पत्न्या पुत्रादिकैरपि॥ स्वयं होमस्य नियमो यजनीये न्दिकीर्त
ने॥ एतदपि यजमानस्य संनिधाने॥ देशांतरगतस्यानेतिज्ञेयं॥ सदस्य मस्य होमं तु कुर्यान्नायं वि
चक्षणः॥ एथ कर्तुमशक्तिश्चेद्धुताहस्य विवर्जनादित्यादि॥ गालवः॥ भस्माभिधारणं कार्यं
हुतस्याग्नेस्त्वाद्विजः॥ ललाटे हृदये वाह्वोर्मूर्ध्नि संयोगलेपनं॥ अत्रावसरे रात्रिभोजनं कार्यं॥ तद्वि
धिस्तु पूर्वमेवोक्तः॥ श्राद्धादिदिने निषिद्धं द्वितीयभोजनं॥ श्राद्धाहे पर्वकाले च रविवारे तथैव च॥
रात्रिभुक्तिर्न कर्तव्या सर्वदा द्विजसत्तमैरिति स्मृतेः॥ इत्यनंतान्हिके अष्टमभागकृत्यं॥ ॥अथ श
यनविधानं॥ तत्र याज्ञवल्क्यः॥ उपास्य पश्चिमां संध्यां हुत्वाग्नींस्तानुपास्य च॥ भृत्यैः परिवृतो भुक्त्वा
नातितृप्ताथ संविशेत्॥ संविशेत्स्वपेत्॥ चकारेण वैश्वदेवादिकं समुच्चिनोति॥ अत्र च पाकांतरमु
क्तं विष्णुपुराणे॥ पुनः पाकमुपादाय सायमप्यवनीपते॥ वैश्वदेवनिमित्तं वै पत्न्या सार्धं बलिं हरेत्॥
पत्न्या च स्त्रीभिर्भर्तृवचः काममेष धर्मः परस्त्रिया गूतिस्मृतेराज्ञाकारिण्या दुष्टया भवितव्यं॥ यदि

Indira Gandhi National Centre for the Arts

भर्तुराज्ञां न संपाद्य मतिं तदाधिवेतव्या॥ तदुक्तं याज्ञवल्क्येन॥ सुरापी व्याधिता धूर्ता वंध्यार्थघ्न्यप्रि
आका० यंवदा॥ स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथेति॥ अत्राव धिमनुः॥ वंध्याष्टमेऽधिवेद्याब्दे नवमे
८५ तु मृतप्रजा॥ एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनीति॥ व्यासः॥ शुचौ देशे विविक्ते तु गोमयेनो
पलेपिते॥ प्रागुदक्प्रवणे चैव संविशेत्तु सदा बुधः॥ संग्रहे॥ जलं देवगृहं चैव वृषभं चैव हि आत्म
र्य॥ निर्णिक्तपादः प्रविशेन्नानिर्णिक्तः कथंचन॥ भविष्ये॥ उपानहौ वेणुदंडमंबुपात्रं तथैव
च॥ तांबूलादीनि सर्वाणि समीपे स्थापयेद्गृही॥ यानि कानि च पुष्पाणि यत्किंचिदनुलेपनं॥ अलक्ष्मी
परिहारार्थं निःशंकं कुरु युधिष्ठिर॥ मांगल्यं पूर्णकुंभं तु शिरःस्थाने निधापयेत्। वैदिकैर्गारुडै
र्मंत्रै रक्षां कृत्वा स्वपेत्ततः॥ गरुडमंत्रा हारीतेन प्रदर्शिताः॥ नर्मदायै नमः प्रातर्नर्मदायै नमो नि
शि॥ नमोऽस्तु नर्मदे तुभ्यं त्राहि मां विषसर्पतः॥ सर्पापसर्प भद्रं ते दूरं गच्छ महाविष॥
जनमेजययज्ञांते आस्तीकवचनं स्मर॥ आस्तीकवचनं स्मृत्वा यः सर्पो न निवर्तते॥ शतधा भि राम:
द्यते मूर्ध्नि शिंशवृक्षफलं यथेति॥ मार्कंडेयः॥ शून्यालये श्मशाने च एकवृक्षे चतुष्पथे॥ महा- ८५

देवगृहे चापि मृतवेश्मनि न स्वपेत्॥ पराशरः॥ प्राच्यां दिशि शिरः शस्तं याम्यायामथवा नृ
पाः सा देव स्वपतः पुंसो विपरीतं तु रोगदं॥ संग्रहे तु॥ स्वगृहे प्राक्शिरः कुर्याच्छ्वशुरे दक्षिणामुख
ः॥ प्रत्यङ्मुखः प्रवासे च न कदाचिदुदङ्मुखः॥ माता वा भगिनी वापि तनया मातुलस्त्रियोपि वा॥ एता
सां संनिधौ चैव न स्वपेत्तु कदाचन। इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः॥ स्मृत्यंतरे॥ निद्रा स
मयमासाद्य तांबूलं वदनात्त्यजेत्॥ शिरसः पुष्पमालां च भार्यां च शयनात्त्यजेत्॥ मत्स्यान् हर
तीनां स्त्रला मायुर्हरति धुंडुकं॥ सर्पोरूपं च पुष्पेभ्यः प्रेत मदाबलनाशिनीति॥ रतिरहस्ये॥ पर्यं
के सुविशाले च सुमग्ने पुष्पमंडिते॥ आस्तृते शयनं कुर्यान्न स्वट्वां कदाचन॥ दीपे ज्वा
ल्यमाने तु स्त्रिया संगं समाचरेत्॥ दीपे नष्टे तु यः संगं कारयेन्मनुजो यदि॥ स जन्मदरिद्रः ल
भते नात्र संशयः॥ दीर्घशय्यासनच्छाया कार्पासादंतधावनं॥ अजारजः संस्पर्शः शक्रस्या
पि श्रियं हरेत्॥ संग्रहेपि॥ अजारजः खररजस्तथा संमार्जनीरजः॥ दीपमंचकमोच्छाया शक्र
स्यापि श्रियं हरेत्॥ अन्यस्य पर्यंकेन स्वपेत्॥ आत्मशय्यासनं वस्त्रं जायापत्यं कमंडलुः॥ आ

Indira Gandhi National
Centre for the Arts

आ॰ कं
८६

म्मनः शुचिरेतानि परेषामशुचिर्भवेत्॥ पादौ प्रक्षालयेत्पूर्वं यस्त्वात्मानं पसमाचरेत्॥ अन
र्द्रहस्तचरणो दीर्घमायुरवाप्नुयात्॥ मात्स्ये त्रिविशेष उक्तः॥ रात्रिसूक्तं जपेत्स्मृत्वा देवांश्च सु
खशायिनः॥ नमस्कृत्वाथ यं विसृज्य समाधिस्थः स्वपेन्निशि॥ रात्रिसूक्तं शतपथब्राह्मणेऽ
भिहितं॥ चित्राद्वसो स्वस्ति ते पारमशीयेति रात्रिरेतज्जपति रात्रिर्वै चित्रावसुरित्यादि॥ ऋग्वेदेपि
रात्री व्यख्यत्। इत्यादि॥ सुखशायिनस्तु॥ अगस्तिर्माधवश्चैव मुचुकुंदो महामुनिः॥ कपिलो
मुनिरास्तीकः पंचैते सुखशायिन इति गोभिलोक्ताः॥ दक्षः॥ प्रदोषपश्चिमौ यामौ वेदाभ्या
सेन तौ नयेत्॥ यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पत इति॥ अत्र प्रदोषशब्दो षशब्दो रात्रेः
प्रथमपश्चिमयामावाचकः॥ स्मृत्यादौ तथोक्तेः॥ अथ स्त्र्यभिगमनविधिः॥ तत्र। यस्मात्क्षामास्त्रियः
सेव्या इति याज्ञवल्क्यस्मरणात्पुत्रार्थं संस्त्रियः सेव्याः॥ तद्विशेषमाह स एव॥ षोडशर्तुर्नि
शाः स्त्रीणां तासु युग्मासु संविशेत्॥ ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रस्तु वर्जयेत्॥ रजोदर्शन
दिनमारभ्य षोडशरात्रयो ऋतुर्गर्भाधानयोग्यः कालः॥ तत्रास्त्रियं गच्छन्ब्रह्मचार्येव॥ तत्रा

राम:
८६

द्या आद्याश्चतस्रो रात्रीः पर्वाणि च वर्जयित्वेत्यस्यार्थः॥ पर्वकालमाह गर्गः॥ चतुर्दश्यष्टमी चैव अ
मावास्या च पूर्णिमा॥ चत्वार्येतानि पर्वाणि मनुः स्वायंभुवोऽब्रवीत्॥ मनुस्तु॥ तासामाद्याश्चतस्रस्तु स्त्र
निंदितैकादशी च या॥ त्रयोदशी च शेषाः स्युः प्रशस्ता दशरात्रय इति॥ याज्ञवल्क्यः॥ एवं गच्छन्स्त्रि
यं क्षामां मघां मूलं च वर्जयेत्॥ सुस्थ इंदौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमान्॥ सकृदित्युक्तेरेकस्यां
रात्रावेकवारमेव गमनमिति नियम्यते॥ क्षामामिति विशेषणं धुमान्पुंसोऽधिके शुक्रे स्त्री भवत्यधि
के स्त्रिया इति वचनाच्छोणिताधिक्ये पुरुषाकारा स्त्र्येव भवतीति हेतोरल्पभोजनादिना स्त्रियाः
क्षामता संपाद्या इत्येतदर्थं॥ पुंसः शुक्राधिक्ये पुमान्॥ शुक्रशोणितयोः समत्वेन पुंसकं द्वि
धा बीजोत्सर्गे युगलं इत्येतदर्थं चेति ज्ञेयं॥ अत्रानुसंविशादित्यस्य नियमविधित्वेपि॥ ऋतुस्ना
तां तु यो भार्यां संनिधौ नोपगच्छति॥ घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः॥ यथा॥ ऋतु
स्नातां तु यो भार्यां स्वस्थः सन्नोपगच्छति॥ घोरायामित्यादि पूर्ववत्॥ अत्र संनिधौ स्वस्थ इ
त्यादि विशेषणान्न समर्थः सन्निहितः सन्यदि ऋतौ नोपगच्छति तदा दोषो न त्वसंनिधानादौ

Indira Gandhi National
Centre for the Arts

विति ज्ञेयं ॥ अजातपुत्रस्यैवायमनुगमननियम इति मदनपारिजातकृत् ॥ ऋतौ स्त्री विष
येयमोपि ॥ ऋतुस्नातां तु यो नारीं भर्ता नैवोपगच्छति ॥ तां ग्राममध्ये विख्याप्य भ्रूणघ्नीं च विवास
आ० क० येदि ॥ अनृतावपि स्त्रीकामनायां प्रतिषिद्धवर्जमुपेयादेव ॥ सर्वत्र वा प्रतिषिद्धवर्जमिति गौत
८६ मोक्तेः ॥ यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्निति याज्ञवल्क्योक्तेः ॥ यथाकामी वा का
ममा विजनितोः संभवामेति वचनादिति कात्यायनोक्तेश्च ॥ ऋतौ गच्छेदिति नियमे समेव नि
यमांतरमिदमिति वाशब्दार्थः ॥ अत्र ऋतुस्नातां स्त्रियं गच्छेन्नानृतां न रजस्वलां ॥ नातिबा
लां न कुपितां नाप्रशस्तां न गर्भिणीमित्यादि विशेषो द्रष्टव्यः ॥ गर्भिण्यां विशेषमाहाश्व
लायनः ॥ वपनं मैथुनं तीर्थं वर्जयेद्गर्भिणीपतिः ॥ श्राद्धं च सप्तमान्मासादूर्ध्वं चान्यत्र
वेदविदिति ॥ अत्रान्यो विशेषः ॥ प्रथमस्तबके गर्भाधानप्रकरणे द्रष्टव्यः ॥ अत्र गर्भाधा राम:
नप्रसंगादष्टाचत्वारिंशत्संस्कारा लिख्यंते ॥ गर्भाधानमथो हि पुंसवनकं सीमंतजातक्रि
या नामान्नादनचौलकौपनयनं वेदव्रतानां चतुः ॥ चत्वारि स्नपनं विवाहकरणं पंचापिय ८७

ज्ञा अथो संस्थाः सप्त च सप्त सप्त गदिता स्त्रिंशद्दशाप्यत्र तु ४० ॥ एवं तन्नशनेन वेदपठनं ॥ कर्णोज
पस्त्वोमिति प्राणोत्क्रांतिरथो हृद्देहिकमनःसंस्कृते भस्मनः ॥ अस्थां संचयनं ततः परमपि श्राद्धानि सापिंड
कं चत्वारिंशदिति स्मृतौ निगदिताः संस्कारकाः सप्त चेति नि माम कौ संग्रहश्लोकौ ॥ एकविंशति संस्थास्तु ॥ अ
ष्टकापार्वणश्राद्धं श्रावण्याग्रहायण्यैत्री चाश्वयुजीति सप्त पाकयज्ञसंस्थाः ॥ अग्न्याधेयाग्निहो
त्रदर्शपूर्णमासाग्रयणचातुर्मास्यनिरूढपशुबंधसौत्रामणीति सप्त हविर्यज्ञसंस्थाः ॥ अग्निष्टोमा
त्यग्निष्टोमोक्थ्यषोडशीवाजपेयातिरात्राप्तोर्यामेति सप्त सोमसंस्थाः ॥ यमः ॥ अष्टचत्वारिंशदेते
संस्कारा विहिता द्विजे ॥ यस्यैतैः संस्कृतो विप्रो ब्रह्मलोकं स गच्छतीति ॥ मनुः ॥ वैदिकैः कर्मभिः पु
ण्यैर्निषेकादिर्द्विजन्मनां ॥ कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह चेति ॥ एतेषु कतिपयसंस्काराणां
त्र वर्ज्यं अद्भुतस्यापि यथायोग्यं भवेति ॥ श्रौते द्विजातयः कुर्युः स्मार्तं शूद्रः समाचरेदिति पाश्रोक्तेः ॥
प्रकृतमनुसरामः ॥ ऋतु विनावृ चीयास्तां तादपत्नीशयनं गतो ॥ शयनादुत्थिता नारी शुचिः स्याद्



Indira Gandhi National
Centre for the Arts

आ॰ कं विः पुमानित्यापस्तंबोक्तः॥ पुत्रिहनित्यास्पर्थे मैकालिंगे कृते सत्येति सोढ हस्तयोर्द्वयोः॥ मत्रशौचं समाख्या
तं शुक्ले तु द्विगुणं भवेदिति शातातपोक्तं शौचं कर्तव्यं॥ रहस्य नत्वनुकालविषयं॥ दुःस्वप्ने मैथुने वांते वि
८८ रक्ते क्षुरकर्मणि॥ चितियूपश्मशानास्थ्नां स्पर्शने स्नानमाचरेदिति पराशरोक्तं स्नानं कार्यमनृतु
कालगमने॥ क्वचिदनृतावपि स्नानमाह स्मृतिः॥ अष्टम्यां च चतुर्दश्यां दिवा पर्वणि मैथुनं॥ कृ
त्वा सचैलं स्नात्वा तु वारुणीभिश्च मार्जयेदिति॥ शयनसमये दुःस्वप्नदर्शने जपमाह गर्गः॥ रामं स्कं
दं हनूमंतं वैनतेयं वृकोदरं॥ शयने यः स्मरेन्नित्यं दुःस्वप्नं तस्य नश्यति॥ ॥ इत्याह्निके शय
नविधानं॥ ॥ अथ यमनियमादिकमुच्यते॥ शास्त्राणि श्रीरप्पयात्कसमनो मोक्षे निवेशयेत्॥
अनपाकृत्य तान्मेव मोक्षमिच्छन्व्रजत्यधः इति मनूक्तेर्मुक्तिसाधने आत्मोपासनां कुर्यात्॥ स्कां राम:
दे॥ यमैश्च नियमैश्चैव आसनैः प्राणसंयमैः॥ प्रत्याहारेण ध्यानेन धारणाभिः समाधिना॥ अ
ष्टांगेन प्रयोगेण उपास्यात्मा विमुच्यते॥ ज्ञानेनैव सहैतानि नित्यकर्माणि कुर्वतः॥ निवृत्तफ ८८

लसंगस्य मुक्तिस्स्यात्करे स्थिता॥ अहिंसा सत्यमस्तेयं ब्रह्मचर्यं क्षमा धृतिः॥ दयार्जवे मिताहारः शौचं चेति
यमा दश १० शौचमिज्यातपःसंतोषाध्यायोपस्थनिग्रहः॥ व्रतोपवासमौनं च स्नानं च नियमा दशे
ति व्यासोक्ता यमादयः॥ ऊर्वोरुपरि विप्रेंद्र कृत्वा पादतले उभे॥ ऋजुकायः सुखासीनः स्वस्तिकं तत्प्र
चक्षते इत्यासनं॥ प्राणायामः प्रागुक्तः॥ इंद्रियाणां विचरतां विषयेषु स्वभावतः॥ बलादाहरणं तेषां
प्रत्याहारः स उच्यते इति प्रत्याहार उक्तः॥ ध्यानं तु॥ ध्यानमात्मस्वरूपस्य वेदनं मनसा भवेत्॥ तद्वेद्वि
गुणं प्रोक्तं सगुणं निर्गुणं तथा॥ मुखोरुपरि मनः कृत्वा हृन्मध्ये चिंतयेच्छिवं॥ पंचवक्त्रं दशभुजं त्रिने
त्रं स्मितसुंदरं॥ कर्पूरगौरं चंद्रार्धशेखरं सुविभूषितं॥ नीलग्रीवं नागहारं व्याघ्रचर्मांबरं विभुं॥ कमंडलु
क्षसूत्राहिपाशाभयधरं हरं॥ इत्यादि सगुणं॥ निर्गुणं तु॥ अहमेव परं ब्रह्म परमात्माहमव्ययः॥ एवं तद्वे
दनात्तच्च निर्गुणं ध्यानमुच्यते इति॥ निर्गुणोपासनानुष्ठानिन एव॥ कामक्रोधादियुक्तस्य विषयासक्त
चेतसः॥ अहं ब्रह्मेति यज्ज्ञानमात्मनाशस्य कारणमिति ब्रह्मवैवर्तोक्तेः॥ धारणा तु॥ यमादिगुण

Indira Gandhi National
Centre for the Arts

अ॰ क॰ युक्तस्य मनसा स्थितिरात्मनि॥ धारणा प्रोच्यते सद्भिर्योगशास्त्रार्थवेदिभिरिति॥ समाधिरुक्त॥ समाधिः
समतावस्थाजीवात्मपरमात्मनोः॥ परात्मनि स्थितिः प्रोक्तः समाधिः प्रत्यगात्मन इति॥ इत्यनेनाष्टि-
८९ केयमादिलक्षणविधानं॥ ॥अथ रुद्रजपविधानं॥ सर्वेष्वेव हि धर्मेषु रुद्राध्यायजपः परः॥ रु-
द्राध्यायी विमुच्येत जन्मसंसारसागरात्॥ लिंगार्चनं रुद्रजपस्तथा शिवतिथिव्रतं॥ वाराणसी च मर-
णं मुक्तिरेषा चतुर्विधा॥ रुद्रजापी शिवः साक्षाद्भवत्येव न संशयः॥ तस्मात्सर्वं परित्यज्य रुद्रजापी भवेत्स-
दा॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ यतिस्तथा॥ रुद्रजापेन परमां गतिं गच्छंति नान्यतः॥ रोगादुप-
शमार्थाय परमाभ्युदयाय च॥ मनोरथफलप्राप्त्यै रुद्रजापी भवेन्नर इति स्कांदे॥ जाबालोपनिष-
दि॥ यः शतरुद्रियमधीते सोऽग्निपूतो भवति। ब्रह्महत्यायाः पूतो भवतीति॥ तत्रैव॥ किं जप्येनामृतत्वं
नो ब्रूहीति शतरुद्रियकेणेति॥ शतरुद्रियं च रुद्राध्याय एव॥ चरमायामिष्टकायां शतरुद्रियं जुहो- राम:
तीत्यादि ब्राह्मणवाक्यतस्सैव विनियोगात्॥ शतपथब्राह्मणेऽपि॥ अथातः शतरुद्रियं जुहोति ८९

ति चयने तस्यैव विनियोगाह॥ रुद्राध्यायस्तु साक्षाद्भगवद्वाचकः॥ अमृतस्यैतन्नामधेयान्येतानीति जा-
बालोपनिषदुक्तेः॥ यावज्जीवं प्रणवमथ वा तत्तेवै रौद्रिं वा मा जुवेघमिति यावज्जीवं तज्जपविधानादवश्य-
तज्जपादिकार्यं॥ मदनमहार्णवेऽपि॥ यद्यपि चरमेष्टिकायाः एकादशभिः रुद्रानुवाकैर्होमो विहितस्तथापि
रुद्राध्यायी मुच्यते सर्वपापैरिति॥ तथा॥ रुद्राणां जपहोमार्चनविधिं व्याख्यास्यामः इति बोधायनादिवाक्यैर्जप-
होमार्चनादिकर्मणोऽपि विनियोगाद्रुद्राध्यायस्य जपादिष्वंगलमस्तीति॥ शिवगीतायां च॥ यस्तु रुद्रं जपेन्नि-
त्यं ध्यायमानो ममाकृतिं॥ षडक्षरं वा प्रणवं निष्कामो विजितेंद्रियः॥ सवंते नैव देहेन शिवः संजायते ध्रुव-
मिति॥ याज्ञवल्क्योऽपि॥ सुरापः स्वर्णहारी च रुद्रजापी जले स्थितः॥ सहस्रशीर्षाजापी च मुच्यते सर्वकि-
ल्बिषैरिति॥ अंगिराः॥ नमकं चमकं चैव पुरुषसूक्तं तथैव च॥ नित्यं त्रयं प्रयुंजानो ब्रह्मलोके महीय-
ते॥ रुद्राध्यायी वसेद्यत्र ग्रामे वा नगरेऽपि वा॥ न तत्र क्षुत्पिपासा च न दुर्भिक्षं भयं तथापि च॥ ब्रह्माद्यास्तु सुराः
सर्वे साध्याश्चैव विशेषतः॥ सततं हि समायांति तिष्ठंति रुद्रजापिनं॥ वायुपुराणे॥ अनपत्यादिदोषेषु शा-
किन्यादिग्रहेषु च॥ सर्वज्वरविनाशाय रुद्रो जाप्यो न संशयः॥ स्पृष्ट्वा संजपेद्यस्तु रुद्रैकादशिनी श्रुतिः

Indira Gandhi National
Centre for the Arts

॥तथा संतानगोपालविधौ चैव जपेन्नरः॥अनपत्यत्वनाशार्थं खलाभार्थसिद्धये॥सर्वत्रैवोक्तकर्मणो रु
आ॰का॰ द्रजापः प्रयत्नतः इति हृस्यारण्ये॥रुद्राः पंचविधाः प्रोक्ताः देशिकैरुत्तरोत्तरं॥संज्ञास्वाद्यो रूपकाख्यः
९० प्रथमो रुद्र उच्यते॥एकादशगुणैस्तद्वद्रुद्रो संज्ञो द्वितीयकः॥एकादशभिरेताभिस्तृतीयो लघुरुद्र
कः॥लघ्वैकादशभिः प्रोक्तो महारुद्रश्चतुर्थकः॥पंचमस्तु महारुद्रैरेकादशभिरंतिमः॥अतिरुद्रः स
माख्यातः सर्वश्रेष्ठतमोत्तमः इति॥अंगानि सुक्तानि जाबालेन॥शिवसंकल्पकं हृदयं सूक्तं स्यात्पौरुषं
शिरः॥प्राहुर्नारायणं चैव शिखाजस्थो नराभिधं॥आशुः शिशानः कवचं नेत्रं विभ्राड्बृहत् स्मृतं॥शत
रुद्रियमस्त्रं स्यात्षडंगक्रम ईरितः॥एवमंगानि संजप्य रुद्राध्यायं ततो जपेत्॥तदंते स समंत्रास्त्रयं सो
मे महर्षिभिः॥उग्रश्चेति पञ्चमं मित्रं जटामाकुर्जे पेदिति॥अत्र शतरुद्रियं नाम त्वमग्ने रुद्रो असुरो मा
दिवस ॐ स्वामपत्नयोरूपीण्यामिति सर्वेतं मंत्रजातमिति महार्णवकारः॥वाजसनेयिनां तु षोडशर्चः प्रथ
मानुवाकः शतरुद्रियं॥शिवसंकल्पमित्याद्यनुवाकपाठसामान्याधिकरण्यात्॥शतरुद्रियतत्वधर्मस्ते राम॰
दस्यादिव्याख्यातं तिलाडिष्टसमाचारत्व॥अत्र नेत्रजपादि वाजसनेयिविषयः॥आपस्तंबादीनाम ९०

नुक्तत्वात्॥चमकपाठप्रकारमाह बौधायनः॥नमस्ते रुद्र मन्यव इत्याद्येकादशानुवाकानामंते एकमेकं
चमकानुवाकं पठेद्यावदेकादशाहनीति॥अयं प्रकारस्तैत्तिरीयाणामेव॥वाजसनेयिनां तु चमकाध्याये
॥नचानुवाक इति कृत्वा यथासंख्याभावात्॥अतस्तैः एकादशवारं रुद्राध्यायं जपित्वांते चमकाध्यायः प
ठनीयः इति गम्यते॥यद्वा॥शाखांतराधिकरणन्यायेन तेषामपि यथासंख्यसंभवः संपादनीयः॥तद्यथा॥
॥आद्या अष्टावनुवाकाः॥नवमेनुवाके अपनाम ग्राहं जुहोमि वाजाय स्वाहेत्युपक्रम्य प्रजानां त्वाधिपत्या
येति शतपथे मंत्रहृदयस्यैकहोमांगत्वमुक्तं॥तथा अथ कल्पान जुहोत्यायुर्यज्ञेनेत्यस्य मंत्रस्य द्वितीयहो
मांगत्वमुक्तं॥तथा॥अथा इस्तोमश्च यजुश्चेति मंत्रस्य तृतीयहोमांगत्वमुक्तं॥तेनैवं त्र्यंतेऽस्यानुवा
केत्रयो विभागा इत्येवं यथासंभवं इति॥यद्वा अंत्यानुवाकस्त्रिरावर्तनीयः॥अस्मिं। त्र्यासादिकमपातः
पंचागरुद्राणां स्या सर्वं कमित्याद्यापस्तंबाद्युक्तमनुसंधेयं॥ग्रंथगौरवभीत्या न लिख्यते॥एवमुक्तप्रका
रेण यथाभिलषितं रुद्रजपं कृत्वा होमः कार्यः इत्युक्तं शतानपेन॥एवं रुद्रजपं कृत्वा पश्चाद्धोमं समाच
रेत्॥तिलैः सबिल्वपत्रैश्च दशांशो होम इष्यते॥तत्र मंत्रविभागो बहुधा दृश्यते॥तत्र तैत्तिरीये त्रेधा वि

Indira Gandhi National
Centre for the Arts

भक्षं जुहोति त्रय इमे लोका इति त्रेधा विभाग उक्तः॥ तथा॥ तिसृ उत्तरा आहुतीर्जुहोति षडुसंपद्यंत इति षोढा

आ॰ कं॰ विभागोपि॥ वाजसनेयके पि॥ सर्वं जानुदघ्ने प्रथमं ७ स्वाहाकरोत्यथ नाभिदघ्ने पथ मुखदघ्न इति॥ अस्मि

९१ न्पक्षे॥ मंत्रविभागप्रकारस्तु॥ नमस्ते रुद्र मन्यव इत्यारभ्य सभाभ्यः सभापतिभ्यश्च वो नम इत्यंत एको मं

त्रः॥ सर्वा आशीः सा च स्वाहाकरोतिप्रयोगे चानुवाक इति श्रुतेः॥ तथा॥ नमोऽश्वेभ्य इत्यारभ्या वार्याय

चेत्यंतो द्वितीयो मंत्रः॥ तथा॥ नमः प्रतरणाय चेत्यारभ्य जंभेद्ध्य इत्यंतस्तृतीयो मंत्रः॥ अत्राविच्छिन्ना

नामनुवाकानां मंत्रत्वं ज्ञेयं॥ गवां शतं दक्षिणेतिवत्॥ यथा प्रमनुवाकत्रयमेकैको मंत्रः॥ तथा षोढा

पक्षोपि॥ तिस्रः अनवरोहती सृक्का त्रिरित उर्ध्वारोहति तत्र इत्तसा क्रोवेदुधुरि तिशतपथे उक्तः॥ अ

त्रपक्षे सर्वौ कास्युपो मंत्राः॥ नमोऽस्तु रुद्रेभ्यो ये दिवीत्यादि प्रत्यवरोह संज्ञकास्त्रयो मंत्रा इमे वेष्ट्यं भवंति

॥ तैत्तिरीयाणां प्रकारस्तु महार्णवादौ ज्ञेयः॥ तथा॥ षोडशधा पक्षोपि बौधायनोक्तः॥ नमस्ते रुद्र मन्य

व इत्येताननुवाकांस्त्रेधा विभज्याधिवा प्रथमादुपक्रम्यानुवाकत्रयमेको मंत्रः॥ चतुर्थमारभ्य षष्ठांतो द्वि रम:

तीयः॥ सप्तममारभ्या नवमानावधिस्तृतीयः॥ ततो दशावतानादशमंत्राः॥ प्रत्यवरोहाणि त्रीणि सेवं षो ९१

डश भवंतीति॥ तथा सप्तदशधा पक्षोपि॥ तत्र प्रथमानुवाक एको मंत्रः॥ तदुत्तरमनुवाकद्वयं द्वितीयः॥

शेषं पूर्ववत्॥ अथ पंचचत्वारिंशत्पक्षो बौधायनोक्तः॥ यथा॥ प्रथमानुवाके षोडश मंत्राः॥ द्वितीयतृ

तीयचतुर्थपंचमानुवाकाश्चत्वारो मंत्राः॥ ततः षष्ठानुवाके नमः सुत्याय चेत्यारभ्य नमो वृक्षेभ्यो हरिकेशेभ्य

इत्यंत एको मंत्रः॥ ततो नमस्ताये सेनावानेको मंत्रः॥ ततो नमः शंभवाय चेत्यादि शिवतराय चेत्यंत एको मं

त्रः॥ ततो नमः पार्याय चेत्यारभ्य पञ्चछल्भ्यश्च वो नम इत्यंत एको मंत्रः॥ ततो नम आकिरिकेभ्यो देवानां हृ

हृदयेभ्य इत्यादि चत्वारो मंत्राः॥ अत्र देवानां हृदयेभ्य इत्यस्य विशेषणत्वेनैकं यजुः समाप्यानुषंगः कृ

तेभ्यः॥ ततो द्रापे अंधसस्पत इत्यारभ्य एतावंतश्च सेनानां सप्तदश मंत्राः॥ ततः प्रत्यवरोहणानि त्रीणि यजूं

षि॥ एवमष्टाचत्वारिंशन्मंत्रविभागो ज्ञेयः॥ अथ षडुत्तरशतात्मको विभागः प्रदर्श्यते॥ तत्र प्रथमा

नुवाके षोडश १६॥ ततो नमो हिरण्यबाहव इत्यारभ्य नमः श्वभ्यः श्वपतिभ्यश्च वो नम इत्यंता उभयतो न

मस्काराः पंचचत्वारिंशत्॥ ४५॥ ततो नमो भवाय च रुद्राय चेत्यारभ्य आनिर्हतेभ्य इत्यंता अनंतरतो नमस्का

रा नवसप्ततिः॥ ७९॥ ततो द्रापे इत्यादिः सर्वैव द्विशतीति २० इत्थं मतिमंत्रविभागः॥ एवं षष्टिश्च द्वे त्रीणि

Indira Gandhi National Centre for the Arts

चशतान्यथ त्रिंशदधपंचत्रिंशद्दिसादिशतपथ्युतिमिमाराकाः सपादचतुःशताशीत्यधिकशतद्व
यादिपक्षा अथवर्गांतराः॥ तेचास्माभिः शतरुद्रियाध्यायभाष्ये प्रपंचिताः॥ ग्रंथगौरवादिह नोक्ताः॥
एतेत्रेधाविभागादिपक्षाः शक्तिफलतारतम्येन योज्याः॥ ग्रहाणां ग्रहणावत्॥ तैत्तिरीयार्णमंत्रवि आ.क.
भागे एकोनसप्तत्युत्तरशतविभागः प्रसिद्ध एवेत्युपरमाते॥ एभिः प्रकारैर्यदि होममेव चिकीर्षति तदा ९२
होम एव प्रधानभूतः कर्तव्यः॥ जपाद्यंगत्वेन होमचिकीर्षा चेत्तदा दशांशशतांशादिभेदेन होमः कार्यः
॥तत्र त्रेधाविभागपक्षमाश्रित्य एकादशाहुत्यात्मकजपरुद्रहोमे तिस्र आहुतयो भवंति॥ चमकाध्यायेना
तेवसौद्धीणकार्याः॥ संपूर्णहोमपक्षे तु प्रतिरूपकं तिसृष्वपि स्वाहुतय इति मिलितास्त्रयस्त्रिंशत्॥ प्रति
रूपके चमकानुवाकानामेकादशाहुतिः॥ अर्थपंचमकहोमो होमद्रव्ये रोव॥ वसोर्द्धारात्वाप्नेनैवांते सर्वत्र च
मकाध्यायेन कार्या॥ वसोर्द्धारायामनेनैव तु वर्णास्तु च सादिश्रुतेः॥ एवं त्रेधाविभागादिपक्षेष्वाहुतिसंख्या राम:
ज्ञेया॥ ग्रंथगौरवभयान्नोच्यते॥ शतांशपक्षस्तु लघुरुद्राद्यर्थः॥ तत्रैव संभवात्॥ तथाहि॥ लघुरुद्रे एक ९२
विंशत्युत्तरशतरूपका भवंति॥ तेन शतांशहोमपक्षः संभवति॥ तत्र शतरूपाणामेकरूपहोमः॥ तत्रा

पि त्रेधादिपक्षाः संयोज्याः॥ अवशिष्टैकत्रिंशतिरूपाणां सर्वेण नमस्ते रुद्र इत्यनेन मंत्रेणैकाहुतिः॥ एवं महा
रुद्रहोमोऽसौ॥ अस्मिंस्तु यथाभिलषितरुद्रजपानंतरं नमः शंभवाय चेति मूलमंत्रेणैव होममिच्छंति॥ तदा
ह बौधायनः॥ मूलमंत्रेण वा होमं कुर्यादिति॥ तत्प्रकारस्तु॥ हेमाद्रौ मूलागमे अभिहितः॥ ततो होमं प्रकुर्वी
त नमः शंभिति मंत्रतः॥ रुद्रैकादशिनी जाप्येत्र पंचविंशत्याहुतिः॥ रुद्रे शतत्रयं प्रोक्तं षष्ठ्यास्त्वधिकया
धिकं॥ रुद्रे लघुरुद्रे इत्यर्थः॥ चत्वारस्त्र महारुद्रे साष्टसहस्राः समवर्जिताः॥ चत्वारिंशत्सहस्राश्च कर्तव्याश्चा
नुरूपतः॥ तुलाश्च सप्तसप्तमासाद्यतिरुद्र इति स्थितिरिति॥ मूलमंत्रमासादिकं प्रथमस्तबके रुद्रस्ता
नविधाने द्रष्टव्यं॥ ॥अथापरश्चतुःषष्टिविभागः॥ स च हेमाद्रौ शांतिकांडे रुद्रस्तोत्रे अभिहितः॥ अ
तिरुद्रत्वा होमेऽपि भवति॥ तथाहि॥ सुखासनोपविष्टानामाचार्यो रुद्रजापकः॥ अभिषिंचेत्ततश्श्रोना
मकं पत्रपुटांबुना॥ अच्छिद्राण्येव पत्राणि स्नानार्थं ताम्रपात्रेण॥ चतुःषष्टिरूपेनैव रुद्रैकादशे
ननु॥ शतानि षट् पंचवर्णानां चतुर्भिरधिकानि तु॥ वर्णानां मंत्राणामिस्पर्शः॥ तेषां चतुःषष्टिसंख्याना
मेकादशरूपस्य पठितानामियं संख्या निष्पद्यते॥ यद्यपि प्रायो रुद्राध्यायस्य षड्वर्गादकं नास्ति तथापि

Indira Gandhi National
Centre for the Arts

कारणवशात्सायां चतुःषष्टिकं डिका पाठे पत्वश्चैतदभिप्रायमग्वचनमितिद्रष्टव्यं ॥ तत्र कारस्तनुवाकाध्या
आ॰कं येसमाम्नानः ॥ यथा ॥ नमस्ते षोडश ॥ नमो हिरण्यबाहवे ॥ ३ ह्मीविंशे ॥ नक्षमः ॥ ३ जैष्ठ्यं ॥ सुत्साप ॥ पार्या
९३ येति पंचपंच ॥ ३० ॥ द्रापेअंधसो षोडश १८ ॥ अत्रानुवाकेषु चतुःषष्टिरिति ॥ अथ संपूर्णरुद्राध्याये नै
कावृत्ति पक्षोप्यभिहितः ॥ परशुरामपद्धतौ ॥ रुद्रयामले ॥ प्रशस्तिं हविषा पूर्ण रुद्राध्यायमधीत्य च ॥ जु
हुयाद्गुहुति चैकां सर्वकामसमृद्धये ॥ इति हविरत्र तिलादिकठिनद्रव्यं ॥ प्रशस्तिपदस्यावपदेशात् ॥ एते
षु सर्वेषु मंत्रविभागपक्षेषु शक्तितारतम्येन योजितेषु षिषष्ठ्युत्तरशतविभागपक्षोऽतिश्रेष्ठ इति गम्य
ते ॥ श्रुतसूक्तस्मात् ॥ तथाहि ॥ प्रथमानुवाके षोडश मंत्रास्तं होमांगलं प्रथमे चानुवाके इति श्रुतसूक्तं ॥ ततो
नमो हिरण्यबाहवइत्यारभ्य नमआनिर्हतेभ्य इत्यंतेषु प्रतिकं डिकं चत्वारश्चत्वारो मंत्रा नमो हिरण्यबा
हवे सेनान्ये दिशां च पतये नमइत्येवंरूपा उभयतो नमस्कारः पंचचत्वारिंशत् ॥ ततो नमो भवाय चेत्या
रभ्यान्तरतो नमस्कारेण नवसप्ततिः ॥ अथ हं हि यथोनुहोति नमोऽग्रे पोच सुपक्रम्य नमो हिरण्यबाहवे रामः
सेनान्ये दिशां च पतये नमइति श्रुत्यैवं मंत्रविभागस्य दर्शितत्वात् ॥ ईदृशं वा त्रवाच्याभिप्रायेण मुक्ता ९३

नां परमात्मा तिरितिवत् ॥ ननु वाचकाभिप्रायेण तेषां बहुत्वदर्शनात् ॥ तथाच हिरण्यबाहवे सेनान्य इत्येकं
नाम ॥ दिशां च पतय इति द्वितीयं ॥ एवमुत्तरत्र द्रष्टव्यं ॥ तथा नमो वृक्षेभ्यो हरिकेशेभ्य इत्येकं नाम ॥ नमस्ता
रायेति द्वितीयं ॥ तत्तोमानुवाके विंशति मंत्राः ॥ अथोत्तराणि जपविद्वापेअंधसस्पत इत्युपक्रम्य सदो
तानि यजूंषि भवंती सुक्का दर्शनानि ततानां त्रुहोती सुत्क्वा त्रीणि यजूंषि भवंतीति श्रुत्यैवं मं
त्रविभागकथनादित्यलंप्रपंचेन ॥ ॥ अथ रुद्राध्यायस्य प्रतिमंत्रप्रयोगः कथ्यते ॥ सच महार्णवे
॥ नमकाश्रितमंत्राणां प्रयोगः फलगोचरः ॥ नमस्ते रुद्र मन्यवः पुरश्चरणसिद्धये ॥ प्राजापसं
चरित्वैकं जपेन्मंत्रममुं ततः ॥ एकादशसहस्राणि शुद्धकाले निरंतरं ॥ प्रदक्षिणनमस्कारौ कुर्याद्दे
शस्य मंत्रतः ॥ मंत्रतः अनेनैव मंत्रेण ॥ प्रदक्षिणनमस्कारौ यथाशक्तिकार्यौ ॥ हविष्यमन्नं भुं
जीत ब्रह्मचारी ह्यधः स्वपेत् ॥ पुरश्चरणसिद्ध्यर्थं दक्षिणामूर्तिसंनिधौ ॥ एकादशसहस्राणां जपा
त्सर्वार्थविनाशनं ॥ अथ लक्षजपात् सर्वजन्मपापं प्रणश्यति ॥ ततः स्वगृह्यविधिना स्थापयित्वा हु
ताशनं ॥ पायसं श्रपयित्वा समुक्तं तज्जुहुयाद्बुधः ॥ दशांशसंख्यया पश्चात्साक्षाद्देवः प्रपश्यति ॥

Indira Gandhi National Centre for the Arts

अथ यातं रहस्य॥ दिनादि ह्रादेशो वा मुंचते भोजी अपेन्मनुं॥ विनियोज्यं भवेद्योग्यः सर्वकामार्थसिद्ध
आ॰कं॰ ८४ ये॥ जपसंख्या एवं वत्॥ अनेन सिद्धमंत्रेण यद्यत्कामयते द्विजः॥ तत्तत्कामवाप्नोति जपाद्युतं सं
स्यकृदिति॥ अथ यातं रुद्ररहस्य॥ वासर त्रितयं यावत् निरंतरजपान्नरः॥ नित्यं कर्माविरोधेन पु
रश्चरणवान् भवेत्॥ ततः प्रयोगयोग्यः स्यात् यदा योग्यं तिकामना॥ जपहोमादि सर्ववत्॥ अथ यामि
षु मिसस्य शिवे नव च सेस स्य च रुद्रध्यमेकी मंत्रः॥ निरंतरं जपेन्मंत्रं दिनानामेकविंशतिं॥ पुरश्चर
णमेवं स्यात् प्रयोगार्हस्ततो भवेत्॥ अकालमरणं द्रोघं नाशमायाति वैयद्॥ महीपतिः शांतिकमका
रयेद्ग्रजन्मना॥ जन्मो मासमं तिलव्रीहिगोधूमयवकल्पितैः॥ हविः प्रजुहुयाल्लक्षं वासरे एकविं
शतौ॥ अकालमरणं जातं सा ध्रुवं नाशमेत्यतीति॥ अथ ध्वबोच दिसस्य॥ अर्ह इरं कुचारी लार्थवास
राम च संयतः॥ शाकमूलपयान्नाशी दिवानि पेत्रिरंतरं॥ जप मुरश्चरणवान् स्यात् प्रयोगार्हस्ततो भवे
त्॥ रक्षापुरःसरं राजा कामयन् चिरजीवितं॥ कारयेद्विधिनाकर्म बहुमार्गाद्द्विजन्मना॥ श्वेतसर्षपदू
र्वायवैस्तंदुलमिश्रितैः॥ होमं चाष्टसहस्रसंख्या संचाहः सुनिरंतरं॥ अथाभ्यो गर्भरोगस्य नात्रापमोच्य रुम॰ ८४

ने विधिः॥ सहस्रलक्ष्लो मनुनाशनक्रुलो त्यवापुनः॥ आभिमंत्र्य फलं सम्यक् तीरं गंगय सिसिपेत॥ को
पयित्वा ततः स्नान्नो होमः कार्यो विधानतः॥ तत्र संख्या भवेदष्टौ सहस्राणि शतानि च॥ शेषं पूर्ववत् स्यो
गर्भरोगणं प्रशमनीति॥ अथ अपमीय स्नाम्र इति मंत्रद्वयप्रयोगः॥ कृष्णमेकं चरेत् सर्वं ततः षोडशवा
सरान्॥ निरंतरं जपेन्मंत्रं नित्यकर्माविरोधतः॥ अनापदि भयेद्धीरे समुत्पन्ने सर्पं ततः॥ पंचविमान
या हूयकारयेद्देवि स्वापनं॥ हंसीपि पापसंतत्र्ने तु त्यक्त्वा तिलापवा॥ वैनस्वः समिधश्वा पिजुहुयाल्ल
क्ष संख्यया॥ एकादशदिनैः साध्यं अखिलं कर्म हस्थिदं॥ पंचानां गुनु जपेदेकस्य ललातैः जुहुयु द्विजाः॥ अ
थ नमो अस्तु नीलग्रीवायेति प्रयोगः॥ आलये यः श्मिमद्धेरे महेशस्य समीपतः॥ जपितादिव एतस
त्स संततं संपत्नतः॥ सहस्रं जुहुयाद्र्कं पुष्पैः दशदिनावधि॥ पुरश्चरणमेवं स्यात् प्रयुंजीत ततो मनु
॥ पुत्रकामः पुरीहं तु रात्ये वृत्पगोपके॥ शमी सर्मि सिरक्ता भिर्द्ध्या त्समधुना घृतं॥ एकादशसहस्रा
णि त्रीण्यहान्यथ पंच वा॥ अष्टौ सहस्राण्यथैव शतानामप्यपि वेशितु॥ पंके स्थावरि शिरसि निम्नसं
जद्भाततः॥ शमीपत्राणि नानेति पुत्रकामः शिवेऽर्पयेत्॥ शतं द्विजान् भोजयित्वा पुत्रं प्राप्नोति सं

Indira Gandhi National Centre for the Arts

आ॰कं
९५

शयं॥ अथ प्रमुंच धन्वनस्त्वादिति सप्तर्णां प्रयोगः॥ कृच्छ्रमेकं चरित्वादौ जपत्रुनवचं वासरान्॥ एवं कृ
ते भवेत्सिद्धिः पुरश्चरणकर्मणः॥ महीपतेरायुधानि मंत्रयित्वा नवेन तु॥ कुशकंटकहोमस्तु लक्ष
संख्योपशांतितः॥ विंद्विषो विलयं यांति शिवस्यैव प्रसादतः॥ अथ मा नो हेतिरिति त्र्यचप्रयोगः॥
पुरश्चरणमासांस्यात्सर्वेकानामकामिव॥ एकादश सहस्राणि दीयानीयानमीश्वरे॥ कृत्वा सर्वा
रियो गच्छेत्सेनानीः पार्थिवं विना॥ हत्वा त्वालं प्रदीपानां शत्रुसेना विनश्यति॥ महाशंकुसहस्रा
णि त्र्यभिमंत्र्यारियोः पुरे दिवालये चत्वरे वारामेवापि चतुष्पथे॥ स्थाने शालासु वान्येषु नगरांगे
षु निक्षिपेत्॥ नश्येत वर्षत्रयान्तास्पर्वाध्यादिभिरुपद्रवैरनिप्रयमानुवाकप्रयोगः॥ अथ द्विती
यानुवाकस्य॥ अथ श्रीकामना यस्य सम्येन कर्मणो शुभैः॥ अयुतं जुहुयाद्वह्नौ श्रीमान् भवति
मानवः॥ अथ तृतीयस्य॥ अथानेनानुवाकेन वक्ष्ये कर्माभिचारिकं॥ पर राष्ट्रे रोगमिच्छन् राजा
वैकारयेत्क्रियां॥ वराहमेषमांसानि जुहुयाल्लक्षसंख्यया॥ अथ चतुर्थस्य॥ चतुर्थेनानुवाके

राम:
९५

न मेह शांतिरथोच्यते॥ मेह ज्ञानस्नानतो होमं कुर्यात्क्षौद्रेण सर्पिषा॥ प्रतिमंत्र नमस्कारं मंत्रविच्छेद
ईरितः॥ संख्या नवसहस्राणि होमान्मेहो विनश्यति॥ मेहः प्रमेहरोगः॥ अमेयाम पिकुष्ठादिरोगा
देः शांतये पि चेरितिः॥ अथ पंचमषष्ठयोः॥ अनुवाकद्वयस्यास्य पुरश्चरणसिद्धये॥ त्रिरात्रं च
रुभोजी स्याज्जपेद्यनिरंतरं॥ एकादशादिनान्येवं पुरश्चरणं उगमभवेन॥ अथ राज्यरमाहृद्धि
कामो राजानुकारयेत्॥ मंत्रसिद्धैर्द्विजैः कर्म वक्ष्यमाणमतंद्रितैः॥ यावदेकादशाहनि तत्रयो
रनुवाकयोः॥ तावदेव सपर्या स्यात्सर्वोक्तानुदिने दिने॥ एकादशप्रतिदिनं भोजयेद्बहुद्विजानपि
॥ पूर्वोक्ताकलमलादिना लिंगपूजेत्सर्वः॥ एवं कृते राज्यलक्ष्मीर्निःप्रसद्दं विवर्द्धते॥ अथ सप्त
मस्य॥ एकोपवासं कुर्वीत नश्चाद्दशानंजपेत्॥ पुरश्चरणमेवं स्यात्प्रयोगार्हस्ततो भवेत्॥ चातु
र्वर्ण्यस्य वश्यं यः कामयेतात्मनो द्विजः॥ उदुंबरश्चलसत्रन्यग्रोधप्लक्षमरूहां॥ चलनं त्रोस्य
स्यः। समिधो दधिमध्वाज्यसंयुक्ता जुहुयाद्वसौ॥ अयुतं होमसंख्या स्याद्वशमेव समश्नुते॥

Indira Gandhi National
Centre for the Arts

आ॰कं
९६

मेधाकामस्तु जुहुयात्सहस्राणां तु पंचकं ॥ कपिलाज्यं हविः प्रोक्तमेवं धीमान्समश्नुते ॥ अथद्रापे
दृस्य ॥ कृत्वोपवासमेकाहं जन्मंत्रमथायुतम ॥ पुरश्चरणमेवस्याद् धनेच्छनकामना ॥ आर्द्राणां
यां जुहुयादाज्यं कापिलं प्रयतोऽयुतं ॥ धनं बहु भवेत्तस्य महेशस्य प्रसादतः ॥ ज्वरे ज्ञाते ऽस्य शांत्य
र्थं शिरस्तो भुवि रोगिणः ॥ जुहुयात्पंचसाहस्रीं दूर्वाणां ज्वरशांतये ॥ दूर्वाहोमे दूर्वात्र्यं होतव्यामि
तिपारिभाषया मुक्तं ॥ अभिचारस्य शांत्यर्थं वैकंकतनदूद्भवाः ॥ समिधो जुहुयाद्धोमसंख्यात्व
त्रायुतं भवेत् ॥ महाजनकृतद्रोहशांत्यै सर्पिर्होममाचरेत् ॥ तुषामाज्येन संमिश्रं हविः संख्यापि चा
युतं ॥ अथ या ते रुद्र शिवा तनूः शिवेस्य ॥ अष्टोत्तरशतानि कुर्वीत प्राणायामांस्ततः परं ॥ स
हस्राणि जपेत्पंच पुरश्चरणसिद्धये ॥ कन्यार्थी लभते कन्यां हुत्वा लाजान् घृताप्लुतान् ॥ अथ
मार्गसमिद्धोमे ऽलक्ष्मीं नाशयेद्बुधः ॥ सर्वकल्मषनाशाय जुहुयाच्च तिलाहुतीः ॥ अहोरात्र राम॰
मुपोष्यैव पुत्रकामः शुचिव्रतः ॥ पायसं जुहुयादग्नौ अष्टोत्तरशताहुतीः ॥ ऋतुस्नातां ततो भा ९६

र्यां शुचिवस्त्रामलंकृतां ॥ भोजयेद्धुतशेषं तु जपन्नष्टशतं बुधः ॥ ब्राह्मणान्भोजयित्वा तु पुत्रं प्राप्नोति मा
नवः ॥ अथ मानो महांतमित्यस्य ॥ उपवासत्रयं कृत्वा जपेत्पंचसहस्रकं ॥ पुरश्चरणसिद्धिः स्यान्मंत्रस्य तु
औनाप्यकर्मणि ॥ स्त्रीपुस्त्री बालहत्यानां शांतिमिच्छन्निदं चरेत् ॥ प्रतिसंवत्सरं त्वार्द्रानक्षत्रे स्यादु
पक्रमः ॥ यवान्वा तिलमिश्राणां जुहुयादयुताहुतीः ॥ अथ मानस्तोके इत्यस्य ॥ कृच्छ्रमेकं चरि
त्वादौ पात्रे औदुंबरे घृतं ॥ निधाय कापिलं तस्य कुर्याद्वै वाभिमंत्रणं ॥ सहस्रसंख्यया तेन स्वाग्नौ
वा मथिते पि वा ॥ जुहुयादष्टसाहस्रीं तथा व्याहृतिभिः शतं ॥ एवं कृते सर्वकाममाप्नोसेवनं सं
शयः ॥ अथारण्ये इत्यस्य ॥ लक्ष्म्यापुष्ट्यकामना यस्य जुहुयात्सोऽयुताहुतीः ॥ मध्वक्तैस्तंदुलैः शुक्लै
र्वेर्हुतेन तस्य मायुषी ॥ दिनत्रयमुपोष्यैवप्राक् सिद्धमंत्रस्य चोच्यत इति ॥ अथ मीढुष्टमेत्यस्य ॥ एकरा
त्रे जपेत्पंचसहस्राणि सुसंयतः ॥ पुरश्चरणसिद्धिः स्यात्प्रयोगार्हस्ततो भवेत् ॥ अर्थनाशभयेप्रा
प्ते तथैव प्राणसंशये ॥ तस्करादिभये चैव जुहुयात्सर्पिषाहुतीः ॥ पंचैव तु सहस्राणि भयेभ्यो मुच्य
ते ध्रुवं ॥ अथ सहस्राणीत्यस्य ॥ कृच्छ्रमेकं चरित्वादौ जपेत्पंचसहस्रकं ॥ सचिवादिप्रधानानां पु

Indira Gandhi National
Centre for the Arts

रुषाणामुपद्रवे॥ तच्छांतये महीपालः कारयेदयुताहुतीः॥ समिधस्तत्र शाल्मल्यो विकंकततरवोऽथ
आ॰क॰ पि॥ व्रीहयश्च यवाश्चापि होमद्रव्यं तिला अपि॥ यद्भिमारणकामश्चेज्जपेच्छतसहस्रकं॥ ततो वल्मी
कसंभूतमृदा लिंगं प्रकल्प्य च॥ मंत्रेणानेनाभिषिंचेद्यावच्छीर्णं भवेद्धि तत्॥ एवं कृते भवेन्मृत्यु
९७ र्विद्विषो नात्र संशयः॥ अयं प्रकारो राजमत्तेऽपि नाम पिसाधारणोऽयज्जुर्मंत्र स्मो मुक्तः॥ गौरवभी
तेन लिखितः॥ अत्र सर्वत्र दक्षिणोपयन्तानि रूप्यते॥ सापि महार्णवे॥ दक्षिणा चोत्तमा मध्या चाधमा
चेति त्रिधा मता॥ तत्र सौवर्णनिष्काणां दशसाहस्रिकोत्तमा॥ तदर्द्धं मध्यमा प्रोक्ताः तती यात्रि सह
स्रिका॥ उत्तमा त्रिशतीसाण्णाद्विशती मध्यमा मता॥ शतमात्राऽधमा ज्ञेया प्रकारोऽन्यश्च कथ्यते।
। उत्तमा तु चतुःषष्टिस्तदर्द्धं मध्यमा स्मृता॥ चतुर्विंशतिरंसा स्यादधमा मे॥ विधिरुच्यते॥ सहस्रं द
क्षिणादेया दशस्त्रवकर्तृके॥ शतानि पंच देयानि रुत्विक् पंचककर्तृके॥ अथैककर्तृके दे राम:
यं शतत्रयमिति स्थितिः॥ सर्वत्र हि गुणान्दद्याद्दार्पायत्तु दक्षिणां॥ बहुस्रवनिष्पाद्य उत्तमा ९७
प्रतिरूपं॥ अथैककर्तृके कर्तुरेकस्यैवोत्तमा मता॥ एतां तत्सहस्रानां च दक्षिणाकथितोत्तमा॥

अन्येषां मध्यमां स्याद्वा दक्षिणादाननिर्णयः॥ अभुक्त दक्षिणाके षु प्रयोगे द्विपमीरिता॥ विभवे
सति यो मोहान्न कुर्याद्विधिविस्तरं॥ नैव तत्फलमाप्नोति प्रल्लोभाक्रांतमानसः॥ इति दक्षिणोपयन्ता॥
॥ ॥ अथ शिवस्तुतिः॥ तत्रैव॥ अत्रम्सनातिरिक्तो क्तिमप्रवाप जिहीर्षया॥ स्तौमि स्तवेरमाधीश
चर्मनिर्मितवाससं॥ जय जय महाभैरव। महाभीमभूत। भूतिभूषित। मूलकुंडलिकुंडलालंकृ
त। अतिघनविलसिततडिदुपमितचलदुरुतरकरालनिखिलनिगमोपगीयमानसुरवैरकरपरि
पंचयविरचितचतुरचरणशृंगारकमलकलितकपालसरसिजासनविस्तारितसमस्तमस्तजग
द्विस्तारसंहारसंभारसन्ततगुणानिरवधिकपरिमाणनीहारपरीवारमरीचिविरिंचिव्यापारपात्री
जलालितजटाजूटाभिरामहरदुरितहरअपरदिग्गणानां संभोगसरागपतंगभंगपालिंगितोत्तमां
गभ्रमध्यनयनमदनदमनमत्तमधुकरझंकारसंकाशमत्तभृंगसंरव किंकिणीक्वणितललित
पदाहतिक्षिन्नमहीमंडलाभागंडजपतिप्रस्तूयमानतांडवाडंबरस्फारोत्कर्षध्वस्तदैत्यदानव
संघातांतरांतरितशांतांतःकरणश्रवणवरत्नधाराधरध्वानगंभीरवर्बरगलगवयफूत्कारनिरस्त

Indira Gandhi National Centre for the Arts

गल्लरमहाराजीविराजमानधाराधीशकस्यकांकांनिसंक्रांतनिजकलेवरैकदेशअखिलजगदधी
आ॰क॰ शानमस्तेनमस्तेनमस्ते॥एवमन्यदपिस्तोत्रंस्तोतव्यं॥अत्ररुद्रहोमादौयेमेविशेषाआगमोक्ता
ग्रंथांतरतोवसेयाः॥इत्युपरम्यते॥इतिविधानपारिजातेरुद्राध्यायविधानंसमाप्तम्॥ ॥उप
९८ क्रांतमुपसंह्रियते॥आचारःप्रथमोधर्मःश्रुत्युक्तःस्मार्तएवच॥तस्मादस्मिन्समायुक्तोनित्यंस्या
दात्मवान्द्विजः॥विहिताकरणंयत्रनिषिद्धाचरणंतथा॥नानानरकदुःसांहीनयोनौचजन्मदं॥
आचाराद्विच्युतोविप्रोनवेदफलमश्नुते॥आचारेणतुसंयुक्तःसंपूर्णफलभाग्भवेत्॥सर्वल
क्षणहीनोपिसमुदाचारवान्नरः॥श्रद्दधानोऽनसूयश्चशतंवर्षाणिजीवति॥अक्रोधनःसत्यवादी
भूतानामप्यहिंसकः॥अनिन्द्यश्चवदान्यश्चशतंवर्षाणिजीवति॥अहन्यहनिविप्राणांकर्मनित्य
मिहोदितं॥अह्नामिर्वमेतेयस्मात्आन्हिकंतद्विदुर्बुधाः॥ ॥अनंतान्हिकनामेदमनंतार्थ
प्रकाशकं॥अनंतेनकृतंयस्मादनंतस्यप्रसादतः॥नागदेवतनूजोयंमहोनंतोमहामतिः॥आन्हि राम:
कामतसेकेनद्विजवक्षानवर्द्दूमेन॥संतिग्रंथसहस्राणिआन्हिकस्यविधौबुधाः॥कोप्यस्यमहि ९८

Indira Gandhi National
Centre for the Arts